वच्छिन्नवह्न्यधिकरणतात्वावच्छिन्नप्रमेयाभावस्य निर्वह्न्यावेव संभवान्निर्वह्नावित्यस्यासंगताभावात्। वह्नि संबन्धसामान्येन। संबन्धत्वे
न तथाभावसंबन्धस्यैव साध्यतावच्छेदकसंबन्धत्वोपगमात् तत्पाचागत पाचसामान्यादावपि विषयतया केवलान्वयिनः भगवद्विज्ञानरूप
स्य समवायिनः प्रमेयस्य सत्त्वान्नतेन रूपेण प्रमेयाभावस्य प्रसिद्धिरिति वह्नित्वायुक्तीर्तनं। निर्वह्नावित्यस्य संबन्धसामान्येन वह्निरूपस्ये
रत्यर्थः अग्रिमो विनिगमनाविरहस्त्वापततः। कालिकसंबन्धेनेत्यग्रिमाभावस्य संबन्धसामान्यात गतकालिकसंबन्धेनेत्यर्थः। न काप्ये
नुपपत्तिः। एवं च वह्नित्वेनेतिपाठः श्रुतार्थकमेवेति बोध्यं। अभाव इति। तथा च भावत्वेनाभावानां अभावत्वेनाभावानामभावः समनि
1 यताभावे स्यमते कूटघटितलक्षणेऽभावप्रतियोगितात्वेन साध्यतावच्छेदकव्यापकत्वनिवेशात् प्रमेयत्वसमनियतप्रतियोगिताक
इत्याशयः। यद्वा। एकाभावीयत्वेन प्रतियोगिताविशेषे स्वभिमानेनेदं। तन्निराकरणार्थत्वेने वानुपदमभावस्यैवेत्येवकारदर्शनात्
नन्विति। समनियताभावानामैक्यमते क्वचाभवतु विशेषरूपेण तत्प्रतियोगितायाः न समनैयत्यस्य संभवः॥ अभावप्रतियोगितात्वेन
समनैयत्यं न विवक्षितुमर्हं वह्न्यादिसाध्यके साध्याभावाप्रसिद्धेः तादृशप्रतियोगितात्वावच्छिन्नस्य किंचिन्निष्ठस्याभावसाधारणत्वा
दिति भावः। प्रमेयमात्रेति। मात्रपदं। एतत्सार्थकं। न चावन्-धूमादियादौ तत्तत्सावैर्वौ ध्याभाववारणाय कूटघटितलक्षणोक्तत्वसाध्य
वत्तिप्रतियोगिताकाभावविवक्षणे पृथिवीद्रव्यत्वप्रकारकप्रमाविशेषयत्वादित्यादौ जातिसामान्याभावस्यापि लक्षणघटकत्वाप
त्तिरिति वाच्यं। तत्त्वप्रतियोगिवृत्तिसाध्यतावच्छेदकत्वेन साध्यतत्त्वनिवेशस्य त्वात्। प्रमेयमात्रेति पदस्य उपपादयांज्ञाभिप्रायकत्वा
त्। अभावप्रतियोगितात्वेन साध्यतानैवच्छेदकव्यापकत्वस्य तत्त्वघटितत्वे न साध्यतावच्छेदकव्याप्यत्वस्य निवेशान्न दोष इति। नव्याः

वस्तुतस्तु। यत्किंचिदभावत्वनिरूपकप्रतियोगितात्वेन समनैयत्यमनुयोगिताभेदाच्च प्रतियोगिताभेदोऽतः प्रतियोगितायाः किंचिद्वि
शिष्टस्वाभावसाधारण्येपि न क्षतिः। एवं चाभावत्वेन भावाभावत्वेनाभावाभावत्वेन भावाभावसैक्येपि अभावत्वभेदान्न लक्षणघटतेऽस्तै
उत्तरग्रंथारंभः। वन्हिमात्रेति। वन्हिमात्रेप्रतियोगिताप्रमेयत्वसामानाधिकरण्येन भासत इति भावः। विनिगमनाभावेनेति। प्रतियोगि
तावच्छेदकावच्छिन्नतद्वृत्तिता दण्डप्रतीत्यनुपपत्तिरेवाभावस्य तन्मात्रप्रतियोगिकत्वे विनिगमना। न चेह सा संभवति। गगनत्वावच्छि
न्नाधिकरणस्याप्रसिद्धत्वादिति भावः। बाधकाभावात् चिंतामणिकृतामेव विशेषरूपेण सामान्याभावांगीकारे बाधकं। ननु सौंदला
नामिति भावः। अवृत्तौ महाकालिकसंबंधेन गगनत्वस्य वृत्तेर्मात्रपदं। तच्च कालिकादिसंबंधस्याग्राह्यतायां। तेन संबंधेन तद्भि
न्नेचरमध्वंसादावपि गगनत्वसत्वात्। एवं च महाकालमात्रवृत्तिविशेषणतासंबंधावच्छिन्नगगनत्वनिष्ठावच्छेदकताकप्रमेयसामा
न्याभावोपि लक्षणघटकः। एवेत्याशयेनाह। यादृशेति। वृत्तित्वमत इति। तादात्म्येन प्रमेयस्य साध्यत्वे गगनत्वेन प्रमेयभेदस्य संबंधसामान्ये
न साध्यत्वाभिप्रायेत दंतर्गतविषयतासंबंधेन गगनसत्वात्। गगनत्वेन प्रमेयाभावस्यासंभवात्। अवतारणासंभवान्मतानुधावनं व्य
र्थमिति तु ऽदृष्टव्यं। समवायादिसंबंधावच्छिन्नायच्छेदकताविशेषपर्याप्तेः पटत्वांतर्भावेनैव घटत्वे सत्वेऽभावस्य केवलान्वयिता निर्वा
ह इत्यभिप्रायेणाधीधितिकृता पटत्वोल्लेखः। संयोगादिसंबंधावच्छिन्नपर्याप्तेस्तु तमनंतर्भाव्यापि घटत्ववृत्तेः तस्य केवलान्वयिता निर्वाहक
त्वसंभवात् तथाविधावच्छेदके गौरवेयापदत्वत्यागं दर्शयति। इदमिति। न चैवं वाच्यत्वस्य भगवदिच्छारूपत्वेपि न क्षतिः। संयोगादिव्यधि
करणसंबंधस्यैव प्रतियोगितावच्छेदकता घटकतासंभवादिति वाच्यं। वाच्यत्वत्वरूपताया वा वास्तवत्वात् वास्तववाच्यत्वे च समवायित्व

2

स्यप्रतियोगितावच्छेदकताघटकसंबंधेन धर्मत्वेपि वैयधिकरण्यसंभवतीति वाव्यत्वपदलक्ष्यार्थो नादरणीय इति मनसि कृत्य वाच्यत्वं
यथेति पंक्तिलेखनात् भवतु तत्तथैव परंतु व्यधिकरणधर्मावच्छिन्नाभावस्येति मूले धर्ममविवक्षितार्थकं प्रतियोग्यवृत्तिश्च धर्म इति
मूले गगनेन घटाभावादिनिराकरणानुरोधेन धर्मपदस्याविवक्षितार्थत्वोक्ते तत्तथाविधाभावानाभाससनिर्युक्तित्वोक्तेः एवं च धर्म
स्यनावच्छेदकतानियामकत्वभ्रमः। कार्य इति मनसि कृत्य इदं चोपलक्षणमित्याद्यारंभ इति। न च कूटघटितलक्षणेपि समवायित्वेन
नाव्यत्वाभावस्य न लक्षणघटकता। समवायित्वेन प्रमेयत्वाभावप्रतियोगितायां लाघवेन तत्प्रतियोगिता नव्यत्वादिति वाच्यं। एकधर्मा
वच्छिन्नप्रतियोगितायाः ऐक्यस्य चक्रवर्तिलक्षणे निराकरणात्। नव्यास्तु। प्रतियोगिताविशेषणतापन्नतदनापन्नयोरवच्छेदकतामतेम्
लोः क्याभावः। अन्यथा वाव्यत्वाभिन्नत्वेन वाव्यत्वाभावः। चक्रवर्तिलक्षणे वह्निलवहृदत्वाभ्यां वह्न्यभावप्रदर्शनं न तदंगीकारबी
जमित्याहुः। तन्नः एवमपि साध्याभावकूटासत्वे नाव्याप्तिः। न च तत्र कूटो न निवेश्य इति वाच्यं। तथासति धूमवान्वह्नेरित्यादावति
व्याप्तेः। न हि केवलान्वयिस्थलीयलक्षणस्य तत्र लक्षणता। नापि सिद्धोपयोगजातीयस्य तत्त्वावृत्तिरिति शिवं। साध्यतावच्छेदक
समनियतप्रतियोगिताकाभावो यो यद्वृत्तिनिवेशात् नातिव्याप्तिरिति। ननु पारिभाषिकाव्यभिचरितत्वस्य अथेति मूलानभिप्रेतत्वा
त्कुतस्तदवलंबनेन प्रतियोग्यवृत्तिश्चेति ग्रंथावतारणं। न चाग्रे एवं तत्तदभिप्रेतमिति सांप्रतं। शंकानभिप्रेतत्वे प्रतियोग्यवृत्तिश्चे
तिदूषणसमुच्चयानुपपत्तेरिसत आह। अथेति। तथा च योगः संभवन्नपि शंकितुरविवक्षित इति भावः। तर्हि स्यादिमूले च यस्स
मानाधिकरणा इति लक्षणस्याव्यभिचरितत्वपदार्थत्वनिराकरणपरकार्थी प्रसक्ति रूपमभिधानं तर्हि योगार्थ एव व्याप्तिरस्त्विति शं

अ॰

ता॰टी॰प्र॰मंजू॰ कावारणायतल्लक्षणस्य योगतस्तत्पदार्थत्वेनाकृत्य परिभाषयातु तद्भवत्यवेसार्थं येन दीधितौ पारिमितिमूले घटे वाच्यत्वाभावः प्रसिद्ध एव

२४ वेतियोजना। तेन केवलान्वयिन्यभावादित्यनेनोक्ताप्रसिद्धिरुद्धारलाभः॥ चकेसाकांक्षायां घट इति जगदुपलक्षणमेतत्। ननु अथैसादिग्रंथ

स्य पारिभाषिकाव्यभिचरितत्वतात्पर्यकल्पयितुमशक्यत्वात्तथा सति समवायित्वे न वाच्यत्वाभावप्रसिद्धावपि इदं वाच्यं ज्ञेयत्वादित्यादौ ज्ञेय

त्वस्य घट एव व्यभिचारात्साध्याभाववदवृत्तित्वरूपलक्षणाव्याप्तिरस्त्येवेत्यभिप्रायकस्य नन्वेवं घट एवेत्यादिग्रंथस्यासंगतेः। ज्ञेयत्वे व्यभि

५तपारिभाषि चारसत्वेपि व्यधिकरणधर्मावच्छिन्नाभाववद्वृत्तिकाव्याप्तिचारस्याव्याप्यभावात्। न च घट एवेत्यादिग्रंथस्य व्यभिचारसत्वेन तदभावरूपल

क्षणाव्याप्तिरित्यर्थान्नासंगतिरितिवाच्यं। पूर्वं मूलस्य योगार्थभूताव्यभिचारपरतायाअननुमतत्वादेतद्ग्रंथस्य तादृशार्थासंभवादित्य

त आह। तथा चेति। तथा चैतद्ग्रंथस्य वाच्यत्वे साध्ये ज्ञेयत्वादेर्व्यभिचारित्वेनाल्लक्ष्यत्वात्तत्र लक्षणगमनेपि क्षत्यभावेन साध्याभावप्रसिद्धि

श्रमो निरर्थक इत्येतद्ग्रंथाभिप्रायः एवेति। साध्याभावप्रसिद्धिप्रदर्शकेत्यादिः अभावप्रदर्शन एव तद्ग्रंथस्य शंकोदयादिति भावः॥ यद्वा साध्या

भाववद्वृत्तित्वे न व्यभिचारिणो ज्ञेयत्वादेः अलक्ष्यतयापारिभाषिकाव्यभिचरितत्वरूपव्याप्तिसत्वात्तत्रातिव्याप्तिरिति न तल्लक्षणता

त्पर्यकं पूर्वं मूलासंगतिरित्यर्थः॥ एवं पूर्वं मूलपदं वा त्रकल्पे एतन्मूलपरं। अस्यापि साध्यतावच्छेदकेसाद्यपेक्षपूर्वत्वात्। साध्यतेत्यादि उत्त

रमूलं च साध्यतावच्छेदकधर्मसंबंधावच्छिन्नसाध्याभावव एवाव्यभिचारघटक इति विवक्षितसाध्यव्यभिचाराप्रसिद्धपातस्य सद्धेतुत्वव्यव

स्थापकं। वाच्यत्वेन घटाभावस्यापि तद्घटकत्वासंभवादितितहरति। हेतौ व्याप्तिरव्यभिचरितत्वपदार्थः न चाथैसादेर्यत्समानाधिकरणा इ रा म ०

त्येतस्यातथायोगार्थस्याव्यभिचरितपदार्थत्वाभिधानमनुपयुक्तमितिवाच्यं। योगाभावात्तल्लक्षणस्याव्यभिचारपदार्थत्वेनेतिप्रसादनार्थ २४

त्वान्तथाचेति। योगार्थः प्रसिद्ध्यभिधानंच दर्शिताभावस्यानुपयोगीत्यर्थः। तल्लक्षणस्य योगतस्तत्पदार्थत्वं मा भूत् परिभाषया तु तद्व
त्येवेत्याशये नदीधितौ पारिभाषिकमेवेत्युक्तत्वात् एतेनाव्यभिचरितत्वपारिभाषिकत्वे व्यभिचारधीविरोधीविषयस्यैव व्याप्तित्वमिति नि
यमभंगस्य च नायतर्हीति तादृशनियमस्य प्रामाणिकत्वाशयेन दीधितौ पारिभाषिकमित्युपात्तं प्राकू यत्समानाधिकरणोरे इत्यत्र प्रयो
जनाभावे पारिभाषिकत्वस्याज्ञानादिति सर्वं समञ्जसं चास्तु। योगार्थीभूतकूटघटितलक्षणाभिप्रायिकायेत्यादिग्रंथकातत्वयोगा
र्थीभूतव्यभिचारघटको यादृशसाध्याभावस्तादृशसाध्याभावघटितव्यभिचाराभिप्रायिका न चेति शंका। अन्यादृश एव साध्याभावो
व्यभिचारघटक इत्यभिप्रेयत तत्समाधानं यादृशसाध्याभावो व्यभिचारघटकस्तादृशसाध्याभाव एवाव्यभिचारघटको यथा योगार्थत्व
व्याघातादित्याशयेन तर्हीति। एवं च व्यधिकरणधर्मावच्छिन्नाभावमात्रनिराकरणार्थं प्रतियोग्यवृत्तिश्चेतीति प्राहुः। मूले घटे वाच्यत्वाभा
3 वः न तादृश इति योजना। स्वरूपधानवच्छिन्नवाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वस्य वानजर्पत्वात्। ग्रंथे इत्यनंतरं बोध्यः। केनापीति।
नन्वात्मत्वाधिकरणेप्यात्मत्वाभावसत्त्वात्कथमव्याप्तिः अवच्छेदकनिरुक्तौ ग्रंथकृतैव व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताका
भावांगीकारात्। न चैवं वह्निमतीदृशीयावदभावसत्त्वेन वह्न्यादिनिष्ठप्रतियोगितायाः साध्यव्यापकतावच्छेदकत्वानुपपत्तिः
साध्यव्यापकतायां प्रतियोगिवैयधिकरण्यप्रवेशेपि तत्र प्रतियोग्यनधिकरणत्वसत्त्वात्तदनुपपत्तिरिति वाच्यं प्रतियोग्यनधिकर
णत्वस्य व्यासज्यवृत्तिधर्मानवच्छिन्नानुयोगितासंबंधेन वाच्यतया तदनिवेशे साध्यवति तादृशधर्मानवच्छिन्नानुयोगिताकत्वस्या
भावे निवेशे न च पक्षद्वयेपि वह्न्यादिनिष्ठप्रतियोगितायाः साध्यव्यापकतावच्छेदकत्वसंपत्तेरिति चेन्न। घटाद्यभावप्रतियोगिताया

६ न च वाच्यत्वत्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वस्याप्रसिद्ध्याभिधानुपपत्तिरिति वाच्यं वाच्यत्वत्वावच्छिन्नप्रतियोगिताकत्वस्वरूपसंबंधा ६
६ वच्छिन्नप्रतियोगिताकत्वोभयाभावस्य

जा॰ टी॰ अ॰ मं॰ जैं अपि प्रोक्तरीत्या साध्यव्यापकतावच्छेदकत्वापत्तेः प्रतियोगितायां व्यासज्यवृत्तिधर्मानवच्छिन्नानुयोगितासंबंधेन साध्यव्यापक
३५ तावच्छेदकनिवेशापत्तेः कूटघटितलक्षणानामपि तादृशानुयोगितारूपसंबंधमनिवेश्यातिव्याप्तत्वाच्चेत्तादृशाभावानंगीकारेऽपि
तल्लक्षणानामभिधानात् अस्तु वा तादृशाभावांगीकारः अस्तु वा घटाद्यभावप्रतियोगितावारकमुक्तं अग्निमं वा तत्संबंधावच्छि
न्नाधेयतावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छेदेनेति विशेषणं तथापि ज्ञानान्यत्वाभावस्य त्वानात्मकस्य वारणाय हेतुसा
मानाधिकरण्यमावश्यकं तदुपात्तमिति। न च साध्यव्यापकतावच्छेदकप्रतियोगितायां यत्किंचित् साध्यतावच्छेदकानवच्छिन्नत्वो
क्तौ एवं नाव्याप्तिरिति इदं व्यर्थं प्रमेयसाध्यतावच्छेदकके व्याप्तिवारणाय यत्किंचित्त्वमिति वाच्यं तथापि तत्रैव द्रव्यत्वाभावमादाया
व्याप्तेः। न च प्रतियोगितायां स[redacted]ध्यनिष्ठत्वमप्यस्त्विति वाच्यं तत्रैव घटात्मत्वान्यतरत्वावच्छिन्नाभावमादायाव्याप्तेरिति। ननु सा
ध्यव्यापकतावच्छेदकप्रतियोगितायां स्वव्यधिकरणधर्मावच्छिन्नत्वनिवेशनान्नायं दोषः प्रमेयत्वात् वाच्यत्वादित्यादौ हेयत्वेन वाच्य
त्वाभावस्य सुलभत्वादिति चेन्न। समनियताभावस्य मते घटत्वेन धूमाभाव धूमत्वेन वह्न्यभावयोरभिन्नतया प्रति[redacted]योगिसमानाधिकर
णत्वेनातिव्याप्तेः। हेतुसामानाधिकरण्यस्य वैशिष्ट्ययोर्निवेशमपेक्ष्य समानाधिकरणधर्मावच्छिन्नाया प्रतियोगितातावच्छेदकू
टत्वरूपतन्निवेशे गौरवाच्च। न च हेतुसामानाधिकरण्यानुपादाने वह्निमान् धूमादित्यादौ धूमध्वंसाभावाभावमादायाव्याप्ति
संभवात् कथं मयामेय्याद्यनुसरणमिति वाच्यं। स्वविशिष्टहेत्वधिकरणदलनिवेशे एतद्व्याप्तिः अत्र तु तन्निवेशे तदनिवेशे चेत्सु राम॰
भ यथापीत्यतः तत्परिसाऽगात्। समानकालीनत्वं। तदधिकरणकाले कालिकसंबंधेन वृत्तित्वं तत्पदमात्मत्वाभावपरं। इत्थं चेतिनान ३५

न्वेनमपि हेतुसमानाधिकरणा इत्यस्यपवैयर्थ्यं दुर्वारं स्यात्। सत्ताभावस्यापि प्रतियोग्यधिकरणे समानकालीनत्वादिसंबंधेन संबद्धत्वसंभवादि
ति मैवं यथासन्निवेशोऽवैयर्थ्यात्। वृत्तित्वनिवेशाभिप्रायेण तदुक्तेः। वस्तुतस्तु। समानकालीनत्वादिः संबंधत्वं गदाधरमते नास्ती ग्रंथकृन्मते त्वस्तीत्ये
तावन्मात्रं। नच गदाधरमते प्रतियोग्यधिकरणसंबंधित्वलाघवान्निवेशं तथा सत्या सत्ताभाववारणाय हेतुसामानाधिकरण्यमावश्यकं ग्रं
थकृन्मते तु तदर्थं प्रतियोग्यधिकरणवृत्तित्वानुधावनमिति वाच्यं। प्रतियोग्यधिकरणसंबंधित्वं प्रतियोग्यधिकरणानुयोगिकसंबंध
प्रतियोगित्वं प्रतियोग्यधिकरणानुयोगिकप्रतियोगित्वमिति यावत् तत्र प्रतियोगित्वं प्रतियोगित्वं प्रतियोगितात्वं वाऽखंडोपाधिः प्रति
योग्यधिकरणवृत्तित्वं प्रतियोग्यधिकरणनिरूपिताधेयत्वं तत्राधेयत्वमाधेयतात्वं मखंडोपाधिरिति गौरवलाघवयोरभावाद्द्वयोरेवं
मतं साधीयः प्रस्तुततर्कालंकाराणां निरूपितत्वसंबंधेन प्रतियोग्यधिकरणविशिष्टवृत्तित्वनिवेशलाघवं। केचित्तु हेत्वधिकरणसंबंधित्व
निवेशो हेत्वधिकरणावच्छेदेन प्रतियोग्यधिकरणसंबंधित्वमेव निवेश्यं न तु स्ववैशिष्ट्यमपि कपिसंयोगाभावादिसाध्यके कपिसंयोगाद्यास
4 काभावस्य गगने वैकज्ञानविषयत्वादिना संबद्धत्वेनाव्याप्त्यभावात्। न चेदमेतत्पक्षे परित्याज्यमेवेति वाच्यं। तथापि वाच्यत्वादिसाध्यके स
मानाधिकरणधर्मावच्छिन्नगगनाभावाभावादिकयावदुपलक्षणासंगतिर्भवति हेत्वधिकरणावच्छेदेन येनकेनचित्संबंधेन संबद्धत्वस
त्वात्। नचैतदभावस्य साध्यवति समानकालीनत्वसंबंधेन सत्त्वात् कथं लक्षणघटकत्वं साध्यवद्वृत्तित्वस्यैव निवेशात्। असंबद्धत्वादभावाप्रसिद्ध्या
पत्तादिति प्रतियोग्यवृत्तिश्चेति ग्रंथावतारानुपपत्तिरिति वृत्तित्वनिवेशनमावश्यकमित्याहुः। साध्येति। साध्यवति येन येन संबंधेन वृत्तित्वं तेन तेन
न संबंधेन स्ववैशिष्ट्यं बोध्यं। तेन स्पंदः कालत्वादिसाध्यकोऽशुद्ध्यकालिकसंबंधेन साध्यसमानाधिकरणस्य स्पंदत्वाद्यभावस्य संपदानुयोगि

जा·टी·भ·मनू कालविशिष्टकालिकसंबंधेन स्वविशिष्टहेत्वधिकरणीभूतसंपदावच्छेदेन प्रतियोगिसामानाधिकरण्यं विनातिव्याप्तिः। शुद्धकालिकसंबंधेन
३६ स्वविशिष्टे महाकाले सत्त्वात् द्रव्यमिति। साध्यवत्तिस्वरूपसंबंधेन स्ववैशिष्ट्यासत्त्वेन कालिकसंबंधेन द्रव्यत्वसाध्ये संपदत्वादावव्याप्तेः।
साध्यवत्त्वमपि साध्यतावच्छेदकसंबंधेन वाच्यमिति चेत् समवायकालिकान्यतरसंबंधेन द्रव्यत्वसाध्यके तत्रैवाव्याप्तेः। वस्तुतस्तु तत्रैव पृथि
व्यन्यत्वद्रव्यत्वाद्यभावमादाय सत्तावान्यत्वसत्त्वादित्यादौ च गुणान्यत्वविशिष्टसत्ताभावमादायाव्याप्तिः तयोः स्वरूपसंबंधेन साध्यस
मानाधिकरणत्वादिति हेतुसमानाधिकरणत्वमुपात्तं। तथा च तयोः हेतुमत्ति केनापि संबंधेनावर्तमानत्वान्न दोषः। एतेन स्वरूपसंबंधेन सा
ध्यवद्वृत्तित्वप्रवेशेऽस्य वैशिष्ट्येन प्रवेशेऽपि कपिसंयोगाभावादिसाध्यके कपिसंयोगादिसुहासे तत्प्रयोजनाभावादिति कथमव्याप्तिरित्यपास्तं
तत्रैव गगनत्वविशिष्टवाच्यत्वाद्यभावमादायाव्याप्तेः स्वविशिष्टत्वस्य दर्शितत्वात्। यत्तित्यादौ यद्यपि धूमवान्वह्नेरित्यादौ धूमाभावादेः
कालिकसंबंधेन साध्यसमानाधिकरणतयातिव्याप्तिरतः स्वविशिष्टहेत्वधिकरणावच्छेदेनेति वाच्यं। तथा च यावत्त्वयत्समानाधिक
रणत्वयोर्वैयर्थ्यं च। तथापि तादृशहेतुमद्वृत्तयो यावन्तः तत्प्रत्येकाश्रयीभूतसाध्याधिकरणवृत्त्यपदार्थः स्यात्। तत्र तादृशयोगोल
कत्वादीनां कालिकसंबंधेन साध्यवति सत्त्वादतिव्याप्तिरतः हेतुमति येन येन संबंधेन वृत्तित्वं तेन तेन तत्प्रत्येकाश्रयत्वं विवक्षणीयं तात
दपेक्षया हेतुमत्ति चेन येन संबंधेन वृत्तित्वं साध्यवति तेन तेन संबंधेन वृत्तित्वनिवेशनमेवोचितं। स्वविशिष्टेतिदानिवेशोऽपि प्रत्यवान्य
त्वाभावमादाय गोनानोत्वादित्यादौ अदोषेण लाघवात्। एतेन हेतुमत्ति साध्यवति च वृत्तित्वं न संबंधसामान्येन यत्किंचित्संबंधेन प्रतियो रामः
गिमत्ताग्रहविरोधितानियामकसंबंधेन वा तत्र भाविच कालिकसंबंधमादाय प्रसिद्धव्यभिचारिण्यतिव्याप्तेः। सत्त्वं सत्त्वादिसाद्यावत्तिव्या ३६

१.

तेष्व। नच हेतुतावच्छेदकसंबंधेन हेतुमद्वृत्तित्वं साध्यतावच्छेदकसंबंधेन साध्यवद्वृत्तित्वं वाच्यमिति वाच्यं। वह्निमान्तद्रूपादित्यादौ हेतुसमाना
धिकरणाज्ञातीयादेः साध्यसामानाधिकरण्यासत्वेनाव्याप्तेः। नच साध्यवद्वृत्तित्वं हेतुतावच्छेदकसंबंधेनैवेति वाच्यं। तथापि तद्रूपाभिन्नं गुण
त्वादित्यादावतिव्याप्तिः। गुणसमवेतानां सर्वेषामेव तद्रूपभिन्नसमवेतत्वात्। नच सामानाधिकरण्यं द्वयमपि साध्यतावच्छेदकसंबंधेन
उक्तस्थलादावतिव्याप्तिः। गुणसमवेतानां सर्वेषामिव तद्रूपेभिन्नस(म)स्थले च हेतुसमानाधिकरणस्य तद्रूपत्वप्रकारकप्रमाविशेष्यत्वादेः साध्या
सामानाधिकरण्यान्नातिव्याप्तिरिति वाच्यं। सत्तावान्प्रमेयत्वादित्यादावतिव्याप्तेरित्यपास्तं। स्वरूपसंबंधेन वा सामानाधिकरण्यं द्व
यं निवेश्यमेतल्लक्षणार्थं। चाभावपदमिति। यत्तु। रवेस्तु तिरूपभिन्नं गुणत्वादित्यादावतिव्याप्तिः। रूपभेदाभावस्य दुर्धरत्वात्। नच व्यभिचा
रनिरूपकाधिकरणतत्तद्व्यक्तिमन्यत्वाभावः। तस्यापि तत्तद्व्यक्तिमनुयोगित्वविशिष्टरूपत्वात्मकत्वादितिमतं तन्न रूपत्वप्रकारकप्रमाविशेष्य
त्वादेः रूपभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावादेर्वा उत्तरलक्षणे ऽनतिरिक्तत्वेपि एतल्लक्षणरन्मते रूपत्वाद्यतिरिक्तत्वात् वक्तत्वस्य
5 विशिष्टहेत्वधिकरणावच्छेदेनेत्युक्तावनुक्तौ च सत्तावान्वा त्माकाशान्यतरत्वादित्यादौ हेतुसमानाधिकरणस्य गगनवृत्तित्वविशिष्टवा
च्यत्वाभावस्य साध्यसामानाधिकरणतया ऽतिव्याप्तेर्यावत्त्वमवश्यपकं। हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नस्य साध्य
तावच्छेदकसंबंधेन साध्यतावच्छेदकावच्छिन्नस्य चाधिकरणं बोध्यं। तेन वह्निमान्धूमात्। द्रव्यं विशिष्टसत्वादित्यादौ नाव्याप्तिः
न वा ज्ञानवान्द्रव्यत्वात् विशिष्टसत्तावान्ज्ञातेरित्यादौ ऽतिव्याप्तिः। वह्नेरप्यभावप्रतियोगितया तिव्याप्तिरतः स्वपदं। इदं संसर्गेवेति। नन्वत्र या
वत्वं किमर्थं। वाच्यत्वाभावमादायातिव्याप्तिवारणाय हेत्वधिकरणावच्छेदेन साध्यसामानाधिकरण्यनिवेशात्। स्वविशिष्टत्वं तु न देयं

ता·टी·प्र·मञ्जू·

२०

धूमसंयोगाद्यात्मकाभावस्यस्वविशिष्टहेत्वधिकरणावच्छेदेनसाध्यसामानाधिकरण्यापादतिव्याप्तिः। मैवं। साध्यसामानाधिकरण्यंहे

त्वधिकरणावच्छिन्नत्वं। हेत्वधिकरणताव्यापकनिरूपकताकत्वमपेक्ष्य यावत्त्वावलाघवात्। न चास्तिगोत्वान्गोत्वादित्यादौतथा

विधंसप्रलयत्वादेः साध्यासमानाधिकरणतयानातिवह्निमान्धूमादित्यादौः स्वरूपवृत्तिमत्त्वतत्तदात्तत्रैव संगाद्धेत्वधिकरणावच्छेदे

स्यस्यैवेयर्थ्यात्यत्तुहेत्वधिकरणताव्यापकसाध्याधिकरणताकत्वोदानान्नयावत्त्वनिवेशवृत्तितन्न अधिकरणतायाअव्याप्यवृत्ति

त्वेनाव्याप्तिः व्याप्यवृत्तित्वेतस्थानेसाध्यवत्त्वप्रकारकप्रमाविषयत्वनिवेशेचगौरवात्। वस्तुतोगगनाभावादौतादृशसाध्याधि

करणतासंबंधित्वंतद्वृत्तित्वादिकंमितिउक्तरीत्याहेत्वधिकरणताव्यापकत्वंवैयर्थ्यअवतारकत्वेति। ननु [redacted] व्यावर्त्यंव्यापकत्वं

तच्चहेतुसामानाधिकरण्य [redacted] समानाधिकरणाभावप्रतियोगितायाः सामानाधिकरण्यनावनेच्छेदकत्वंतथाचव्यधिकरणध

दुर्वारमितिचेन्न र्मावच्छिन्नाभाववारकसामानाधिकरण्येनेत्युपादानादवतारकंसाध्यसामानाधिकरण्यत्वैंकरण्य [redacted] वृत्तिविशेषाभाववारणानतसामानाधि

यसामानाधिकरण्येनेत्युपादानात्। व्यधिकरणधर्मावच्छिन्नाभावानुपगमपिसत्त्वभावात्। यदपितिनच्चयमात्मात्ज्ञानादित्यादावा

त्मत्वसामान्याभावस्यदेशिकविशेषणतयोभयवृत्तित्वान्नाव्याप्तिरिति। हेतुसमा[illegible]नाधिकरणाउत्यस्यैवैय

र्थ्य। नच्चतेद्धेतोन्यत्वाभावादिवारणपर्यात् अग्निमेणमावभिन्नत्वेनतद्वारणासंभवात्। तद्धेतान्यत्वप्रकारकसप्रमाविशेष्यत्वा

भावस्यैतन्मतेतद्धेदरूपत्वात्। वह्निव्याप्येकेगगनाभावाभावस्यगगनरूपस्यवारणार्थंतत्त्वेत्तयोपिवृत्तिमत्त्वमात्रस्योचितत्वमितिचेन्न। रामः

तद्धेदवृत्तिरूपध्वंसदद्न्यत्वाघटाभावस्यसाध्यव्यापकतावच्छेदकप्रतियोगिताकस्यवह्निमान्धूमादित्यादौवारणार्थत्वात्। नचोक्ताभावस्य २०

कालिकसंबंधेन हेतुसमानाधिकरणतयावकपंवारणं जन्यमात्रस्य कालोपाधितानुपगमात् । न च स्पंदोगतित्वादिसाध्ये कालिकसंबंधेन हेतुसा
मानाधिकरण्यमुक्ताभावस्याक्षतमिति वाच्यं उपाधीनामवच्छेदकतामात्रमिति मतावलंबनात् एतल्लक्षणस्य दूष्यतया एतद्बुद्धारानावश्यकत्वाद्
स्वप्रतियोगिमत्तात्रहविरोधितानियामकसंबंधेन हेतुसामानाधिकरण्यं तु घटत्वं तद्रूपात्मकाभावमादायाव्याप्तेः । केचित्तु जन्यमात्रस्य का
लोपाधितामतेतद्वृत्तिरूपध्वंसवदन्यत्वाद्यभाववारणार्थं हेतुतावच्छेदकसंबंधेन हेत्वधिकरणे दैशिकविशेषणतयावृत्तित्वं विवक्षणीयं ।
तत्तद्योगोलकान्यत्वाभावस्येति ग्रंथश्च तत्तद्योगोलकावृत्तिरूपध्वंसवदन्यत्वाभावपर इति नासंगतिः । अत्र तच्छब्देन तत्तद्योगोलका
न्यत्वप्रकारकप्रमाविशेष्यत्वाभाव एवोक्तः । तत्स्याभावप्रतियोगिकत्वेनातिरिक्तत्वादित्यपव्याख्यानं । तथा सति तद्घटभिन्नघटत्वादिसाध्ये सा
ध्यप्रकारकप्रमाविशेष्यत्वाभावमादायानतिप्रसंगेनाग्रिमग्रंथविरोधात् । न चैवं भावभिन्नत्वं व्यर्थमिति वाच्यं तस्योक्तसंबंधत्वलाभार्थ
त्वात् । कालिकदिकृतविशेषणतातिरिक्तसंबंधेन वृत्तित्वस्य विवक्षितत्वाद्घटाभावभिन्नत्वमावश्यकं । भावभिन्नत्वस्यापि च कालिकदि
6 कृतविशेषणता~~तिरिक्तसंबंधेनवृत्तित्वस्य~~साधारणरूपेणापि विशेषणतायाः संबंधतया तद्घटरूपवृत्तिरूपध्वंसवदन्यत्वाभावादेः । तत्सं
बंधेन हेतुसामानाधिकरण्यतयाऽव्याप्तिर्दुर्वारैवस्यादिति दैशिकपदेन तदतिरिक्तत्वं विवक्षणीयं । एवं विशेषणतानिवेशात् वह्निसंयोगाद्या
त्मकाभावमुदासः स्वरूपसंबंधः । स्तु नोक्तः तस्य तथात्वेन संबंधत्वे मानाभावात् वह्निसंयोगात्मकाभाववारणोपि वह्निसंयोगाधिकरणत्वा
त्मकस्य वह्निसंयोगवत्त्वप्रकारकप्रमाविशेष्यत्वात्मकस्य चाभावस्य वारणात् भावभिन्नत्वप्रवेशापत्तेः । एवं च तद्घटभिन्नघटत्वादि
सत्त्वे तद्घटत्वान्यत्वाभावस्य तद्घटवृत्तित्वके स्वोपतया तद्घटवृत्तित्वं स्वरूपसंबंधेन तद्घटत्वोभयस्से वे तितस्योभयावृत्तित्वादनतिप्रसंग इति

जा-टी-अ-मंजू-

२

अग्रिमदूषणमलग्नकं। तदभावो लकान्यत्वाभावमादायैवातिव्याप्तिवारणात् स्वरूपसंबंधस्य स्वरूपसंबंधनिवेशेपि यत्तु एवं सति
तत्सर्वतनिष्ठतत्संयोगाधिकरणत्वव्यापकत्वात्मकं विषयतात्मकं ना तदभावाभावमादाय वह्निमान्धूमादित्यावव्याप्तिरतः भावभिन्नत्वस्या
दरणीयतया तद्धटभिन्नत्वं घटत्वादित्यादावतिव्याप्तिसंगतिरिति तन्न। तत्पर्वतवृत्तिरूपध्वंसवदन्यत्वाभावादिवारणाय प्रतियोगि
वैयधिकरण्यघटितव्यापकताया एवादरणीयतया तादृशाभावस्य लक्षणघटकत्वादित्याहुः। केचित्तु मास्तु भावभिन्नत्वं। अस्तु स्वरू
पसंबंधेन हेतुसामानाधिकरण्यं [redacted] तथापि तद्व्यक्तित्वं तद्घटत्वानुयोगिकत्वविशिष्टसमवायेन वह्निमत् घटत्वादिकं तत्तद्रूपा
दिकं वेति तद्धटभिन्नं घटत्वादित्यादि ग्रंथो नालग्नकः। अन्यथा वह्निमान्धूमादित्यादौ तत्पर्वतान्यत्वविशिष्टगगनाभावाभावं तादृशवो
च्यत्वाभावं चादायाव्याप्तिरित्याहुः। अस्तु प्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेन हेतुसामानाधिकरण्यं अस्तु च तद्रूपाद्या
त्मकाभाववारणाय भावभिन्नत्वमित्यप्याहुः। हेतुसामानाधिकरण्यं च हेतुतावच्छेदकसंबंधेन हेतुतावच्छेदकावच्छिन्नवत्ताघटितं
ग्राह्यं तेन धूमवति महाकाले महाकालान्यत्वाभावमादाय नाव्याप्तिः न वा तद्धटान्यस्तद्धटान्यत्वविशिष्टसत्त्वादित्यादौ तद्धटवृत्तिरू
पध्वंसवदन्यत्वाभावस्य सत्तासमानाधिकरणत्वेप्यव्याप्तिः न चैवमपि तत्पर्वतनिष्ठरूपध्वंसनिष्ठस्य तदन्यत्वविशिष्टवाच्यत्वाभाव
स्याधिकरणत्मकस्योभयवृत्तित्वमिति वाच्यं तादृशाभावत्वेन हेतुमद्वृत्तित्वोक्तेः। नन्वेवं गोत्वाभावे दैशिकविशेषणतासंबंधेनो
भयवृत्तित्वात् तत्साध्यतावच्छेदकेत्यादिव्यर्थमिति वाच्यं। वह्निमान्धूमादित्यादौ तत्सर्वतान्यत्वप्रकारकप्रमाविशेष्यत्वाभावादिकमा
वभिन्नत्वनिवेशे तु तत्सर्वतवृत्तिरूपप्रागभाववदन्यत्वाभावतत्पर्वतवृत्तिरूपध्वंसवदन्यत्वाभावादिकमादायाव्याप्तेस्तदावश्यक

राम०
२

त्वात् । वह्निसंयोगाद्यात्मकस्येति आदिना तद्रूपाद्यात्मकाभावपरिग्रहः । वह्न्यादिसाध्यके वह्निसंयोगात्मकाभावमादायाव्याप्त्यसंगतिः । असंभ
वस्यैवाव्याप्यत्वात् तत्पाहि । द्रव्यगुणादिरूपे यथायथं तत्तद्धेतुमति तत्तद्विषयतातत्तल्लक्षणसंबंधादिरूपाभावः संभवति । वह्निसंयोगात्म
काभावानुरोधेन साध्यव्यापकतायाः प्रतियोगिवैयधिकरण्यघटितायाः एव निवेशादिति चेन्न । स्वरूपसंबंधेन साध्यवद्वृत्तित्वघटि
तव्यापकतानिवेशेन विषयतादोषत्वेन तदभावस्याव्यापकत्वान्नासंभवः । एवमपि वह्निसंयोगाधिकरणत्वात्मकाभाववारणेऽपि व
ह्निसंयोगात्मकाभावो न वार्यते । उक्तव्याप्तिः । गुणवृत्तिसाध्यकसद्धेतौ लक्षणगमनादित्याशयात् वस्तुतस्तु जातिर्घटत्वत्वादिसाधौ ल
क्षणगमनान्नासंभवः । न तत्रापि जातिरित्याकारकयत्किंचिज्ज्ञानाभावस्य देशिकविशेषणतया वृत्तित्वाभावाद्व्याप्तिरिति वाच्यं ।
विषयतायाश्च स[illegible]नियामकत्वात्तदभावस्य हेतुसमानाधिकरणत्वात् । अत्र वह्निसंयोगात्मकाभावत्वेनाखण्डनात् प्रतियोगिवै
यधिकरण्यघटिते व्यापकतानिवेश्यते ॥ एवं च वह्निसंयोगाधिकरणत्वात्मकाभावस्याप्युपलक्षणात्तथाभावान्यत्वं तदुभयवार
कं न च तथापि वह्निसंयोगध्वंसात्मकाभावमादायाव्याप्तिर्दुर्वारैवेति वाच्यं । तस्य देनभाव प्रागभावध्वंसान्यतमान्यत्वस्य वाच्यत्वा
7 त् । हेतुसामानाधिकरण्यं च तदुभयाभाववारणार्थं । तस्य वृत्ताव्यभाववारणार्थं साध्यव्यापकतावच्छेदकप्रतियोगितानिवे
शः । एवं च तदयोगोलकावृत्त्यभावमादायैव नातिव्याप्तिरित्याहुः तदसत् । एवं च तद्वृत्तिभिन्नघटत्वादित्यादावतिव्याप्त्युल्लंघकता
पत्तेः । तद्वृत्त्यवृत्त्यभावस्य तद्वृत्तित्वव्यक्तिरूपात्मकत्वे च तदयोगोलकावृत्त्यभावमादायैवेत्यादि तस्यापि तदयोगोलकवृत्तिरूपस्वरू
पतायाः दुर्वारत्वात् । केचित्तु भावान्यत्वलक्षणघटकाभावप्रतियोगितायां भाववृत्तित्वस्याभावाद्वृत्तित्वस्य वा लाभार्थं ।

अ॰
गा॰टी॰अ॰मं॰जू॰ तेन वह्निसंयोगध्वंसात्मकाभावव्युदासः। वह्निसंयोगरूपभाववृत्तिप्रतियोगिताया ध्वंसीयाया एकव्यक्तिगतत्वेन साध्यव्यापकतान
३९ वच्छेदकत्वात् नापि स्वरूपसंबंधावच्छिन्नवह्निसंयोगध्वंसाभावघटान्यतराभावमादाय व्याप्तिः। अप्येवं तत्तदयोगोलकान्यत्वाभाव
वारणाद्धूमाद्यभावमादायातिव्याप्तिर्दुर्वारैव न च तत्तदयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभावमादाय नातिव्याप्तिरिति वाच्यं तथा
सति तद्धटभिन्नमित्यादिग्रंथविरोधात् तद्धटभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावमादायैवातिप्रसंगात्। यदि च तस्य प्रतियोगितात द्धटभि
न्नत्वरावोपेयते तस्य स्वप्रकारकप्रमाविशेष्यत्वसंबंधेन तद्धटभेदाभावरूपत्वात्तदा तदयोगोलकान्यत्वप्रकारकप्रमाविशेष्यत्वाभावे
पि तुल्यं। यदि तदयोगोलकभेदविशिष्टप्रमेयत्वाभावमादाय नातिप्रसंगस्तदा तद्धटभिन्नमित्यादेरसाध्यविशिष्टप्रमेयत्वाभावमादान
तिप्रसंगात्तद्ग्रंथासंगतिः। तत्रापि प्रमेयत्वादेः प्रतियोगिताकोटिप्रवेशेऽयोगोलकान्यत्वविशिष्टप्रमेयत्वाभावे तदनिवि[illegible]ष्टमेये
ति चेत् सत्यं यत्रायोगोलके रूपध्वंसः तदयोगोलकवृत्तिरूपध्वंसवदन्यत्वाभावमादायातिप्रसंगात्। यद्धटे कदापि न रूपना
शस्तद्धटवृत्तिरूपध्वंसवदन्यत्वाभावासत्त्वेन तद्धटभिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्याभावरूपतया च तद्धटभिन्नमित्यादा
वतिप्रसंगश्चाभावान्यत्वनिवेशपक्षे प्रतियोगिताविशेषणपक्षे तु तदयोगोलकवृत्तिरूपध्वंसवदन्यत्वप्रकारकप्रमाविशेष्यत्वाभा
वादेरभाववृत्तिप्रतियोगिताकतयाऽतिव्याप्तिरेव अन्यथा तद्धटवृत्तिरूपध्वंसाप्रसिद्ध्या तदन्यत्वप्रकारकप्रमाविशेष्यत्वाभावा
सत्त्वेपि तद्धटान्यत्वप्रकारकप्रमाविशेष्यत्वाभावमादाय नातिप्रसंगापत्तेरित्याहुः तच्चिंत्यं प्रतियोगिवैयधिकरण्यापघटितव्याप रामः
पकतायां निवेशो न तस्य वृत्तीयरूपध्वंसाभावाभाववद्वह्निसंयोगध्वंसात्मकाभावव्युदासात्। [illegible] ३९

उभयवृत्तित्वं च विरुद्धाधिकरणतानिरूपिताधेयताद्वयवत्त्वं। तदयोगोलकान्यत्वाभावस्य तत्तत्क्षणावच्छिन्नाधिकरणताद्वयकत्वा
दतिव्याप्तिरतो विरोधनिवेशः कालिकसंबंधावच्छिन्नाधिकरणतया विरुद्धाधिकरणतांतरमादाय स एव दोषः इत्यतोऽधिकरणताद्वये
ऽपि दैशिकविशेषणतानिवेशः तदधिकरणवृत्तित्वं विरोधः स्वप्रतियोगिवृत्तित्वस्वत्वानानाधिकरण्योभयसंबंधेन भेदविशिष्टत्वं चोभय
वृत्तित्वं तेनोभयत्वस्य प्रत्येकं सत्वेन प्रत्येकमात्रवृत्तेर्नोभयवृत्तित्वापत्तिः। न चैवमपि उभयभेदमादाय अतिव्याप्तिः स्वनिरूपकत्व
स्वसामानाधिकरण्योभयसंबंधेन प्रतियोगितावदन्यत्वेन भेदविशेषणात्। साध्यवत्तदन्योभयवृत्तित्वं तु न तत्केवलान्वयिन्यव्या
प्तेः। तद्घटभिन्नमिति। नन्वत्र कथमतिव्याप्तिः। तद्घटमात्रवृत्तेः तद्घटत्वादतिरिक्तस्य तद्घटोत्पत्तितद्घटभिन्नत्वान्यतराभावस्य
तद्घटे इत्यप्यवृत्तेः सत्वात्। न च गगनभिन्नं द्रव्यत्वादित्यादावतिव्याप्तिः। उक्तरीत्या तत्राभावकरणसंभवादिति वाच्यं। तत्रापि तत्क्षणसं
बंधत्वगगनभिन्नत्वान्यतराभावकरणसंभवादिति चेन्न। तादृशाभावस्य तद्घटोत्पत्त्यभावविशिष्टतद्घटत्वरूपत्वोपगमात्। न चैवं उत्पत्ति
काले घटे तादृशाभावान्यतरप्रसंगः। विशिष्टस्य केवलानतिरेकादिति वाच्यं। विशिष्टसत्ताभावाभावो गुणेऽ इति वदिष्टत्वात् वस्तुतस्तु
उक्ताभावस्तद्घटोत्पत्त्यभाव एव स च साध्यसमानाधिकरण इति न किंचिदेतत्। केचित्तु क्षणिकास्य शब्दस्य प्रामाणिकतया तच्छब्दभि
8 न्नं गुणत्वाद्धिंसादौ आदिपदग्राह्येऽतिव्याप्तिः। तच्छब्दस्य क्षणिकतया तत्र तादृशाभावकरणसंभवात्। न च तच्छब्दोत्पत्तेः पूर्वं उत्तरं वा ज्ञा
नस्य विषयतात तच्छब्दभिन्नत्वान्यतराभावस्य तादृशत्वान्नातिव्याप्तिरिति वाच्यं। ज्ञानासत्वेऽपि विषयतायाः सत्वेऽपि तत्र तस्याव्याप्यवृत्ति
त्वात्तादृशान्यतरस्य केवलान्वयित्वे न तदभावप्रसिद्धिः लातइयाहुः। न तु तद्घटत्वप्रकारकयत्किंचिज्ञानविशेष्यत्वतद्घटभेदान्य

तराभावस्य प्रमाभावदशायां तद्धटमात्रवृत्तेरुभयावृत्तित्वान्नातिव्याप्तिः। न च यद्धटव्यक्तौ तादृशाजन्यप्रमा नोत्पन्ना तद्धटभेदसाध्यकध
र्मस्यमितिवाच्यं। तादृशघटे मानाभावात्। अंततः सामान्यलक्षणया ज्ञानरूपतया घटत्वप्रकारकप्रमाविशेष्यत्वतद्धटभेदान्यतरा
भावसंभवात् तद्धटवृत्तिवायुसंयोगध्वंसवदन्यत्वाभावमादाय नातिप्रसंगाच्च वायुध्वंसोत्तरं तादृशध्वंसस्य तद्धटमात्रवृत्तित्वात्।
वह्निमान्धूमादित्यादौ तत्पर्वतत्वप्रकारकप्रमाविशेष्यत्वतत्पर्वतभिन्नत्वान्यतराभावमादाय व्याप्तेर्विषयतायाः ज्ञानसमानकालीनत्व
नियमानुपगमात्। हेतुमति निरवच्छिन्नवृत्तित्वनिवेशेनापि तद्दोषवारणात्। अपि च तत्तदयोगोलकान्यत्वाभावोपि तत्तदयोगोलकादि
स्वरूपेन भावभिन्न इति। धूमत्वावच्छिन्नाभावमादाय धूमवान्वह्नेरित्यादावेवातिव्याप्तिसंभवात्कुतस्तदुपेक्षा। न चोभयवृत्तित्वं साध्यव
ति हेतुमति च तथा च धूमाभावस्य तादृशोभयावृत्तित्वान्नातिव्याप्तिरिति वाच्यं। तत्पर्वतवृत्तिरूपध्वंसात्मकाभावानां गोत्वाद्यभावा
नां च ~~वृत्तित्वं साध्यवति हेतुमति संतथा च धूमाभा~~ हेतुसमानाधिकरणानां निरुक्तोभयवृत्तित्वात्साध्यव्यापकतावच्छेदकेसादि
दलवैयर्थ्यात् तस्मिन् सत्यस्येप्रतियोग्यवृत्तित्वे इति ग्रंथानवतारकत्वप्रसंगात्। तत्तदयोगोलकीयरूपप्रागभाववदन्यत्वाभावस्य
भावभिन्नस्योभयावृत्तित्वं तु नोपेक्षाबीजं। तथा सति तद्धटवृत्तिरूपप्रागभाववदन्यत्वाभावमादायातिव्याप्त्युद्धारसंभवात् तद्धटभि
न्नमित्यादेरलग्नकतापत्तेः। प्रागभावानंगीकारेण तत्संगमने चोक्तोपेक्षाबीजमसंगतमेवेति चेन्न। धूमवान्वह्नेरित्यादौ घटाभाव
भेदाभावस्य भावभिन्नस्य निरुक्तप्रतियोगिताकस्य कालिकसंबंधेन हेतुमद्वृत्तेर्दैशिकविशेषणतयोभयावृत्तित्वादेवानतिप्रसं ग्राम०
गेन तदुपेक्षणात्। न चैवं व्यतिरेकिमात्रेऽव्याप्तिः। तत्रोप्यतिप्रसंगस्य दुष्टत्वात्।। वस्तुतस्तु। अभावाधिकरणकाभावस्याधिकर ४०

५

एतद्रूपतया नाव्याप्तेः। धूमवान् वह्नेरित्यादौ तु तत्तद्योगोलकवृत्तिरूपध्वंसवदन्यत्वाभावमादाय अतिव्याप्तिनिरासासंभवात्। तत्तद्रूपेक्षेति।
न चैवं तद्घटभिन्नं मेयत्वादित्यादेरसंग्रातिः। तद्घटवृत्तिरूपध्वंसवदन्यत्वाभावमादायातिव्याप्तिनिरासासंभवादिति वाच्यम्। यद्घटे
कदापि न रूपनाशस्तस्यैव विपक्षत्वात्। यत्र योगोलके रूपध्वंसः तमादायैव धूमवान् वह्नेरित्यादावतिव्याप्तिनिरासात्। न चैवमपि
तद्घटनिष्ठक्रियाध्वंसवदन्यत्वाभावमादायैव नातिव्याप्तिः अथोत्पन्नविनष्टघट एव विपक्षः। न च तस्य नोक्तिसंभवः आरंभकसं
योगजनकैककपालवृत्तिक्रियोत्पत्तितृतीयक्षणे कपालान्तरेणारम्भजनकविभागजनकक्रियोत्पादेन द्विकपालस्य यत्र कपाल
योरारंभकसंयोगः ततस्तृतीयकपालक्रिया ततस्तृतीयक्षणे पूर्वारंभकसंयोगनाशाजनकविभागजनकपूर्वसंयुक्तैककपालक्रिया
तत्र द्वितीयारंभकसंयोगेन जनितस्य त्रिकपालस्य च तत्क्रियाधीनपूर्वारंभकसंयोगनाशेन नाशात् तत्संभवादिति चेन्न। ताद
शघटे मानाभावात्। असमवायिकारणस्य कार्यसहभावापेक्षणादिति चेन्न। तृतीयक्षणवृत्तिध्वंसप्रतियोगिघटस्यैव विप
क्षत्वात्। प्रागभावोपगमेऽपि तद्रूपभिन्नं गुणत्वादित्यादावतिव्याप्तिर्बोध्या॥ न च तद्घटत्वादिसमनियतत्वेन तद्रूपत्वात्। [redacted]
यत्तु तयोरतिरिक्तत्वे रूपरान्। घटत्वादित्यादावव्याप्तिः रूपध्वंसात्मकाभावस्य भावभिन्नस्य यावदन्तर्गतस्याभयवृत्तित्वाभा
वादिति तत्तुच्छं तस्य प्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावात्। नन्वत्राप्यतिव्याप्ति
१ वारणाय साध्यवद्वृत्तिभावान्यत्वं वाच्यम्। अत्र केचित्। वह्निमान् धूमादित्यादौ तथापि तत्पूर्वतात्वविशिष्टवाच्यत्वाभावस्य
तथाविधस्याभयावृत्तित्वादव्याप्तिरिति तत्तुच्छं। तस्य तत्सर्वत्वादिरूपत्वात्। एवं घटेतरत्वे भेदादिसाध्यके साध्याभावस्योक्त

न्या·टी·प्र·मंजू· स्या· ।साघटत्वात्मकत्वमतेतस्यसाध्यवद्वृत्तिभावान्मत्वासंभवेनातिव्याप्तेः।तद्रूपभिन्नंगुणत्वादिसाध्यादौसाध्याभावस्यतच्छक्तित्वस्यतद्रूपस्वरूपत
४१ यासाध्यवद्वृत्तिभावत्वादतिव्याप्तेश्चापत्तुःसाध्यवद्वृत्तिभावरूपाभावप्रतियोगितानवच्छेदकसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वंभा
वभिन्नत्वशब्दलभ्यमितितदप्यनेनपरास्तं।एतेनसाध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वमपिहेयमेवकेचित्तुसाध्यवद्वृत्तिस
भावीयसमानाधिकरणधर्मावच्छिन्नप्रतियोगितान्यत्वंसाध्यव्यापकतावच्छेदकत्वंतत्सर्वतान्यत्वविशिष्टवाच्यत्वाभावव्युदासःवह्निसं
योगाद्यात्मकाभाववारणायभावभिन्नत्वनिवेशःधूमवान्वह्नेरित्यादौतदयोगोल्लकान्यत्वाभावस्तदयोगोल्लकान्यत्वविशिष्टवाच्य
त्वाभावःतद्घटभिन्नंघटत्वात्तद्रूपभिन्नंगुणत्वादित्यादौसाध्याभावःसाध्यविशिष्टाकाशाभावाभावोवाऽतिव्याप्तिवारकइत्याहुः।तन्ना
दीति।नन्वत्रघटान्यत्वाभावमादायवारणसंभवात्सर्वत्रधनिवेशनमसंगतं।नचभावभिन्नत्वाभावान्नत्वस्यघटकत्वमितिवाच्यं।
घटत्वादिनाताद्दशाभावतयात्वात्।नचसमनियताभावैक्यमतेऽदोषइतिवाच्यं।तत्रक्षेप्यायाःप्रतियोगिताइत्यस्यावश्यकत्वा
दितिचेन्न।वस्तुतइत्यादिकल्पेऽतिव्याप्तेर्दुर्वारत्वात्।यद्वा।घटत्वादिनाघटान्यत्वाभावप्रतियोगितायाःसाध्यव्यापकतावच्छेदकत्वमाऽ
तिव्याप्तिसंगतिः।अन्यभानभावभिन्नत्वप्रयोजनासंगतेः।वस्तुतःस्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेनस्वाध्यवद्वृ
त्तित्वं।ग्रंथकारस्याभिप्रेतअतएवह्नितीयत्वान्तक्षणेकपिसंयोगाभाववस्यव्यापकतानवच्छेदकत्वमुक्तं।हेत्विति(आद्येघटाभावभि)
(न्नत्वे)यत्वादित्यादावतिव्याप्तेरंत्ययोर्वह्निमान्धूमादित्यादौतत्पर्वतान्यत्वविशिष्टवाच्यत्वाद्यभावंघटाभावंच)जन्यमात्रस्यका राम०
लोपाधितामतेतद्वृत्तिरूपध्वंसवदन्यत्वाभावस्यस्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेनोभयावृत्तित्वाद्वह्निमान्धू ४१

माद्विसाक्षे दोषइत्यतः स्वप्रतियोगिमत्ताग्रहविरोधिता नियामकसंबंधेन हेतुसामानाधिकरण्यं बोध्यं। प्रतियोगिताच साध्यव्यापकताव
च्छेदिका प्रवेशनीया। तेन उक्ताभावस्य यः कालिकसंबंधेनाभावः तस्यापि प्रतियोगितया कालिकसंबंधसंग्रहेपिन क्षतिः। एवं द्वि
तीयास्वप्रतियोगिताऽवच्छेदकरूपेण निवेशनीया। अन्यथा तदयोगोलकान्यत्वाभावादेः कालिसंबंधेन योभावस्तस्यापि प्रतियोगि
तया कालिकसंबंधमादाय तिव्याप्तेः। अत्र भावभिन्नत्वं न देयं। वह्निसंयोगाद्यात्मकाभावस्य तादृशसमवायादिनोभयवृत्तित्वेनाव्या
प्तिविरहादिति न सत्। तत्सर्वतीयरूपाद्यात्मकाभावस्य तादृशस्यप्रतियोगिमत्ताग्रहविरोधितानियामकेन समवायेन हेतुमद्वृत्तेस्तादृ
शेन समवायेनोभयवृत्तित्वाद्व्याप्तेर्भावभिन्नत्वस्याववृत्तकत्वात्। वस्तुतस्तत्तद्रूपाद्यात्मकाभाववारणार्थं हेत्वधिकरणे दैशिकवि
शेषणतयावृत्तित्वं तत्तुभावभिन्नत्वं गौरवात्तद्घटभिन्नघटत्वादिसाध्यकेतद्घटान्यत्वाभावस्यतत्। व्यक्तित्वात्मनो दैशिकविशेषणतया
हेतुमद्वृत्तेरुभयावृत्तित्वान्नातिव्याप्तिः। यत्वेनमपिस्वरूपवान् घटत्वादित्याद्विस्पसाध्यसाध्यसामान्यकाभावस्योभयावृत्तित्वादव्याप्तिरितितन्न तद
भावस्यप्रतियोगिवैयधिकरण्याघटितव्यापकतावच्छेदकत्वाभावात् प्रतियोगिवैयधिकरणघटितव्या[illegible]पकताप
क्षेतु वह्निमान् धूमात् शब्दवान् गगनत्वादित्याद्यौ वह्निसंयोगाधिकरणत्वे विशेषणाद्वाधिकरणत्वादिलक्षणाभावस्योभयावृत्ति
10 त्वादव्याप्तिरतः हेतुसमानाधिकरणाभावप्रतियोगितायां भाववृत्तित्वं देयं तद्घटभेदादि साध्यके साध्यप्रकारकप्रमाविशेष्यत्वा
भावमादायैव नातिप्रसंगः भावभिन्नं तु न उक्तरीत्या तत्रैवातिव्याप्तेः। आद्यमिकपंक्तिमारभ्य तृतीयपंक्तिपर्यंत अत्र बोध्यं। ननु धूमवनि
ष्ठव्याप्तित्वे न सामान्यलक्षणयासकलव्याप्तिमानसंभवात् किमर्थमनुगमरूपैव दिसाव्याप्तिरितिपरामर्शग्रंथस्य सिद्धांतलक्षणपरत्वात्।

का·री·ग·मंजू[म] इत्यत प्रयोजनांतरमाह। नवेति। अप्रसिद्धिरिति। न च समवायित्वावच्छिन्नवाच्यत्वादिनिष्ठप्रतियोगितानां साध्यव्यापकतानवच्छेदकत्वेपि
४२ विरुद्धघटत्वपटत्वाभ्यां प्रमेयसामान्याभावप्रतियोगिता यास्तथात्वमेवेति नाप्रसिद्धिरिति वाच्यं। अस्य ग्रंथस्येदृशरीत्यातिव्याप्तौ तात्प
र्यात्। अथवा सामान्यरूपेण विशेषाभावस्वीकारे तत्प्रमेयाभावप्रतियोगित्वेन घटाभावादेः प्रमेयनिष्ठप्रतियोगित्वेन सामान्यध
र्मेण गगनत्वद्वित्वोभयाभावादेर्वा साध्यनिष्ठत्वाद्यपाश्रुतमेव साधीयः। वस्तुतस्तु। उक्तप्रमेयाभावप्रतियोगिता या सामान्याभावीया
न्यतया प्रसक्ताश्रयभिन्नतया तत्प्रतियोगित्वेन न तत्प्रमेयाभाव एव साध्यवद्वृत्तिरित्येव सारं बोध्यं। ननु प्रतियोगिवैयधिकरण्यं न प्रतियो
ग्यनधिकरणे प्रतियोगितावच्छेदकावच्छिन्नयत्किंचिदनधिकरणे वा वृत्तित्वं। उक्तदोषावारणात्। नापि प्रतियोग्यधिकरणावृत्तित्वं। महा
नसीयवह्निसंयोगाभावस्यातथात्वेन लक्षणाघटकतयाऽव्याप्तेः। नापि प्रतियोगितावच्छेदकावच्छिन्नसामान्यानधिकरणत्वं। साध्यवत
घटाभावादिमतः तादृशसामान्यावच्छिन्नानधिकरणत्वाप्रसिद्धेः पूर्वलक्षणावृत्तित्वविशिष्टस्वाभावादिमत्वात्। न च स्वप्रतियोगिता
-वच्छेदकयत्किंचिदवच्छिन्नानधिकरणत्वं कपिसंयोगाभावादिसाध्यके यत्किंचित्प्रतियोगितावच्छेदकीभूत गुणसामान्याभावत्वाव
च्छिन्नानधिकरणत्वस्य साध्यवति सत्वात् कपिसंयोगरूपाभावस्य तन्निष्ठाभावप्रतियोगितावच्छेदक प्रतियोगिताकतया स्वविशि
ष्टत्वानिवेशात्लाघवात्। इति वाच्यं। वाच्यत्वाभावप्रतियोगित्वेन घटाभावस्य घटत्वेन पटाभावाभिन्नतया घटत्वमादाय तदनैक्य मतेपि
गुणवृत्तित्वविशिष्टस्वाभावत्वमादाय प्रतियोगिवैयधिकरण्यप्रसंगादित्यत आह। स्वावच्छिन्नानधिकरणेति। स्वप्रतियोगि ग्र·म·
तावच्छेदकं स्वावच्छिन्नानधिकरणवृत्तित्वस्याभाव विशेषणत्वे हि ध्यावृत्तित्वप्रवेशो घटत्वेनवह्न्यभावप्रतियोगित्वेन घटाघभा ४२

ववारणापत्तिश्चातः तदुपेक्षासंबंधसामान्येन स्वावच्छिन्नानधिकरणत्वनिवेशे कालपरिमाणादिसाध्यकेतादृशसाध्याधिकरणप्रसि
द्धिः। यत्किंचित्संबंधेन तन्निवेशे च प्रतियोगितावच्छेदमात्रस्यैव यत्किंचित्संबंधेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियो
गितावच्छेदकत्वमिष्यतः तत्संबंधेनेति। तत्संबंधेन प्रतियोगितातु न विशेषिता। प्रतियोगितावच्छेदकसंबंधेन स्वावच्छिन्नानधिकरण
त्वनिवेशे गौरवात्। अथ स्वावच्छिन्नानधिकरणसाध्यवत्कं यद्यत्स्वं तदन्यत्वनिवेशेनैवोपपत्तेः स्वपेक्ष्य प्रतियोगित्वा
दे गुरुतया ऽभावप्रतियोगितानवच्छेदकतया घटाद्यभावमादायासंभव इति गदाधरे आधेयतावदभावप्रतियोगितावच्छेदकम
धिकं। स त्यास्वावच्छिन्नाधिकरणसामान्यभेद इत्यस्य स्वावच्छिन्नाधिकरणत्वेतरानवच्छिन्नस्वा वच्छिन्नाधिकरणनिष्ठप्रतियोगिताक
भेदो ऽर्थः वह्न्यादिनिष्ठप्रतियोगितावच्छिन्नाधिकरणे स्यादित्यं पदर्शितदोषानुद्धारात्। तादृशोभयभेदीयप्रतियोगितायाः तादृशे
तरावच्छिन्नघटोभयादिभिन्नत्वात् नापि स्वावच्छिन्नाधिकरणत्वपर्याप्तप्रतियोगितावच्छेदकताकभेदः पर्याप्तिस्वीकारापत्तेः अ
तः स्वावच्छिन्नाधिकरणं न भवतीति प्रतीतिविषयाखण्डभेदो वाच्यः तथा चोक्तदलं नाधिकं। यद्वा। स्वावच्छिन्नाधिकरणत्वावच्छिन्न
प्रतियोगितासंबंधेन स्वावच्छिन्नाधिकरणवान् भेदः सामान्यभेदः। स्वावच्छिन्नाधिकरणवत्तोपादानात् स्वावच्छिन्नाधिकरणा
निष्ठायाः आश्रयतासंसर्गेणावच्छेदकत्वस्यावच्छेदकत्वमर्थस्तदात्वेदेयर्थ्यं स्यात् तत्तदेव तु न किंतु साध्यवन्निष्ठाभावप्रतियोगितावच्छेदके
त्यस्य साध्यवन्निष्ठभेदप्रतियोगितावच्छेदकतावच्छेदकेत्यर्थः अत्यंताभावप्रतियोगितावच्छेदका नाप्रायशो भेदप्रतियोगितावच्छे
दकत्वावच्छेदकत्वात्। स्वावच्छिन्नानधिकरणे यस्य तादृशभेदप्रतियोगितासंबंधावच्छिन्नप्रकारतावच्छेदकेत्यर्थः एवं च साध्यवन्नि

अ०
ना-री-अ-मंजु ष्टभेदप्रतियोगितायाअवच्छेदकतावच्छेदकत्वे सतितत्संबंधावच्छिन्नप्रकारतावच्छेदकतावच्छेदकेस्यथात्स्वावच्छिन्नाधिकरणत्वेनघ
४२ टभेदघटत्वेनस्वावच्छिन्नाधिकरणभेदयोर्निरासः। यद्वा। स्वाधेयप्रतियोगितावच्छेदकत्वाभिन्नस्वनिष्ठभेदप्रतियोगितावच्छेदक
तावच्छेदकत्वोभयसंबंधेनसाध्यवद्विशिष्टत्वमर्थः स्वाभिन्नस्वाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदस्यस्वाधिकरणसामा
न्यभेदरूपत्वात् तत्रच पूर्वनिष्ठव्यापकतावच्छेदकत्वस्य न हेयत्वे साशयेनेहा तद्धेयत्वेतु वस्तुतइतिकल्पांतरमिति। केचित्तु।
स्वविशिष्टोयोयइत्येव विवक्षितं। वैशिष्ट्यंच स्वावच्छिन्नाधिकरणसामान्याभिन्नसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसंबं
धेनेत्याहुः तन्नसामान्यतोऽनधिकरणत्वस्याप्रसिद्धत्वात्स्वाश्रयवत्वसंबंधावच्छिन्नस्वनिष्ठावच्छेदकताकभेदवत्वसंबंधेनस्ववि
शिष्टस्यसाध्यवतः संसर्गघटकत्वेतदंशाधिक्यंदुर्वारंस्वाश्रयवत्वसंबंधेनसाध्यवन्निष्ठभेदप्रतियोगितावच्छेदकत्वोक्तिसंभवादि
ति। अत्र योयइत्युक्तावपिघटत्वादिकमपेक्ष्यप्रतियोगित्वादेर्गुरुतयाऽभावप्रतियोगितानवच्छेदकतयाघटाद्यभावमादायासं
भवइतिगदाधरोक्तं दूषणमसत्। प्रतियोगित्वमखंडोपाधिरितिघटत्वापेक्षयागौरवात्।। किंचित् प्रतियोगित्वंतवच्छेदकास
कं किंचिलतिरिक्तमित्युभयविधमप्यवच्छेदकमितिवस्तुगतिः योयइति। प्रतियोगिताश्चविशि[illegible]ष्टोपादेयइत्यवच्छेदकत्वनि
रुक्तिरीत्यापरिचायकस्यापिवेशः एकसामान्यभेदनिवेशार्थंविदां। स्वरूपसंबंधावच्छिन्नावच्छेदकत्वनिवेशात्। तत्संबंधेने
ति। तत्संबंधप्रतियोगितावच्छेदकसंबंधयोरग्रे एकीकरणाद्न्यसंबंधावच्छिन्नद्रव्यत्वाद्यभावत्यागः। नन्वत्रनोसंभवः। असं राम०
योगेनद्रव्यत्वाभावस्यघटत्वेनवह्न्यभावाभिन्नतयावस्यात्मकप्रतियोगिसमानाधिकरणत्वात्। नन्वेवमपिसत्तावान्जाते ४२

रित्यादावव्याप्तिः। संयोगेन द्रव्यत्वाभावस्य संयोगादेरप्युक्तरीत्यालभ्याव्यापकतया व्यापकताघटकीभूतसंयोगसंबंधाव
च्छिन्नतद्भावस्य चोक्ताभावरूपत्वेपि हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्याभावादिति वाच्यं। स्वप्रतियोगितावच्छे
दकसंबंधेन प्रतियोगिसामानाधिकरण्यवाच्यतयोक्ताभावस्य घटत्वे नसत्ताभावाभिन्नतया तादृशसमवायेन हेत्वधिकरण
वच्छेदेन प्रतियोगिसामानाधिकरण्यसंभवादिति चेन्न। समनियताभावैक्ये नैक्येपि चलक्षणद्वयस्योक्तत्वात्तदनैक्यएवासंभव
स्योक्तत्वात्। धूमाद्यभावस्य धूमवद्वृत्तित्वविशिष्टद्रव्यत्वाद्यभावात्मकतया प्रतियोगितावच्छेदकीभूतसमवायेन ईत्वसामाना व्य
धिकरण्यादेतिव्याप्तेर्वारणाय व्यापकताघटकीभूतप्रतियोगितावच्छेदकसंबंधेन प्रतियोगिसामानाधिकरण्यस्यवाच्यतयासत्ता
वान्जातेरित्यादेस्तथाविधसंयोगमादायोक्तरीत्याऽव्याप्तेर्दुर्वारत्वाच्च। वस्तुतस्तु। अत्राहुरित्यादिवक्ष्यमाणकल्पद्वयमभिप्रेत्यैवाय
मसंभव इति। तादृशाधेयतानवच्छेदकत्वादिति। ननु तेन संबंधेनुवृत्तिमन्निष्ठत्वमेवास्त्विति चेदत्राहुः। स्वस्मिन्व्यासज्यवृत्तिधर्मा
वच्छिन्नानुयोगिताकस्वभेदोपगमे घटनिष्ठप्रतियोगित्वादेरपि स्वघटितगगनादिसमुदायत्वावच्छेदेन स्वभेदसंभवाद्व्यापकतावच्छेद
कत्वापत्तिरतोत्र द्वितीये चलक्षणेऽसंभववारणाय तदावश्यकं। नच तन्निवेशेपि तद्दोषो दुर्वार इति वाच्यं। तत्संबंधावच्छिन्नाधेय
तावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छेदेन तद्भेदनिवेशात्। आधेयतायाः पर्याप्त्यभावेन तत्पर्याप्त्यवच्छेदकनिवेशासंभवः। स्वावच्छिन्ने
ति। प्रागुक्तार्थ्यावे। चित्तु। स्वावच्छिन्नाधिकरणत्वपर्याप्तप्रतियोगितावच्छेदकताकभेदकूटवत्त्वमर्थः। कूटांतर्गतस्यतादृशावन्हि
मद्भेदस्यास्यासत्वान्न दोषः। नन्वेवं स्वावच्छिन्नाधिकरणप्रतियोगिताकभेदकूटवत्त्वमेव निवेश्यं। प्रदर्शितोभयभेदादेः साध्यवति सत्वेपि स्वा

स्व-
वच्छिन्नवाच्यत्वाधिकरणतत्तद्व्यक्तिभेदकूटासत्त्वेनादोषादिति चेन्न। घटादिनिष्ठप्रतियोगितावदधिकरणतत्तद्व्यक्तिभेदकूटांतर्गतस्य घटवद्वह्नि
मदन्यतरादिभेदस्य घटवत्त्ववह्निमत्त्वान्यतरावच्छिन्नभेदस्य च वह्न्यादिमत्यसत्त्वेन तादृशाधर्मोप्रसिद्ध्यापत्तेः। अस्माकं त्वधिकरणत्वादीनां स्व
रूपतोऽन्यथावाप्तानेतु प्रतियोगितावच्छेदकतापर्याप्तिः प्रवेशान्न दोषः। इदं वाच्यं ज्ञेयत्वादित्यादौ स्वावच्छिन्नवाच्यत्वाधिकरणत्वाव
च्छिन्नभेदस्यालीकत्वेपि स्वावच्छिन्नवाच्यत्वाधिकरणत्वेन घटादिभेदकूटस्य साध्यवत्यसत्त्वाल्लक्षणसमन्वयः। इत्याहुः। तत्तुच्छतरं दो
षावारकभेदनिवेशवैयर्थ्यात्। यत्तु स्वावच्छिन्नाधिकरणत्वपर्याप्त्यवच्छेदकताकतद्व्यक्तिपर्याप्तप्रतियोगिताकभेदवत्त्वं तदर्थः। पटत्वस्या
वच्छिन्नवाच्यत्वाधिकरणत्वोभयाभिन्नभेदवारणाय प्रथमपर्याप्तिनिवेशः। तादृशाधिकरणत्वेन तादृशाधिकरणगगनोभय
भेदवारणाय द्वितीयपर्याप्तिनिवेश इति। तन्न। प्रतियोगिताया व्यासज्यवृत्तित्वानुपगमात्। अन्यथा भूतत्वमूर्तत्वोभयसाध्यकेतिव्या
प्यभावे न साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावोपेक्षायाः निर्वीजत्वापत्तेः। व्यधिकरणधर्मावच्छिन्नप्रतियोगिताया
एव व्यासज्यवृत्तित्वोपगमेपि मूर्तत्वत्वेन भूतत्वमूर्तत्वोभयाभावमादायातिप्रसंगवारणसंभवाच्च। यदपि स्वावच्छिन्नानधिकरणा
वृत्तिस्वावच्छिन्नाधिकरणत्वावच्छिन्नप्रतियोगिताकभेदवत्त्वमर्थ इति तदपि न स्वावच्छिन्नवस्त्वधिकरणत्वेन व्यंजनविशेषाधिकरण
भेदमादायाव्याप्तेः। नन्वेवं जातिसामान्याभावादिनिष्ठप्रतियोगितावारणेऽभावा इत्यस्य वैयर्थ्यप्रसंग इत्यत्रेष्टापत्तिमाह। अन्वेति। अथा
त्र संसर्गीयप्रतियोगितायाः साध्यव्यापकतावच्छेदकतया तत्प्रतियोगिताकस्य हेतुसमानाधिकरणस्य संसर्गस्य यावदंतर्गतस्य प्रतियोगि राम॰
समानाधिकरणस्य निवेशनीयतया गौरवं अभावनिवेशे तु प्रतियोगितायामभावनिरूपितत्वलाभेन संसर्गप्रतियोगिताया अतथात्वे ४४

ननसंसर्गानिवेशप्रसंगइतिलाघवसंपादकतयासार्थक्यसंभवात्स्वरूपकथनेसंदर्भविरुद्धमितिचेन्न। संसर्गाभावप्रतियोगित्वयोरेकजाती
यत्वाभावेनविशिष्टाभावीयंप्रतियोगित्वनिवेशस्यसूचकत्वेपिअभावानिवेशात्तत्संग्रहः। इदंचात्रालोचनीयंतादृशप्रतियोगितावच्छे
दकोयोयइत्यत्रसकलधर्मत्वाभावयोर्यइत्युक्तौ। तत्रतादृशप्रतियोगितावच्छेदकास्यावच्छिन्नानधिकरणसाध्यवत्वाभावायायाप्रतियो
गिताइत्येवपरिचायकमुचितं। अन्यविधधर्मभेदनिवेशस्याव्यावर्तकत्वात्। एवंचेश्वरज्ञानेनित्यविषयकत्वादिसाध्येविषयितासंबं
धेनसाध्यव्यापकत्वमेवाप्रसिद्धं। ईश्वरज्ञानान्यत्वविशिष्टघटाद्यभावप्रतियोगित्वावच्छिन्नाभावस्यसाध्यवत्त्वसंभवादिति। अग्रेस्यावच्छि
न्नानधिकरणत्वपर्यंतनिवेशोप्यर्थः। एवंनित्यानांदिक्कृतविशेषणताप्रतिक्षेपः। प्रकृतानुपयुक्तः। मनस्त्ववत्समीमाणत्वादिसाध्येमन
स्त्वाधिकरणेदिक्कृतविशेषणतासंबंधेनसर्वस्यापिवृत्तिमतः सत्त्वात्तेनरूपेणव्यापकत्वासंभवादिति। अत्रव्यापकतायाःप्रतियोगिवै
यधिकरणपघटितत्वेविनापिव्यधिकरणधर्मावच्छिन्नाभावंजन्यज्ञानविषयत्वाभावमादायैवलक्षणसंगतिर्वक्ष्यते। इतिप्रतियोगि
अवृत्तिश्चेतिग्रंथोनावतरेदित्यतआह। वस्तुतस्त्विति। स्वरूपेति। कालिकान्यसंबंधेनेतितुनोक्तं। एकज्ञानविषयत्वादिसंबंधावारणा
त्। वृत्तिमत्वनिवेशेचगौरवात्। इष्टंचस्वरूपसंबंधेनसाध्यवन्निष्ठत्वनिवेशोचाभावभिन्नाइति। एतन्मतेमन्योन्यत्वाभावल्लिखनघ
टत्वेनमनोन्यत्वाभावपरंघटादिवृत्तित्वविशिष्टमनोन्यत्वाभावपरंवा। ननुतथापिजातिरूपाभावस्यसाध्यवन्निरूपितस्वरूपसंबंधा
13 वच्छिन्नवृत्तित्वविरहेणतेनसंबंधेनसाध्यवन्निष्ठाभावप्रतियोगितायाःसामानाधिकरण्येनानवच्छेदकीभूतघटत्वावच्छिन्नजातिसा

प्र

 मान्याभावनिष्ठैवहृत्यभावाभिन्नत्वात्+ प्रतियोगिताकस्य भावभिन्नस्य हेत्वधिकरणे पर्वतावच्छेदेन व्यापकताघटकदैशिकविशेषणता
 संबंधेनात्यथात्वादसंभवः। न च तस्य घटत्वेन+ न दोषः। समनियताभावे कपानंगीकारात्। अन्यथा तद्घटभिन्नघटत्वादिसादा
वतिव्याप्तेः। तद्घटभेदाभावस्य तद्घटत्वरूपतया भावत्वेन घटत्वादिना तद्घटभेदाभावादेर्घटत्वेन वाच्यत्वाभावाद्यभिन्नतया हे
त्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यात्। यावत्प्रतियोगितानिवेशे वासंभवात्॥ न च भावभिन्नत्वभावप्रतियोगिकत्व
मितिनोक्तदोषः। यदि च पर्वतावृत्तित्वावच्छिन्नाभावं पर्वतत्वस्वरूपमादाया व्याप्तिस्तदाभावमात्रप्रतियोगिकत्वं विवक्षितं मितिवाच्यं।
तथापि समनियताभावे कपसर्वेषांव्यधिकरणधर्मावच्छिन्नाभावानां अभावप्रतियोगितात् तदनैक्येपि पर्वतावृत्तिभावाभावं पर्वता
वृत्तिजातित्वावच्छिन्नाभावं वा पर्वतत्वस्वरूपमादायाव्याप्तेः। पर्वतावृत्तिभावादेरप्रतियोगित्वात्। यत्तु भावभिन्नत्वशब्देन भावप्रति
योगिको भावत्वावच्छिन्नप्रतियोगिको वा भेदो विवक्षितस्तदा जातिस्वरूपाभावेष्वाभावाभावोभयभेदसत्वेन कथं वारणमित्याशंक्य हेतुस
मानाधिकरणभावप्रतियोगितायां समभावावृत्तित्वं विवक्षितं मनोन्यत्वाभाव भावत्वेनैव नं च तत्प्रकारकप्रमाविशेष्यत्वाभावपरामि
ति मनोन्यत्वाधिकरणत्वाभावपरं वा। एतेन मनोन्यत्वाभावधारणं प्रतियोगिवैयधिकरण्यकल्पएवेत्यनादेयं प्रतियोगिवैयधि
करण्याघटितेतितदवतारणासंगतिप्रसंगादितितदेतेन परास्तमिति चेन्न। साध्यवद्धृत्तित्वविशिष्टभावस्वरूपाभावप्रतियोगिप्र
योगिकान्यत्वस्य भावभिन्नत्वशब्दार्थत्वात्। घटत्वेन जात्यभावाभावस्य साध्यवद्धृत्तित्वे जातिरूपोभावस्तत्प्रतियोगिप्रतियोगिकत्वे

नमुदासः। एवं पर्वतत्वस्याभावादेरपि घटभिन्नमेयत्वादिसाध्यके अतिवारणाय साध्यवद्वृत्तित्वं भावविशेषणं। अन्यथा घटभेदाभावस्य घ
टत्वरूपभावस्य लक्षणघटकत्वापत्तेः। न च घटत्वेन वह्न्यभावघटत्वेन वह्न्यभावाभावाभिन्नत्वेन साध्यवद्वृत्तिवह्निरूपभावप्रतियो
गिप्रतियोगिकतयाऽसंभवो दुर्वार इति वाच्यं। समनियताभावानां भेदात्। तदैक्ये तु साध्यवद्वृत्त्यवृत्तिप्रतियोगिताकत्वं वा तद्
इदं तु चिंत्यते र्थः॥ एवं सति कपिसंयोगाभावे साध्ये साध्याभावस्य निरुक्तभावभिन्नत्वेन स्वविशिष्टपदस्यावृत्तिसंभवात् सत्तावान् द्रव्यत्वा
दित्यादिसद्धेत्वंतरे तत्रातिप्रसंगस्यासंगतेः। केचित्तु घटत्वेन जातिसामान्याभावाभावघटत्वेन वह्न्यभावादेरभिन्नतया नाव्याप्तिः।
परंतु घटभिन्नमेयत्वादिसाध्यके घटत्वादिरूपसाध्याभावसंग्रहाय साध्यवद्वृत्तिभावाभावान्यत्वं वाच्यमित्याहुः। अत्रापि न कपिसंयोगाभाव
साध्यके स्वविशिष्टत्वस्यावृत्तिः। कपिसंयोगाभावस्य साध्यवद्वृत्तिभावान्यत्वाभावादिति नूदेश्यं भावान्यत्वं नात्र प्रक्षेपितं तन्न्याकत्वसं
भवात्। केचित्तु दर्शितसमनियताभावैक्यपक्षे दोषवारणाय साध्यव्यापकतावच्छेदकप्रतियोगितायां साध्यवद्वृत्तिभावप्रतियो
गितानवच्छेदकप्रतियोगिताकत्वं तादृशाभावप्रतियोग्यवृत्तित्वं वा भावान्यत्वपदेन विवक्षितं। न च तद्घटभिन्नघटत्वादिसाध्ये विशि
ष्टस्य शुद्धादनतिरिक्ततया तद्घटत्वाद्यात्मनोऽभावस्य साध्यवद्वृत्तितयातिव्याप्तिरिति वाच्यं। तद्व्यक्तित्वरूपाभावस्य हेत्वधि
करणावच्छेदेन तद्व्यक्तिभेदरूपप्रतियोग्यसमानाधिकरणत्वात्। अत्र तद्व्यक्तित्वरूपाभावस्य कालिकसंबंधेन साध्यवद्वृत्ति
तया प्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेन साध्यवद्वृत्तित्वं निवेश्यं। ततश्च कालिकविशेषणतासंबंधावच्छिन्नतद्व्यक्तित्वा
14 भावस्य यो विशेषणतासंबंधावच्छिन्नाभावस्तस्य तद्व्यक्तित्वरूपतया कालिकसंबंधोपि प्रतियोगिमत्ताग्रहविरोधितानियामक

अ·
तिरस्यतः साध्यवन्निरूपितनिरवच्छिन्नवृत्तित्वं निवेश्यं। एतदभिप्रेत्यैव कपिसंयोगाभावसाध्यके स्वविशिष्टत्वव्याप्तिर्दर्शिता। प्रतियोगिम
त्वेतत्रसाध्यव्यापकतावच्छेदकप्रतियोगित्वोपादाने नतिरवच्छिन्नत्वाप्रवेशान्न कपिसंयोगाभावसाध्यके स्वविशिष्टत्वव्याप्तिरतः स्वच्छत्वात॥
नुसरणमित्याहुः। केचित्तु घटत्वेन जात्यभावाभावस्य समनियताभाववैलक्षण्यात्वोक्तरीत्यातव्याप्तिः। घटभिन्नत्वप्रकारकप्रमाविशेष्यत्वा
भावस्य भावप्रतियोगिकत्वेनातिरिक्तत्वाद्यथाश्रुतमेव + न्नातिव्याप्तिः अतो भावभिन्नत्वं + सम्यगित्याहुः। वस्तुतस्तु जातिसामान्याभाव
त्वावच्छिन्नप्रतियोगितायास्तदवच्छेदकरूपसंबंधेन साध्यवन्निष्ठस्य प्रतियोगितावच्छेदकत्वेन लक्षणाघटकत्वादुक्तपूर्वपक्ष एव नावत
रति। द्वितीयलक्षणे च साध्यव्यापकतावच्छेदकजात्यभावत्वादिना घटाद्यभावमादाय दोषः। समनियताभाववैलक्षण्यमत्र मात्लक्ष्यनिर
सनीयः। अभावावृत्तित्वं साध्यासमानाधिकरणवृत्तित्वं वा रूपविशेषणं। एतेन घटभिन्नमेयत्वादित्यादौ घटभेदाभावो घटत्वं न +
तद्वैलक्षण्यानुपगमे वह्न्यभावस्यापि वन्हिव्यापकत्वापत्तिः अस्माकं च वह्न्यभाववन्हिमत्ताप्रकारकप्रमाविषयत्वाभावयोरैक्येन तत्प्रतियोगिन
स्तादृशविषयत्वस्य स्वरूपसंबंधेन साध्यवद्वृत्तित्वेनादोषात् एवं च जात्यभावस्यापि न साध्यव्यापकत्वं + भावभिन्नं घटभेदत्वेन घ
टाभावस्यावाच्यत्वेन हेयत्वाभावः घटवद्भिन्नत्वप्रकारकप्रमाविशेष्यत्वाभावस्य च नातिरिक्तत्वं उभयवृत्तेयरुतिलक्षणखंडनविरो
धादिति प्रत्युक्तं। ननु सामान्यरूपेण विशेषाभावोपगमे वन्हिनिष्ठप्रतियोगित्वेन तद्व्यभावं द्रव्यत्वाभावमहानसीयवह्न्यभावान्य
तरप्रतियोगित्वेन महानसीयवह्न्यभावं चादाय वह्निद्रव्यत्वादिघ प्रतियोगितादेर्व्यापकतावच्छेदकतानुपपत्तिरित्यत आह। यथा चेति। सामा
नाधिकरण्यमभेदः। तथान्वयश्चाभिन्नायाः साध्यवदवृत्त्यभावप्रतियोगितायाः अवच्छेदकत्वं सामानाधिकरण्येनावच्छेदकत्वं तात्पर्यः। स्वस्प

तियोगितावच्छेदकं। उक्तस्थले च वह्न्यादिनिष्ठप्रतियोगिताया स्तादृशाभावप्रतियोगितातिरिक्तवृत्तित्वेन तदनात्मकत्वान्नस्वप
देशोपादानं किंतु घटनिष्ठप्रतियोगिताया एवेति नाप्रसिद्धिः। केचित्तु साध्यवद्वृत्तियोऽभावस्तद्वृत्तितानवच्छेदकत्वे सति तत्प्रति
योगितावच्छेदकत्वं तदर्थः। अत्र घटाद्यभावप्रतियोगित्वेन तद्वृत्त्यभावमात्रायत्तादृशप्रतियोगितादेस्तादृशानवच्छेदकत्व। अन्य
त्वरूपव्यापकतावच्छेदकतापत्तिरतोऽन्तरात्वे प्रतियोगितावच्छेदकत्वनिवेशः। तथा च घटाभावप्रतियोगित्वेन घटाभावस्य ससंतार्थविशि
ष्टतादृशावच्छेदकत्वान्न दोष इत्याहुः। तादृशप्रतियोगितातिरिक्तवृत्तिभिन्नत्वं स स्वावच्छेदकत्वं तादृशप्रतियोगितातिरिक्तवृत्तिधर्माव
स्वावच्छेदकत्वं स्वाभावसमानाधिकरणधर्मानवच्छिन्नप्रतियोगितावच्छेदकत्वं वानार्थः। वह्निनिष्ठप्रतियोगित्वेन वह्निघटोभयाभाव
द्रव्यत्वनिष्ठप्रतियोगित्वेन द्रव्यत्वघटत्वोभयाभावादिकमादायासंभवापत्तेः। साध्येनेति। सामान्यरूपेण विशेषाभावसत्वेपि दोषवा
रणाय यावत्वनिवेशः। साध्यसामानाधिकरण्यव्यापकसामानाधिकरण्यप्रतियोगिनिष्ठप्रतियोगिताकत्वनिवेशेन यावत्वनिवेशानिबं
धनदुर्ज्ञेयत्वोद्धारोपि उदक्षरत्वमस्वरसो नव्यास्त्वित्यनेन सूचितः। यत्त्विति। घटत्वेन वह्न्यभावीयप्रतियोगित्वेन वह्न्यभावः साध्यवद
वृत्तिः साध्यवदवृत्तित्वं च साध्यवद्वृत्तित्वत्वपर्याप्तसामानाधिकरण्येनावच्छेदकताकप्रतियोगिताकत्वाभावः। तेन व्यधिकरणधर्माव
च्छिन्नाभावमादाय नासंगतिः। एवं प्रतियोगितावच्छेदकत्वं प्रतियोगितायाः सामानाधिकरण्येनावच्छेदकत्वं तेन घटाभाववह्न्यभावा
15 न्यतरप्रतियोगित्वेन वह्न्यभावस्य साध्यवदवृत्तित्वेपि न दोषः। साध्यवदवृत्ति। प्रतियोगितावच्छेदके युक्ता वा हाग्नेति तात्स्वैदं वाच्यं

सा·टी·अ·मंजू· ज्ञेयत्वादिसाध्ये साध्यवद्वृत्त्यभावप्रतियोगितावच्छेदकीभूतगगनाभावत्वावच्छिन्नप्रतियोगिताकस्य गगनस्वरूपाभावस्य यत्सामा

४७ नाधिकरण्याभावेपि साध्यवन्निरूपितवृत्तित्वाभाववान् यः घटत्वावच्छिन्नगगनाभावनिष्ठप्रतियोगितावच्छिन्नाभावो गगनरूपः तत्प्र

तियोगितावच्छेदकीभूतघटत्वावच्छिन्नगगनाभावनिष्ठप्रतियोगिताकस्य यत्सामानाधिकरण्यस्य हेत्वधिकरणावच्छेदेन प्रतियो

गिसामानाधिकरण्यसत्वेनाव्याप्त्यभावादेतद्ग्रन्थासंगतिरिति वाच्यं। घटत्वावच्छिन्नप्रतियोगित्वेन गगनाभावस्याभावांगीकारे

प्रयोजनाभावात्। न च गगनादेः प्रतियोगित्वसंरक्षणाय गगनाभावत्वावच्छिन्नप्रतियोगिकाभावांगीकारेपि गगनाभाव

त्वावच्छिन्नप्रतियोगितावच्छिन्नाभावस्वीकारे प्रयोजनाभावात्तद्ग्रन्थासंगतिर्दुर्वारैवेति वाच्यं। गगनाभावत्वावच्छिन्नगगनाभाव

निष्ठप्रतियोगितायाः गगनाभावत्वरूपत्वेनासंगतेरभावात्। यत्तु। घटत्वाद्यवच्छिन्नगगनाभावनिष्ठप्रतियोगिस्वरूपघटत्वा

द्यात्मकत्वसंभवेपि प्रतियोगिविशेषणीभूतगगनाभावत्वरूपतासंभवात्कथं तदवच्छिन्नाभावो निराक्रियते इति तन्तुच्छं

चक्रवर्तित्वस्यैव अधिकरण्याधर्मावच्छिन्नप्रतियोगितायाः प्रतियोगिविशेषणातिरिक्तत्वस्य वक्ष्यमाणत्वात्। नन्ववच्छेदकपद

स्यानुक्तत्वात् एवं ज्ञानानुपपत्तिरित्यत आह। अत्रेति। व्यापकतायामिति। उक्तरीत्या दृशो यो यस्तदन्यत्वस्येत्यर्थः। अवच्छेदक इति। प्र

नुयोगितेत्यर्थः। यत्रेति। यन्निष्ठेत्यर्थः। न यावतादृशप्रतियोगितावच्छेदकभेदात्तु योगिताश्रयप्रतियोगितेतत्समुदायार्थः। तेन प्र राम·

र्वव्यापकतावच्छेदकपदस्य पारिभाषिकपरतया वर्णितत्वेनेदानीमेतादृशानुपपत्तेरदूषणाभ्युपगमयोरनुपयुक्तत्वमिति निरस्तं। वस्तु ४७

तस्तु। यथाश्रुतदीधितिसङ्क्षेपार्थवर्णनेनकाप्यनुपपत्तिः। तद्धितेति। तद्धितोदाहरणं रसिकाभार्यः। अत्र रसिकापद इकादेशीठन्तद्धितः प्या
न्विकाभार्य इत्यादौ तु न अत्र नपुंवद्भावः। अवच्छेदकेतिकप्रत्यये कालापकप्रभृतिभिः तद्धितत्वस्य तु न तस्य चानुपगमात् पुंवद्भाव इति
भावः। सकलेतीति। हेत्वधिकरणावच्छेदेनेत्येतद्घटितलक्षणपरं तेन गोमान् गोत्वादित्यादावतिव्याप्तिर्यद्बलेन वार्यते अत्र सकलपदं
व्यर्थं एकव्यभिचारवारकनिवेशस्यापि बहुशो दृष्टत्वादित्यस्वरसः। सकलेति। अपिना सद्धेतावसद्धेतौ चेति पर्णमुच्चयः। नन्विति।
यादृशाभावप्रतियोगितात्वेन साध्यतावच्छेदकव्यापकत्वं तादृशाभावादित्यर्थः। तेन प्रमेयवान् वाच्यत्वादित्यादौ विरुद्धघटत्वपटत्वा
भ्यां प्रमेयाभावप्रतियोगितायाः सामान्याभावीयायास्तथाप्रसाध्यस्य भिन्नतया नाव्याप्तिः। प्रतियोगितायांचात्यंताभावत्वनिरू
पितत्वं निवेश्यं। तेन वह्निमेदस्य प्रतियोगितावच्छेदकतादात्म्ये न प्रतियोगप्रसामानाधिकरण्येपि नाव्याप्तिः। समवायावच्छिन्नत्वहेत्वा
द्यभाववारणार्थं साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानिवेश इति तु न्यायः। विरुद्धघटत्वपटत्वव्याप्रमेयसामान्याभाव
वारणार्थं यावत्सदायत्वं चिद्दिति। हेतुसामानाधिकरण्यस्य वैशिष्ट्ययोर्निवेशार्थं। एवमग्रेपि संदर्भेति। अथ साध्यतावच्छेदकव्याप
कप्रतियोगिताकयावदभावनिवेशो न सामञ्जस्ये फलं यावद्धर्मगुरुत्वक्षणो नेति स्वीयाभास एव न संदर्भशुद्धः। तथा सति यावत्सद
भाववृत्तीदाने निसाध्यतावच्छेदकेत्यादिदलव्यावर्त्यसत्वसरे तल्लाभत्वेनान्विस्यात्। सत्संसर्गवत्रेसादिना केवलयावदभाववृत्तिप्रवेशरूप
मस्तु यावत्त्वं परं त्वन्यादृशाराव निर्विशेषपेन तु भयपोक्ताभावे साध्यान्यान्तरावे साध्यवतार्यकेवलसाध्यतावच्छेदकेत्यादिदव्यावृत्तिरग्रे
16 प्रदर्शयिष्यते कांतर इति संदर्भविरोधपरीहारात्। साध्यप्रतियोगिकत्वं साध्यमात्रप्रतियोगिकत्वं तत्प्रमेयसाध्यके प्रतिष्ठि

भयेनव्याप्यता घटकाभावे + एवायसंदर्भविरोधमुद्धरतां मतमाह। यद्यपीति। प्रतियोगितामात्रस्यैवेति। अथ संयोगादिरू-
पाव्याप्यवृत्तिसाध्यतावच्छेदककेऽभावप्रसिद्ध्यर्थम् + प्रतियोगिवैयधिकरण्यमावश्यकं मिति तदुभयत्वे प्रतियोगिताव्यापकत्वे
न दुर्घटं अत एव भूतलमूर्त्तत्वोभयाभावः संगच्छते। न च तथापि तादृशोभयत्वानधिकरणे घटादौ तदभावस्य प्रतियोगिसमा-
नाधिकरणतया तस्यैव प्रतियोगितावत्तिसत्वात्। न तत्र व्यापकतानिर्वाह इति वाच्यं। प्रतियोगिसामानाधिकरण्याभावविशिष्टस्य प्रति-
योगित्वाधिकरणवृत्तित्वस्य विवक्षणीयत्वात्। न च सामानाधिकरण्यस्य व्याप्यवृत्तितया प्रतियोगिसामानाधिकरण्यवतः संयोगा-
द्यभावस्य न तदभावत्वमिति संयोगावच्छिन्नसाध्यकव्यभिचारिणि वाच्यत्वाभावमादायातिव्याप्तिः। वाच्यत्वनिष्ठप्रतियोगितायाः संयो-
गव्याप्यत्वात्। प्रतियोगित्वाधिकरणे वाच्यत्वे संयोगाभावसत्वेपि तस्य प्रतियोगिसमानाधिकरणतया तदसमानाधिकरणाभावप्रतियो-
गित्वात्। एतेन प्रतियोगिसमानाधिकरणभिन्नत्वोक्तावपि न निस्तार इति वाच्यं। प्रतियोग्यनधिकरणप्रतियोगित्ववन्निष्ठाभावप्रतियोगि-
त्वघटितस्य तस्य विवक्षितत्वात्। संयोगावच्छिन्नसाध्यकव्यभिचारिणि वाच्यत्वाभावप्रतियोगितः संयोगानधिकरणतया नातिप्रसंग-
दिति चेन्न। उभयत्वरूपसाध्यतावच्छेदके प्रत्येकमुभयभेदसत्वे न प्रतियोग्यनधिकरणप्रतियोगित्ववन्निष्ठाभावप्रतियोगित्वे न प्रतियो-
गिताव्यापकत्वासंभवस्योक्तत्वात्। न च प्रतियोग्यधिकरणयत्तत्तद्व्यक्तिभेदकूटवद्यत्प्रतियोगित्ववदित्याद्युक्तौ नायं दोष इति वाच्यं।
एकमात्रवृत्तिसाध्यतावच्छेदकके प्रतियोगितामात्रस्यैव तद्व्याप्यत्वसंभवेन वाच्यत्वाभावमादायातिव्याप्त्यापत्तेः। प्रतियोगितावत्तिताद- ग्रम०
शसाध्यतावच्छेदकाभावस्य घटयितुमशक्यत्वात्। साध्यतावच्छेदकरूपप्रतियोग्यधिकरणस्यैकत्वेन यद्यदर्थप्रसिद्धेः परंतु भूतलं मूर्त्त ४८

त्वोभयेत्यादिग्रंथस्य पर्याप्त्यघटितसंबंधेनोभयत्वस्य साध्यतावच्छेदकत्वे मूर्तत्वस्य सद्धेतुत्वं पर्याप्तिसंबंधेन तथात्वे चावर्तकत्वहानिः।
इतिरलं विस्तरेण। व्यर्थतात्तु तदप्रसंगतमित्यादिना तादृशनिरुक्तेः शंकितुमशक्यत्वादिति यदुक्तं तन्न मनोरमं। प्रतियोगित्वाधिकरणे
प्रत्येकमुभयत्वाभावसत्त्वेनापि केवलस्वरूपादिसंबंधेन प्रतियोगिवैयधिकरण्यघटितस्य प्रतियोगिवैशिष्ट्यावच्छिन्नावच्छेदकताव
च्छेदकताकभेदवत्त्वरूपस्य वा निवेशो व्यापकत्वात् पायात् यद्धर्मावच्छिन्नप्रतियोगिताप्रतियोगितासमानाधिकरणभेदप्रतियोगिताव
च्छेदिकातद्धर्मभिन्नत्वरूपमेव वाव्यापकत्वं निवेश्यतां। अन्यथा मूर्तत्वमूर्तत्वोभयत्वस्यापि तादृशरीत्या व्यापकत्वाभावेनात एवेत्या
दिग्रंथानुच्छितप्रसंगात्। एवं च दीधितिमते यथा सामानाधिकरण्यं नाव्याप्यवृत्तितया भेदो न व्याप्यवृत्तिरिति व्याघातान्निवेशाया
स इति परास्तं साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावनिवेशेन सामंजस्ये तु तत्तद्यावद्धर्मगुरुलक्षणेनेति स्वीयाभास एव
न संदर्भशुद्धः। तथा सति यावत्पदव्यावृत्तेरदाने न साध्यतावच्छेदकेत्यादिदलव्यावृत्त्यवसरे तल्लिखनौचित्यात्। वस्तुतस्तु सर्वत्रे
त्यादिना केवलयावत्सद्व्याप्यवृत्तिं प्रदर्श्याऽस्तु यावत्त्वं परं तु अन्यादृशादले एव तन्निवेशपं न तु साध्यतावच्छेदकेत्यादिदले सारांक्षा
तएवेसाघवतार्ये केवलसाध्यतावच्छेदकेत्यादिदलव्यावृत्तिरग्रे प्रदर्शयिष्यते इति। संदर्भविरोधपरीहारात्। किममुपपन्नं। इदं तु बो
ध्यं। प्रतियोगितावन्निरूपितनिरवच्छिन्नवृत्तिकाभावेत्यादिक्रमेण प्रतियोगिताव्यापकत्वनिवेशाद्दर्शितोभयत्वावच्छिन्नसाध्यकातिव्या
17 प्तिरिति अत एवेत्यादिपंक्तेरर्थः। न तथा सति यावत्त्वस्य निवेशो मूर्तत्वाभाववमादायातिव्याप्तिवारणेऽपि महानसीयवह्न्याद्यभाववमादाया
व्याप्तिः। यथोक्ताभावे यावत्त्वोपादानात्तु सुदास इति चेत्तर्हि। अन्यादृशाभावे यावत्त्वोपादाने नाभासासंगतिरित्येव दूषणं प्रदर्श्यं। अत एवा

न्यादृशाभावेयावत्त्वमुपादायैवाभासः स्वयंविरचितः। ततश्चात्र प्रतियोगितावन्निरूपितनिरवच्छिन्नवृत्तिकेत्यादिक्रमेण निवेशोपपत्ति
व्याप्तिकथनमनुचितं। लाघवेन प्रतियोगितावन्निष्ठाभावप्रतियोगित्वरूपनिरवच्छिन्नत्वाघटितप्रतियोगिताव्यापकत्वोक्तावपित
दतिव्याप्त्युद्धारसंभवादिति चिंत्यमिति। पर्यंतस्यैतदप्यसंगतमिति निराकरणं कार्यं तादृशानिरुक्तेरित्यनेन च प्रदर्शितनिरुक्तेर्बुद्धि
स्थाया उपादानमिति सर्वं रमणीयं। नन्विति। धूमवान् वह्नेरित्यादौ वह्निधूमोभयाभावस्य साध्यप्रतियोगिकत्वविशिष्टसंयोगे
न प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरिति न संदर्भविरोध इत्याशयः। ईदृशी स्यात्साध्यतावच्छेदकविशिष्टसाध्यनिरू
पितसाध्यतावच्छेदकसंबंधेन विशिष्टसाध्याधिकरणानुयोगिकत्वविशिष्टसाध्यतावच्छेदकसंबंधेन वा प्रतियोगिसामानाधि
करण्यविवक्षणेऽभूतत्वमूर्तत्वोभयसाध्यकेनातिव्याप्तिः। वह्निधूमोभयवान् धूमादित्यादौ तादृशसंयोगद्वयमेवेति नाव्याप्तिरित्य
स्वरसो वदंतीत्यनेन सूचितः। साध्यप्रतियोगिकत्वं परिष्कुर्वतां मतमाह। नवास्त्विति। ननु अत्र अधिकरणसंबंधावच्छिन्नवाच्यत्वाभाव
मादाय लक्षणसमन्वयसंभवादवतारकत्वानुपपत्तिः। अतः साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताकत्वं निवेश्यं। अन्य
था प्रमेयसाध्यके साध्यघटकान्यसंबंधावच्छिन्नप्रमेयाभावमादाय स्वविशिष्टमुपादाय लक्षणसमन्वयसंभवादग्रे प्रमेयवा
नित्याद्यादिनाप्यधिकरणधर्मावच्छिन्नाभावसंपादनप्रयासानौचित्यापत्तेः। साध्यनिष्ठपदप्रयोजनावसरे गगनावच्छिन्नवा
च्यत्वाभावलिखनात् साध्यतावच्छेदकसंबंधेन प्रतियोगिसामानाधिकरण्यमंतरेण प्रतियोगितावच्छेदकसंबंधेन तन्निवेश रामः
धोऽप्यकालिकादिसंबंधावच्छिन्नधूमाद्यभावस्य तादृशसंबंधेन तथात्वादतिव्याप्तेर्वारणाय प्रतियोगितायां तादृशसंबंधा ४९

वच्छिन्नत्वस्यावश्यकत्वात्। इत्थं च धूमवत्ताप्रकारकप्रमाविषयत्वसाध्यके साध्यानिष्ठत्वोपादानफलप्रतियोगिकत्वोक्तौ साध्यमात्र
प्रमेयसाध्यकेः साध्याभिन्नाप्रसिद्धेः प्रमेयेति। व्यापकं साध्यतावच्छेदकमिति विवक्षान्वदूषितैवेति यादृशावच्छेदकतापर्याप्त्यधिकर
णधर्मवत्ताज्ञवित्तादृशावच्छेदकतानिरूपकत्वं धर्मानवच्छिन्नत्वं यथाश्रुतधर्मत्वमादाय साह। गगनेति। वारकत्वादिति। नन्वेवमपि ध
र्मानवच्छिन्नसाध्यनिष्ठयादृशप्रतियोगिताकाभावमात्रनिवेशेपि गगनादेर्धर्मत्वाभावेन गगनाद्यवच्छिन्नवह्न्यादिप्रतियोगिकाभावसं
भवादतिरिक्तान्तं व्यर्थं। धूमवान्वह्नेरित्यादौ गगनादिनावह्निधूमोभयाभावस्यलक्षणघटकत्वेपि तस्याभावात्तत्प्रतियोगितायास्सा
मान्याभावीयान्यतयाधूमनिष्ठप्रतियोगिताश्रयसामानाधिकरण्यविरहादिति चेन्न धर्मत्वं हि साध्यतावच्छेदकताघटकसंबंधेनवृ
त्तिमत्वं अन्यथा कालिकादिसंबंधेन महाकाले वस्तुमात्रस्येव वृत्तेस्तदतिरिक्तधर्मानवच्छिन्नप्रतियोगिताप्रसिद्धेः। एवं च कालिक
संबंधेन वह्नित्वादिविशिष्टस्य साध्यतायां निरुक्तधर्मानवच्छिन्नप्रतियोगिताप्रसिद्धिः। एवं विषयितासंबंधेन वह्नित्वविशिष्ट
स्य साध्यत्वे साध्यतावच्छेदकताघटकसंबंधेन वृत्तित्वाप्रसिद्धिरिति तत्संबंधेन संबद्धत्वस्य निवेशपतया तदप्रसिद्धिः गगनादेरपि विषयि
तासंबंधेन संबद्धत्वादतोतिरिक्तान्तं। अथैवमपि कालिकसंबंधेन विषयितासंबंधेन वा वह्नित्वविशिष्टज्ञानस्य विषयतासंबंधेन
साध्यतायामव्याप्तिः। साध्यतावच्छेदकाश्रयस्य सर्वप्रमितिजन्यज्ञानस्येश्वरज्ञानस्य निरुक्तस्य साध्यतावच्छेदकसंबंधेन केवलान्व
यितया च तत्संबंधावच्छिन्नसाध्याभावस्याप्रसिद्धेः। न च तादृशकालिकसंबंधेन वह्नित्वावच्छिन्नाभावं प्रसिद्धः आत्मत्वादिहेतौ तत
18
स्य प्रतियोगितावच्छेदकसंबंधेन प्रतियोग्यसमानाधिकरणरूपेण त्वात्। अन्यथापि व्यधिकरणसंबंधावच्छिन्नवह्नित्वनिष्ठप्रतियो

ग॰री॰प॰मंजू॰ गितावच्छेदकताकसाध्याभावः अपेक्षाबुद्धिविशेषविषयत्वरूपतदुभयत्वस्य साध्यतावच्छेदकताघटकसमवायसंबंधेन धर्मत्वाभावादन
५० वच्छिन्नत्वात्तोपादानेपि तदवच्छिन्नवह्निधूमोभयाभावमादायातिव्याप्तेरिति। न च धर्मानवच्छिन्ने सत्त्र पर्याप्त्यनिवेशेन श्यात्तत्र वह्नित्वादेः
तादृशधर्मतयात दोषः वह्नित्वसमवायिधूमोभयाभावादेः प्रतियोगितायां साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकताक
ताकत्वस्य निवेशनीयतया दर्शिताभावस्य न लक्षणघटकत्वसंभवः। एवं वह्नित्वेन ज्ञानसत्त्वोभयाभावस्य विषयतासंबंधावच्छिन्न
स्य संभवात्तत्प्रतियोगितायाः प्रत्याश्रयविभिन्नत्वेपि यथा न क्षतिस्तथा वक्ष्यामः। परे तु तादृशाभावमनालोच्य यतः प्रतियोगिता
वच्छेदकताघटकसंबंधेन वृत्तिमत्त्वरूपं धर्मत्वं निवेश्यं। अत एव विषयतात्मकवह्निधूमोभयत्वावच्छिन्नाव्यधिकरणसंबंधावच्छिन्न-
तदुभयत्वनिष्ठावच्छेदकताकाभावमादायातिव्याप्तिरिति तत्प्रतियोगितायाः सामान्याभावीयान्यतयाप्रत्याश्रयभेदात्। नन्वेवं
सर्वत्रापि व्यधिकरणसंबंधावच्छिन्नगगनाद्यवच्छिन्नसाध्याभावमादाय लक्षणगमादतिरिक्तातवैय्यर्थ्यं। यदि च वाच्यत्वंय
ष्यानसमवायीतिलिखनात् प्रतियोगितावच्छेदकताघटकसंबंधेन वृत्तिमत्त्वमप्यवच्छेदकतायां तंत्रं। अन्यथा वाच्यत्वस्येच्छारूपत्वे
पि व्यधिकरणसंबंधावच्छिन्नसमवायित्वावच्छिन्नवाच्यत्वाभावमादाय शंकासंभवात्तदसमवायित्वव्यवस्थापनासंगतेः। एवं च व्य
धिकरणसंबंधावच्छिन्नगगनविच्छिन्नाभावस्यालीकत्व एवासंभवप्रसक्तेर[illegible]तिरिक्तांतसार्थक्यं। अत एवावृत्तेः प्रतियोगिता
वच्छेदकताया अनिराकर्तव्यतया प्रतियोग्यवृत्तिश्चाधर्म इति खंडने धर्मपदमि सुच्यते तदा विरुद्धघटत्वपटत्वाभ्यां प्रमेयाभावमादा रा॰म॰
ये व सर्वत्रापि लक्षणसंगतेरतिरिक्तांतवैय्यर्थ्यं दुर्वारमेव वस्तुतस्तु। विरुद्धघटत्वपटत्वेति पाठः श्यामादिः बहुपुस्तकेन दृश्यतेत साठा ५०

भावे च तत्संग्रहप्रकारोऽयमर्थः अवच्छेदकतायां तादृशसंबंधेन वृत्तित्वस्य तेन तादात्म्येन साध्याभावो दुरपह्नव इति सत्यं वह्नित्वाव
च्छिन्नाभाववह्नित्वेन संगतये परं तदुपादानं। अन्यथा घटत्वपटत्वाभ्यां प्रमेयाभावं कृत्तत्त्वरूपसाध्यनिरूपप्रतियोगिताकमादाय तत्रातिव्या
प्तेस्तदसंगत्यापत्तेः। साध्यतावच्छेदकातिरिक्तधर्मानवच्छिन्नत्वं चावश्यं उमेरतिन वैयर्थ्यमत्र दोषावरकग्रंथसंगमनमात्रप्रयोजनकविशेष
णनिवेशेनावतारणमस्वरसबीजं निवेश्याहुः। यत्तु साध्यतावच्छेदकावच्छिन्नसाध्यनिष्ठया दृशप्रतियोगिताकत्वमेव प्रवेश्यं किं न तद्
प्रवेशेन। न च वाच्यत्वसाध्यके वाच्यत्वेन वाच्यत्वघटोभयाभावप्रसिद्धावपि प्रमेयसाध्यके तदप्रसिद्धिः। सामान्यरूपेण विशेषाभावानं
गीकारादहित्वेन तार्णीताणोभयाभाववत्प्रमेयत्वेन घटतद्भिन्नोभयाभावस्याप्यनंगीकारादिति नापि समवायादिना प्रमेयाभावस्व
वैशिष्ट्यनिवेशापानादिति वाच्यं। सर्वत्रापि व्यधिकरणसंबंधावच्छिन्नसाध्यतावच्छेदकनिष्ठावच्छेदकताकाभावसंभवादिति तत्रा
वह्निधूमोभयाभाववारणासंभवात्। तस्य साध्यतावच्छेदकीभूतधूमत्वावच्छिन्नप्रतियोगिताकत्वात्। गुरुरूपेण साध्यतायामव्याप्तेश्च।
ननु तथापि कालिकादिसंबंधेन गुरुरूपविशिष्टस्य विषयितासंबंधेन साध्यत्वे साध्याभावाप्रसिद्धिः। सर्वेषामेव साध्यतावच्छेदक
ताघटकसंबंधेन वृत्तिमत्त्वप्रतियोगितावच्छेदकता घटसंबंधेन वृत्तिरूपधर्मत्वसंयोगादिरूपव्यधिकरणसंबंधावच्छिन्नवह्नित्वावच्छि
न्नाभावमादाय लिखनसंगतेरतिरिक्तांतवैयर्थ्यप्रसन्नः तत्सार्थक्याय साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकता
19 कत्वस्यावश्यकत्वदानेऽभावाप्रसिद्धिः तादृशकालिकादिसंबंधावच्छिन्नावच्छेदकताकस्य घटत्वपटत्वाभ्यां प्रमेयाभावस्य व्यतिरे
कित्वात्। संबंधांतरावच्छिन्नावच्छेदकताकस्य तस्य लक्षणाघटत्वात्। एवं वह्नित्वादिप्रतियोगिकत्वविशिष्टसमवायादिसंबंधेन

ता॰टी॰अं॰मजू॰ वह्नित्वादेः साध्यतावच्छेदकत्वेन तदतिरिक्तधर्माप्रसिद्धिरिति चेत्॥ अत्र केचित्। साध्यतावच्छेदकातिरिक्तत्वं प्रतियोगितावच्छेदकताघट
५१ कसंबंधेन साध्यमात्रावृत्तित्वं तच्च तन्मात्रवृत्तियत्किंचिद्धर्मान्यत्वं। यत्किंचित्त्वोपादानात् सर्वस्य कालेवृत्तित्वेपि नाप्रसिद्धिः संयोगा
दिसंबंधावच्छिन्नाभावव्यावर्तनाय साध्यतावच्छेदकताघटकसंबंधस्यागः तथा च लघुरूपेण वह्नित्वादिना वह्निसत्वोभयाभावादेरेव
तत्र प्रसिद्धः। मात्रपदोपादानात् द्रव्याभावमादायनातिव्याप्तिः ननु साध्यतावच्छेदकस्य स्वमात्रवृत्तित्वप्रमेयसाध्यतावच्छेदकेऽप्रसिद्धेः॥ सा
ध्यतावच्छेदकताघटकतापर्याप्त्यनुपादानात् द्वित्वीयापि दोषस्याहुः। ननु ज्ञानवानात्मत्वादित्यादौ गगनेन ज्ञानाद्यभावप्रतियोगितायाः
स्वरूपसंबंधरूपायाः सामान्याभावीयान्यतयाप्रत्याश्रयभिन्नतयाहेत्वधिकरणावच्छेदेन तत्प्रतियोगिताश्रयतत्ज्ञानसामाना
धिकरण्याभावाद्व्याप्तिः। अथ तादृशप्रतियोगितेसत्त्वतादृशत्वं साध्यनिष्ठत्वेन मादृशप्रतियोगितासाजात्यमिति चेत् साध्यनिष्ठ
त्वेन धूमाभावप्रतियोगितासजातीयां द्रव्यसामान्याभावप्रतियोगितामादायातिव्याप्तेः साध्यनिष्ठत्वविशिष्टप्रतियोगिताश्र
यसामानाधिकरण्योक्तौ या दृशतादृशपदयोरनवच्छिन्नं तस्य चैवैयर्थ्यापत्तिः। वह्निधूमोभयाभावप्रतियोगितायाधूमव
त्तित्वविशिष्टाया वह्न्यावृत्तित्वेन तदभावमादायातिप्रसंगाभावात्। अथ स्वप्रतियोगिताश्रयसामानाधिकरण्यं विवक्षितं। स्वशब्देन
द्रव्याभावो दुर्धर इति चेद्यादृशतादृशो स्तनयोर्वैयर्थ्यमेवेति। सर्वं। यादृशत्वं यद्धर्मावच्छिन्नत्वं तादृशत्वं तद्धर्मावच्छिन्नत्वमिति दोष।
त्॥ एतेन तादृशत्वं तत्प्रतियोगितानवच्छेदकानवच्छिन्नत्वं। धूमत्वेन द्रव्याभावप्रतियोगितायास्तु सामान्याभावीयान्यतया प्रत्या राम॰ ५१
प्रत्याश्रयभेदेन न क्षतिः॥ स्वान्यून्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगितानिवेशाद् इति प्रत्युक्तं गौरवात्। यत्तु। अतिरिक्तानानुपादानेगग

नेन वह्न्याद्यभावीयस्वरूपसंबंधरूपप्रतियोगितायाः प्रसाश्रयविभिन्नतया हेतुत्वधिकरणावच्छेदेन तत्प्रतियोगिताश्रयतत्तादृग्वह्नि
सामानाधिकरण्याभावाद्व्याप्तिरतो तिरिक्तांतं। इदं च वह्निसामान्याभावप्रतियोगितायावह्नित्वात्मिकायाहेतुत्वधिकरणा
वच्छेदेनाश्रयसामानाधिकरण्यात्राव्याप्तिः। प्रमेयवान्वाच्यत्वादित्यादौ गगनेनप्रमेयाभावप्रतियोगितायाः प्रत्याश्रयभिन्नत्वेपि
प्रमेयत्वाद्यात्मकत्वंउप्रतियोगिसामानाधिकरण्यानासंगतिरिति। तन्नासाध्यनिष्ठयादृशप्रतियोगितात्वेनेतिविवक्षायाः एव
-तादृशप्रतियोगिताशब्देनोपादानात् हेतुत्वधिकरणावच्छेदेन वह्निनिष्ठप्रतियोगितात्वेन प्रतियोगिताश्रयसामानाधिकरण्यस
त्वोगगनेन वह्न्यभावादेरपि लक्षणघटकत्वादतिरिक्तांत वैयर्थ्यात् तादृशशब्दार्थमध्येसाध्यनिष्ठत्वप्रवेशेन गगनेनप्रमेयाभा
वमादाय नातिव्याप्तिः। नन्वेवं गगनेन धूमत्वेन वा वह्निधूमोभयाभावप्रतियोगिताप्रसाश्रयं नानेव वह्निधूमोभयसामान्याभा
ववारणार्थं साध्यनिष्ठत्वविशिष्टप्रतियोगिताश्रयसामानाधिकरण्यमुच्यतां किं मनवच्छिन्नात्वांतेनेति चेत्तर्हि। प्रतियोगपवृत्तिश्चेतिग्रंथा
नवतारप्रसंगाधिकरणधर्मावच्छिन्नाभावानुपगमेपि सर्वत्रोभयाभावसंभवात्। प्रमेयसाध्यकेच गगनत्वोभयाभावः गगनप्रमेयो
भयाभावस्वरूपलाभः तस्य गगनाभावरूपत्वात्। अतिव्याप्त्यापत्तेरिति। नन्वत्र साध्यतावच्छेदकसंबंधेन प्रतियोगिसामानाधिकरण्यं तेन
गगनेन धूमाद्यभावस्य कालिकादिसंबंधेन प्रतियोगिसामानाधिकरण्येपि नातिव्याप्तिः। न वा गमनं स्पंदत्वादित्यादावतिव्याप्तिस्तथा च गग
नेन वाच्यत्वाभावमादायादोषात् साध्यनिष्ठत्वं व्यर्थमिति चेन्न तथापि गगनेन वह्न्याद्यभावमादायातिव्याप्तेः। साध्यप्रतियोगिकः कश्चिदभा
२० वः साध्यतावच्छेदकसंबंधेनेति पूर्वं निरुक्तावसरे संदर्शयिष्यति। इदं च वेति। प्रवृत्तेति। यादृशप्रतियोगीताश्रयवन्निष्ठप्रतियोगिन्यधिकरण

ता॰टी॰अ॰मंज॰ व: भावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकताद्रशप्रतियोगिताक इत्यर्थः। भूतत्वेति। उभयाभावप्रतियोगितायाः श्रयप्रतियोगिताव
५२ च्छेदकरूपत्वेपि प्रत्येकपर्यवसानभावरूपमन्यागगनमुभयाभावप्रतियोगिमदिति प्रसयानिर्वाहादिति भावः। न च त्र पृथिवीत्वा
स्यभावमादाय कथं मतिव्याप्तिवारणप्रतियोगितायाः प्रतियोगिरूपता मते वह्निमान्धूमादित्यादौ तादृशास्यकस्यापि प्रतियोगिनो
न हेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यमिति तादृशाभावप्रतियोगितात्वेन प्रतियोगिताश्रयस्य चेत्सामानाधिकरण्यं वि
वक्षितेतदा समनियताभावे कान येस्पर्शाभावादेः भूतत्वमूर्तत्वोभयाभावतयाऽनिव्याप्तिरिति चेन्न साध्यनिष्ठतादृशप्रतियोगिताश्रय
सामानाधिकरण्यस्योक्तत्वात्। एवं च स्पर्शवत्त्वप्रकारकप्रमाविषयत्वाभावमादायापि नातिव्याप्तिः। भूतत्वमूर्तत्वोभयवान्स्पर्शादित्यादौ
(त्वमि साराय:) च घटत्वेन स्पर्शाभाव[redacted]मादाय लक्षणसंगतिः। अत्र च विशिष्टसत्तावान्जातेरित्यादौ साध्याभावमादायातिव्याप्तिर्विशिष्टातिरिक्तपक्षेनसं
भवतीति न दुपेक्षितं। व्यर्थत्वेति। भूतत्वमनोन्यत्वाभावयोर्लक्षणघटकत्वमित्याशयः। अत एवेत्यादेः पश्चादुक्तत्वस्येदानीं कथनमस्वरसः।
मन्योन्यत्वेति घटत्वादिनामन्योन्यत्वाभावो भावभिन्नो लक्षणघटकः। कैमुतिकेति। यद्यप्याहो उताहो किमुत विकल्पे किं किमुत चेति कोशो वि
कल्पः किमुतशब्दार्थः तथापि तस्य प्रकृतकोटिद्वयस्यापि सत्त्वकताऽयथातामनेकार्थत्वादिति बोध्यं। कैमुतिकन्यायालंबो गतिकगतिव्य
र्थेत्यस्वरसः। साध्यव्यापकतावच्छेदकेत्यादेरनुपादानेऽतिव्याप्तिमाशंक्याव्याप्यवृत्तितानिरूपकप्रतियोगिताश्रयसामानाधिकरण्यविवक्षया नि
राकरोति। अभावस्येति। एवेति। प्रतियोगितावच्छेदकसंबंधेन व्यापकत्वप्रतियोगिसामानाधिकरण्ययोर्वक्तव्यत्वेपि तादृशास्वाभावोधूमव्या राम॰
पकः। अभावसाध्यकव्यभिचारीवायास्त्वः। नन्वेवं जलत्वादीत्यादिग्रंथानुपस्थितिः। गोत्वाभाववन्निष्ठप्रतियोगितायास्तदन्यत्वासंभवादिति ५२

चेन्न। यत्। प्रतियोगिताकाभाववत्त्वावच्छिन्नाधिकरणं स्वसमानाधिकरणस्वावच्छेदकधर्मावच्छिन्नाधिकरणं तदन्यत्वस्य तदर्थतया तद्व्यो
च्छित्तेः। यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यमधिकरणधर्मावच्छिन्नाभाववभिन्नत्वोभयाभाववत्त्वमित्युक्तौ तु न तद्व्या
नुच्छित्तिः। एवं चागोत्वाभावादेर्न पूर्वलक्षणवृत्तित्वं विशिष्टस्वाभावमादाय लक्षणसंगतिरिति अवधेयं। स्वानधिकरणेति। स्वपदं प्रतियोगित्वा
श्रयपरं। तादृशप्रतियोगियद्धतद्भिन्नेत्यर्थः। गगनादिवारणाय वृत्तिमत्त्वं देयं स्वानधिकरणसाध्यवत्कान्यत्वं तु कुतो नोक्तं। तावता पितस्यभे
दकूटासमकालेन प्रतियोगिपरिचायविशेषणत्वानपायात्। अदुष्टत्वादिति। केचित्तु दीधितिकारोक्तव्याप्तेर्गुरुतयानुमितिहेतुज्ञाननिष्ठकारणता
नवच्छेदकतयार्थांतरदोषमाहुः। तन्नावह्निघटोभयाभावादिवारणाय स्वानधिकरणत्वनिवेशमपेक्ष्य सामानाधिकरण्येनानवच्छेदकत्वस्य लघु
त्वात्। हेत्वधिकरणत्वं रस्यैकदेशान्वयस्त्वेनं तेन संबंधेन हेत्वधिकरणमिति दीधितावच्छिन्नत्वरूपतृतीयार्थान्वयशंकावारणाय हेतुसंबंधी
ति। स्वविशिष्टेसादेरर्थः। प्रमामंडले ति। न च विशिष्टधर्मस्यैव हेतुतया न व्यभिचारशंकेति वाच्यं। जातिरूपधर्मत्वपुरस्कारेणैव हेतुत्वा
वयताबोधस्य नवीनतार्किकसमंतत्वात्। पर्वतादीति। उभयस्यावच्छेदकसंयोगेने[illegible] सर्थः। तेन साध्यवदन्यावृत्तित्वरूपव्याप्तेः हृदादिनिरूपितप
र्वताद्यनुयोगिकत्वविशिष्टसंयोगाप्रसिद्धावपि धूमे नाव्याप्तिः। आद्यक्षणावच्छिन्नदेशासंबंधेस्योत्पत्तिमतेउभयस्याधिकरणदेशानुयोगि
कत्वविशिष्टेनेतरथोभयस्यावच्छेदकीभूतदेशानुयोगिकत्वविशिष्टेन संयोगेनेतिवार्थः। वह्नियन्निरूपितसंयोगेनेत्यर्थ इत्यन्ये। विशिष्टधूम
स्य हेतुतापक्षे महाले विशिष्टधूमवत्ताया असंभवादव्याप्तिरित्यादिकं दिगर्थः। जन्यविशेषस्य साध्यत्वे साध्याभावस्यैव प्रलयावच्छेदेना
न यात्वान्नाप्तिआप्तिरित्यतो महेति। पृथिवीत्वादेः साध्यत्वे तु न देयमेव। यावत्पदं वैयर्थ्यापत्तेरिति। न चैवमेतद्रूपवान्मेयत्वादित्यादावतिव्या

२१

...री-अ-मंजू- व्या
५२

व्याप्तिः। तत्राप्येतद्रूपविशिष्टघटपटान्यतरत्वावच्छिन्नानुयोगिताकत्वविशिष्टस्वरूपसंबंधेनपटत्वप्रकारकप्रमाविशेष्यत्वनिष्ठप्रतियोगि
त्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकभिन्नत्वान्यत्वादिनिष्ठप्रतियोगिताकाभावस्यस्वविशिष्टतदवच्छेदेन
तथाविधसंबंधेनप्रतियोगिसामानाधिकरण्याभावात्। अव्यावर्तकत्वात्। अतिप्रसंगावारकत्वात्। दिगुपाधितया। दिशिअवच्छे
दैशिकत्वा दकतया। अन्यथायत्सत्वे यत्सत्वं तस्य तदवच्छेदकत्वमिति नियममुपागम्य नित्यानामप्यवच्छेदकत्वे। तथा च इदानीं घटो
न तदानीमितिव्यवहारानुरोधेन जन्यानां कालोपाधिकत्वमिवेह घटो नेहेतिप्रतीत्यादिगुपाधित्वमपितेषामेवोपेयं। न तु नित्यानामपि तेन पर
माण्वादीनां कालोपाधित्वोपगमेपि घटादिनाशदशायां इदानीं घट इत्यादिनप्रत्ययापत्तिः। घटादेरेवासत्वात् इदानीमात्मत्वं नास्तीतिप्रस
यश्चालोक इति नशंक्यं नियमव्यावर्तते मेवदर्शयति। अत एवेति। दिगर्थस्तत्किंचित्कालावच्छिन्नानां दिगुपाधित्वोपगमेऽप्येवोपपत्तेसार्वकालि
केषु तत्कल्पने गौरवमिति केचित्। नियमस्तु नोक्तौ नादिगुपाधित्वेपिपरमाणुरितिमनइत्येवंवायत्किंचिज्ज्ञानव्यक्तेर्विषयतासंबंधेनसाध्यव्याप
कतयायावदंतर्गततदभावस्यव्यापकताघटकविषयतासंबंधेनहेत्वधिकरणपरमाण्ववच्छेदेनप्रतियोगिसामानाधिकरण्याभावे
ननातिव्याप्तिः। नह्युक्तज्ञानव्यक्तिः दिक्कृतविशेषणतासंबंधेनसर्वत्रैववर्तते येन तादृशसंबंधेनसाध्यव्यापकत्वादतिव्याप्तिःस्यात्।
प्राच्यामुत्पन्नस्य तत्तेः प्रतीच्यवस्थितपरमाणौसत्वेमानाभावात् अन्यथाप्रतीच्यव्यवस्थितव्यक्तिष्वपितद्व्यवहारापत्तेरित्याहुः। महो
कालत्वादिति। जन्यविशेषस्यसाध्यत्वेमहत्त्वस्यावश्यकं अन्यथाप्रलयांगीकारेवस्तुतस्त्विति प्रोक्तव्यापकतापक्षेकालिसंबंधेनप्रलया रा.म.
वृत्तेःकालिकसंबंधावच्छिन्नाभावस्यतदनंगीकारेतत्संपदायत्तेःकालिकसंबंधेनाभावास्यस्वविशिष्टहेत्वधिकरणप्रलयातीतसंपादव ५२

च्छेदेन कालिकेन प्रतियोगिसामानाधिकरण्याभावेनानतिप्रसंगात्। स्पंदत्वस्य साध्यत्वे तु तन्न देयं। ननु कालिकसंबंधेन प्राय
शो वस्तुमात्रस्याव्याप्यवृत्तितया स्पंदत्ववति महाकालभेदरूपप्रतियोग्यनधिकरणमहाकालावच्छेदेन कालिकसंबंधावच्छिन्नमहाकाल
भेदाभावस्य स्वप्रतियोगितावच्छिन्नाभावसत्त्वात्कथं कालिकसंबंधेन साध्यव्यापकतावच्छेदकप्रतियोगिताकत्वं। न च विशेषणतात्वेने
त्वेनैव विशेषणगताव्याप्यपि व्यापकताघटकसंबंधत्वमिति वाच्यं। तथापि समवायेन स्पंदत्वाभाववत्स्येव यावदंतर्गतस्य हेत्वधिकरणा
वच्छेदेनातथात्वात्। कालिकविशेषणताया अव्याप्यवृत्तितया व्यापकताघटकत्वादिति चेन्न। महाकालान्यो महाकालत्वादित्यादा
वतिव्याप्तेरभिहितत्वात्। कालिकविशेषणतारूपविशेषसंबंधेन व्यतिरेकिवस्तुमात्रस्याव्याप्यवृत्तित्वेपि विशेषणतात्वेन रूपेण
विशेषणतासंबंधेनावच्छेदकाप्रसिद्ध्याऽव्याप्यवृत्तित्वाभावेन तत्संबंधावच्छिन्नसाध्याभावस्य स्पंदे सत्त्वायोगात्। प्रतियोगिवैयधिकरण्यघ
टितव्यापकत्वाभिप्रायेणेदमिति तु केचित्। तन्न। विषयताया इत्युत्तरग्रंथविरोधात्। तद्ग्रंथे न स्पंदत्वप्रकारकयत्किंचिद्बुद्धेः साध्यव्यापकत्वा
संभवस्योक्तत्वात्। केचित्तु स्पंदो महाकालत्वादित्यादौ कालिकविशेषणतासमवायान्यतरत्वेन संबंधत्वमुपेत्यातिव्याप्त्यभिधानं। तथा च
साध्यवति निरुक्तान्यतरसंबंधावच्छिन्नस्पंदत्वाभावप्रतियोग्यभावस्य कालिकविशेषणताऽभावीयविशेषणतान्यतरसंबंधावच्छिन्न
महाकालभेदाभावप्रतियोग्यभावस्य कालिकविशेषणताऽभावीयविशेषणतान्यतरसंबंधावच्छिन्नमहाकालभेदाभावप्रतियोग्यभावस्य चासत्त्वाद
वस्यतिव्याप्तिरित्याहुः। तन्न। अन्यतरत्वेन संबंधत्वानुपगमात्। स्पंदत्वप्रकारकबोधसामान्याभावस्य विषयतासंबंधावच्छिन्नप्रतियोगिता
२२ कस्याप्रसिद्धेर्यत्किंचित्स्पंदस्पंदो महाकालश्चेति तद्बोधाभावस्य महाकाले प्रतियोगिसामानाधिकरण्यात् साध्यव्यापकत्वासंभवाद्

गितथाचप्रतियोगिवैयधिकरण्याघटितसाध्यव्यापकताकल्पे तत्र संबंधमात्रनिवेशानंदुष्करमिति भावः॥प्रतियोगिवैयधिकरण्यघटितव्याप
कतायां वक्तव्यायां [illegible]त्वाह।किंचेति।सामान्येतिव्यधिकरणधर्मावच्छिन्नाभावानुपगमेऽवन्हिनिष्ठप्रतियोगित्वेन महानसीयवन्ह्यभावस्यसाध्यवन्नि
ष्ठतयातादृशप्रतियोगिताश्रयाः तत्प्रतियोगितावच्छेदकतयाऽसंभववारणाय अभेदार्थकसामानाधिकरण्यविशेषणसार्थक्यमित्यर्थः।ननु
सत्तानिष्ठप्रतियोगितायाः साध्यव्यापकतावच्छेदकत्वं संभवति नहि तस्याः विशिष्टसत्ताभावप्रतियोगितावच्छेदकत्वसंभवः।तस्या विशेष्यमा
त्रनिष्ठतयातद्विशिष्टाभावस्यसाध्यवन्निष्ठत्वासंभवात्।तथाचनासंभवइतिचेन्न।तादृशप्रतियोगित्वेन घटसमवायोभयाभावस्य घटसत्ता
न्यतरवृत्तिप्रतियोगित्वेन घटाभावस्य वाप्रतियोगितायाअवच्छेदकतयाऽसंभवसंभवात्।एवमेतद्रूपवान्नेतद्रसादिसाद्दोएतद्रूपवृत्तिप्रति
– योगित्वेनैतद्रूपघटोभयाभावःएतद्रूपवृत्तिप्रतियोगित्वघटवृत्तिप्रतियोगित्वान्यतररूपेण तोघटाभावः।साध्यवद्वृत्तिर्बोध्यः अथवाप्रतियो
गितायाःसामानाधिकरण्यं प्रतियोगिमात्रवृत्तित्वं।नचैवं प्रतियोग्यवृत्तिरूपग्रंथावतारो दुर्वारः।प्रतियोगिमात्रावृत्तित्वस्यैव तदर्थतयासा
मान्यरूपेण विशेषाभावद्रूषकत्वादितिवाच्यं।सोदउमते यत्किंचित्प्रतियोग्यवृत्तेरेवावच्छेदकत्वात मनिरासस अन्यादृशाभावनिराकरणसा
~~[illegible]~~ भुक्तवांतकल्पत्वादिति।
वारणार्थमेवेत्येवकारेण व्यधिकरणधर्मावच्छिन्नाभावव्यवच्छेदः।इसादिकमिति।आदिनाहेतुसमानाधिकरणाभावप्रतियोगितायां व्यधि
करणसंबंधावच्छिन्नत्वोपादानाद्यावतारेव्यभिचारावारकविशेषणाक्षेपापत्तिर्ग्राह्यः।तथाचेति।यद्यपिप्रतियोगितावच्छेदकसंबंधेनकपि राम०
वक्षणेपि धूमवान्वन्हेरित्यत्रातिव्याप्तिः प्रतियोगितावच्छेदक[illegible]स्वरूपसंबंधेनसाध्यव्यापकतावच्छेदकप्रतियोगिताकपूर्वक्षणवृत्तित्ववि ५४

शिष्टस्वाभावाभावरूपधर्माभावस्यतेन संबंधेनस्वाभावरूपप्रतियोगिसमानाधिकरणत्वात्। न चाभावेन धर्माभावस्यतादृशप्रतियोगिताश्रय
सामानाधिकरण्यनिवेशे तादृशस्वाभावनिष्ठप्रतियोगिसामानाधिकरण्यवत्वेन। तया निरुक्तव्याप्यवृत्तित्वाभावेन धर्माभावस्यतादृशप्रति
योगिताश्रयसामानाधिकरण्यविरहादेव नातिव्याप्तिरिति वाच्यं। जलादीत्यादिग्रंथासंगतेः। तादृशगोत्वाभावनिष्ठप्रतियोगितया निरुक्तव्याप्य
वृत्तित्वानाक्रांततया धर्माभावस्यतादृशप्रतियोगिताश्रयसामानाधिकरण्यविरहादेवरुतिव्याप्त्यसंभवात्। कपिसंयोगाभाववान्मेयत्वादि
त्याद्युत्तरग्रंथासंगतेश्च। एतेन व्याप्यवृत्तितानिरूपत्वनिवेशे कपिसंयोगपेतत्वादित्यादाववाप्तिः प्रतियोगिवैयधिकरण्यघटितव्यापकतेव
निवेश्यापकपिसंयोगाभाववानिति ग्रंथे चादियदास्थलांतरमनुसर्तव्यमिति न तदसंगतिरित्यपास्तं। कपिसंयोगाभावो कीर्तनवैयर्थ्यात्।
एतेन व्याप्यवृत्तितानिरूपकप्रतियोगिताकाभाव इत्युक्तौ न जलादीत्यादिग्रंथासंगतिरित्यपास्तं। धूमवान्वन्हेरित्यादावुक्तरीत्याऽति
व्याप्तेश्च तथापि यावत्वस्य फलं तत्प्रतियोगितादिशेषणत्वस्याग्रे विवक्षणीयतया निरुक्तव्यापकतावच्छेदिकाया या प्रतियोगिता तत्काभा
वाः प्रतियोगिसामानाधिकरणा इत्यर्थे न दोष इत्यवधेयं। वस्तुतस्तु। निरुक्तव्याप्यवृत्तित्वानिरूपकत्वविशेषणं न ब्रूमः। येनोक्तानु
पपत्तिः स्यात् किंतु किंचिद्विशिष्टस्वाभावत्वानवच्छिन्नेति वदामः। साधने स्वाधवत्तारत्वं ग्रंथस्याप्यत्रैव तात्पर्यं। एवं चैतादृशविवक्षयाऽति
व्याप्तेर्नावकाशः। एतेन कपिसंयोगपेतत्वादित्यादाववाप्त्यव्याप्यवृत्तित्वेत्यादिप्रकारस्यदशं किंतु मदशक्यतया प्रतियोगितायामेव फलतोऽपावत्व
विवक्षयाऽतिव्याप्तिवारणेऽपि वस्तुतस्त्वित्याद्यग्रिमग्रंथविरोधस्तदवस्थः। तल्पेऽतिव्याप्तेः सत्वादिति निरस्तं। कल्पद्वयेऽपि किंचित्त्वादिप्रकारेणोऽवसर्व
23 सामंजस्यादिति। व्यापकताघटकसंबंधेतरसंबंधानवच्छिन्नाभावनिवेशेऽप्यधिकरणधर्मावच्छिन्नाभावस्यप्रतियोगितावच्छेदकसंबंधा

नुपगमेपिव्यधिकरणसंबंधावच्छिन्नवाच्यत्वाभाववारणसंभवेपिचस्पंदोमहाकालत्वादित्यादौस्वरूपसंबंधावच्छिन्नमहाकालान्यत्वाभावस्यव्या
पकताघटककालिकसंबंधेनप्रतियोगिसमानाधिकरणत्वादितिव्याप्तिरतःप्रतियोगितावच्छेदकसंबंधेनप्रतियोगिसामानाधिकरण्यनिवेशा
नमावश्यकं।एवंचविशिष्टवाच्यत्वाभावघटत्ववाच्यत्वोभयाभावादेर्विशिष्टत्वोभयत्वाद्यभावरूपतांगीकारेणप्रतियोग्यवृत्तिश्चेतिग्रंथा
वतारसिद्धरुक्तसंबंधानवच्छिन्नप्रतियोगितानिवेशेगौरवमितिबोध्यं।ननुभूतत्वमूर्तत्वोभयस्यसमवायेनसाध्यत्वेस्पर्शसामान्याभाव
एवातिव्याप्तिंवारयिष्यति।भूतत्वंविशेषगुणत्वेसतिआत्मभिन्नत्वंपृथिव्यादिपंचान्यतमत्वंवा।मूर्तत्वंचपृथिवीजलतेजोवायुमनोन्यतमत्वंद्रव्यत्वे
सतिविभुभेदोवातदुभयसाध्यकेमनोन्यत्वाभावलिखनसंगतिरित्यतआह।वस्येति।अधिकरणत्वस्येति।यथाश्रयंप्रतियोगिवैयधिकरण्यघ
टिताघटितव्यापकतानिवेशोधनीचैत्रत्वादित्यादौस्वामित्वसंबंधेनसिद्धांतसिद्धसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानवच्छेदकत्वघटि
तव्याप्त्यनंगीकारादेतद्व्याप्त्यनंगीकारेकाक्षतिरित्यतआह।तद्रूपान्यरूपमितिसाध्यतावच्छेदकसंबंधेनस्वावच्छिन्नानधिकरणसाध्यवद्वृत्यादि
क्रमेणव्यापकतानिवेशाअन्यथासंयोगेनसाध्यतायांसदप्रसिद्धेः।तथाचोक्तासंभवइत्यवतारणमितिकेचित्।नन्वेतत्कल्पेजलादि[redacted]नु
वृत्तित्वविशिष्टगोत्वाभावाभावस्यधूमाभावरूपत्वेपिसाध्यतावच्छेदकसंबंधेनप्रतियोग्यसामानाधिकरण्यान्नातिव्याप्तिरितिजलादी
स्यादिग्रंथानुस्थितिरपिदोषःस्यादितिचेन्नाधूमवत्त्वप्रकारकप्रमाविशेष्यत्वादिसाध्यकेसाध्याभावस्यतुल्यन्यायेनविशिष्टगोत्वाभावरू
पतयाऽतिव्याप्तेस्तदवस्थत्वात्।स्वमतेतुप्रतियोगितावच्छेदकसंबंधेयावत्वासत्वाद्यथाश्रुतेवतदुक्तिरिति।यत्विति।साध्यत्वप्रका राम०
रकप्रमाविषयत्वमेवसाध्यव्यापकं।तेनैवचप्रतियोगित्वमिति।प्रतियोग्यवृत्तिश्चेतिग्रंथावतारणार्थंगवाद्यभावस्येति।गोमत्वप्रकारक ५५

अभावविशेष्यत्वाद्यभावस्येत्यर्थे तु गगनाधिकरणधर्मावच्छेदेनेत्यस्यासंगतिः न व्याप्यस्य स्वरसस्तु च नायस्य विशिष्टहेत्वधिकरणावच्छेदेनेत्येत
प्यावृत्तेः पश्चाद्देन तत्र संबंधनिवेशेऽपि विशेषनेदान्तीतन्निवेशनायासोऽनुचित इति न्यूनताभंगाय। अभिप्रायांतरमत्रैव सूचयति। यद्वेति। वस्तुतस्त्वे
तादृशगोत्वादेरपि जलत्वाद्यभावप्रतियोगिताया कालिकादिसंबंधेन साध्यव्यापकतावच्छेदकत्ववारणाय स्वरूपसंबंधेनैव तन्निवेशं।
एवं च प्रतियोगिपदतः। प्रतियोगित्वेन रूपेण निवेशने शक्तिनिरूपकसंबंधत्वाभावादेवोपपत्तेः किंव्यापकतावच्छेदकताघटकसंबंधेन प्रतियो
गित्वाश्रये स्यादिरीत्या निवेशेनेति। संबंधैक्याविवक्षयामिति। दिष्टत विशेषणता तु न साध्यव्यापकताघटिकेति न दैक्यविवक्षायां नातिव्या
प्तिः गदाधरभट्टाचार्यैः साध्यतावच्छेदकव्यापकप्रतियोगिताकयावदभावनिवेशे भूतत्वमूर्तत्वोभयवान् मूर्तत्वादित्यादौ एव दोषवाहनं ननु
रूपसामान्याभावसाध्यके विरुद्धेरूपस्य तत्तत्स्पर्शत्वमेवाहेतुत्वं नारितं। न च तत्स्पर्शविरुद्धतामते रूपसामान्याभावासामान्याभावस्य स्वरूपाद्यात्म
कस्य रूपध्वंसादिरूपप्रतियोगिसामानाधिकरण्येऽपि घटत्वेन रूपसामान्याभावाभावस्य हेत्वधिकरणावच्छेदेन न साध्यतावच्छेदकसंबंधेन प्र
तियोगिसामानाधिकरण्यमिति नातिव्याप्तिप्रसक्तिरिति वाच्यं। तादृशाभावस्य घटत्वेन वाच्यत्वाभावाभिन्नतया समनियतत्वाभावेऽप्यमने
नैवातिव्याप्तेस्तदभिप्रेतत्वात्। नन्वेवमपि पृथिव्यवृत्तित्वावच्छिन्नाभावत्वातिव्याप्तिवारणाय प्रतियावदंतर्गतत्वादिति वाच्यं। तस्यापि सा
मानाधिकरण्यसंबंधेन पृथिवीभेदविशिष्टाभावरूपत्वात् परंत्वेतादृशरीत्याऽतिव्याप्तिवारणाय तरावेत्यादिग्रंथानंतरमेवैतद्ग्रंथस्योचि
तनयासंदर्भविरोध इति स्वयं संबंधाविवक्षायामेवावतारितः तथा च दिष्टत विशेषणतायाः देऽधिकदभिप्रेतत्वमात्रेति बोध्यं। मूर्तमा
त्रस्यादिगुणाधित्वेऽप्रलयेपरमाणुमादाय दिवि आगपत्तिभिमा हेत्वंतरानुसरणं प्रतिव्याप्तिरिति। रूपसामान्याभावाभावात्मनोरू

२४

टी॰अ॰मंजू॰ यस्य ध्वंसात्मकप्रतियोगिसमानाधिकरणत्वादित्याशयः। अवयवरूपकत्वादिति। एतत्त्वस्य पृथिव्यन्यत्वाधिकरणत्वाभावस्य घटत्वेन पृथिव्यन्य
५६ त्वाभावस्य वा भावभिन्नस्य लक्षणघटकत्वादिति भावः। महाप्रलय इति। परमाणौ चरमक्रियातो विभागः ततः परमाणुद्वयसंयोगना
शः ततो द्व्यणुकनाशस्त्र्यणुकपरमाणुसंयोगो ततो द्व्यणुकनाशाधीनत्र्यणुकनाशः संयोगाधीनक्रियानाशश्चानन्तरं आश्रयनाशात्परमाणु
त्र्यणुकसंयोगनाशरूपो महाप्रलयः। पीलिवति। परमाण्वित्यर्थः। तदसंभवात्। अवयवविनिपाकासंभवात्। एकदेशेति। यद्यपि रूपादेः प्रतियो
गिनः स्वाश्रयताभावविरोधितानिर्वाहायैकदेशावच्छेदकं स्व [illegible] ध्वंसादौ तु एकदेशावृत्तित्वस्यैव निराका
ङ्क्षतया तदसंगतं तथापि दार्ष्टान्तिके तदनिवेशो तात्पर्यं। अनुमानादिकमेवेति। परमाणुः रूपसामान्याभाववान् नित्यरूपवद्भिन्नत्वा
दित्यनुमाने लाघवेन साध्ये प्रलयकालावच्छेद्यत्वं भासते एवं प्रलये परमाणो रूपं नास्तीति शब्दोपि प्रमाणमित्यर्थः। चक्षुःसंयुक्तेति द्र
व्यान्यद्रव्यसमवेतवृत्त्यभाववचाक्षुषत्वावच्छिन्नप्रतिचक्षुःसंयुक्तयोग्यसमवेतविशेषणता हेतुः द्व्यणुकान्तर्भावेण रूपाभावचाक्षुष
वारणाय संयुक्तं योग्यपदस्य देहलीदीपन्यायेनोभयान्वयः चक्षुःसंयुक्तसमवेतयोग्यविशेषणतया त्रसरेणौ स्नेहपृथक्त्वाद्यभा
वस्य परमाणुवृत्तिद्रव्यत्ववृत्तिमहत्त्वाद्यभावस्य च चाक्षुषवारणाय चक्षुःसंयुक्ते योग्यतोपादानं। तेन चक्षुःसंयुक्तसमवेत एव योग्य
त्वं देयमिति। द्रव्यान्यत्वं नकार्यतावच्छेदके देयमित्यपास्तं। अत एव वक्ष्यमाणव्यभिचारे सौ रोपि संगच्छते चक्षुःसंयुक्तत्रसरेणुसमवेतगुरु
त्वास्पर्शादिविशेषणतया घटादिवृत्तिगुरुत्वविशेषणतया च रूपाद्यभावचाक्षुषवारणाय समवेते योग्यत्वोपादानात् तथा च घटादौ रूपा रा॰म॰
द्यभावस्य चाक्षुषमसंभवीति भावः। नन्वेवमपि वायुनिष्ठस्पर्शविशेषणतया रूपाभावचाक्षुषे उक्तकार्यतावच्छेदकाक्रान्ते व्यभिचारः वायोर ५६

योग्यत्वात्॥ अतः योग्यद्रव्यसमवेतत्वस्य भावचाक्षुषत्वं चक्षुःसंयुक्तयोग्यसमवेतविशेषणतायाः कार्यतावच्छेदकं वाच्यं तथा च न
त्रसरेणुत्वस्याभावचाक्षुषे व्यभिचारः इति द्रव्यान्यत्वनिवेशोऽनर्थकः तथा चोत्पत्तिकाले घटे योग्यद्रव्यसमवेतवृत्तित्वेन रूपसामान्याभा
युक्त वप्रत्यक्षं च चक्षुःसंयोग्यसमवेतविशेषणतया दुर्वारमेव न च समवेतेपि योग्यत्वं विशेषणतया विशेषणं तादृशप्रत्यक्षोपपत्त्यर्थमेव तत्साग
त् उपलक्षणं तत्यात द्विशेषणत्वे नैव तत्सत्त्वप्रत्यक्षे तत्र आह। वस्तुत इति। केचित्तु चक्षुःसंयुक्तसमवेतविशेषणतया नद्यणुके रूपाभा
वचाक्षुषापत्तिः द्रव्यत्वस्य भावचाक्षुषकारणं चक्षुःसंयुक्तविशेषणताया असत्त्वात् अतः कारणाव्यवहितोत्तरत्वं निवेश्यं तावता त्रसरे
णुवृत्तिरूपसामान्याभावचाक्षुषव्यभिचारणा द्रव्यान्यत्वं देयमित्याहुः। रक्तमिति। न च रक्तं नास्तीत्येव न कुत उक्तं। अंतराले रूपाभे गुणप
त्यंताभावपरतादृशप्रतीतेरनुपपत्त्यभावात्। अंतराले रक्ते च तत्स्याद् इष्टापत्तिग्रस्तत्वात्। तस्मात् रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्यान
न्वंतराप्यामे रक्तत्वावच्छिन्नाभामान संबंधन कल्पनमपेक्ष्य ध्वंसादौ रक्तत्वावच्छिन्नप्रतियोगिताकत्वस्यैवान्वेतरां कल्पनमेव सम्यक् कृत
प्यासतिरक्तात्यंताभावात् रक्तध्वंसप्रागभावयोरतिरिक्तात्यंताभावाकल्पने नलाघवादित्यत उक्तं। तत्तदनंतेति। लघुत्वादिति। संबंधांत्र सा
म्येपि रक्तत्वावच्छिन्नप्रतियोगिताकत्वरूपसंबंधिनः तद्व्याप्यवृत्तित्वस्य च कल्पनाया आधिक्यादिति भावः। रक्तं रूपं नास्तीति प्रत्ययस्य
यावत्तत्तद्रक्तरूपव्यक्तिप्रतियोगिकाभावविषयकत्वं शंकते। नन्वेति। अंतराले पामे रक्तरूपध्वंसप्रागभावावेव तदतिरिक्तरूपात्यंताभावा
स्यात तत्र ध्वंसप्रागभावयोः प्रतियोगिनयोः धर्मानवच्छिन्नत्वान्नसद्युपादानं। अंतरालवर्ती रक्तं रूपं नास्तीति प्रत्ययवारणाय प्रतियोगि
नियावत्त्वोपादानं। अभावे यावत्त्वोपादाने तु कुतः प्रसिद्धिः। यत्तत्तत्तु। अभावे भावत्वमुपादेयं परं तु एककालावच्छेदेन संभवदेकाधि

दी·अ·म·
५७

कारण्यापन्नतादृशाभावानामेवाभावप्रत्ययहेतुतयानदोषः अंतरान्त्यामेरक्तं रूपं नास्तीतिनिर्णयेरक्तंरूपमस्तीतिप्रत्ययापत्तिं दीधिति
कारोक्तदूषणंचनिराकुर्वाणानांमतमाह। प्रांचस्त्विति। रूपत्वेति। रक्तरूपत्वेत्यर्थः। तेनरूपाभावादृशायामिसस्यनासंगतिः। मात्रपदं
चोभयाभावादिज्ञानवारणाय। रूपत्वपर्याप्तप्रकारतावच्छेदकताकइत्यर्थः। प्रतिबंध्यग्रहप्रकारकतावच्छेदकधर्मावच्छिन्नप्रकारतो
पादानविशेषाभावबुद्धित्वात्निर्णयस्यप्रतिबंधकतायुक्तिः। संसर्गेति। ध्वंसादिग्रहाय अंतशरक्तोचरक्तरूपप्रकारकबुद्धेर्विरोधि
तयानतथाविधसंसर्गाभावप्रत्ययइतिबोध्यं। रूपत्वमिति। केवलप्रतियोगितायाएवप्रकारकतावच्छेदकसंसर्गत्वादवच्छेदक
त्वानुपगमेप्याहतेः। एतन्मतंदूषयति। अंतरेति। स्वरूपसंबंधरूपावच्छेदकत्वविवेशाभिप्रायेणाशंकते। यद्यपीति। ननुव्याप्यवृत्तित्वाव
च्छेदकत्वंस्वीकार्यमित्यत आह। कथितेति। स्वरूपसंबंधरूपावच्छेदकत्वोक्तौकालोगोमान्गोत्वादित्यादौगवाभावनिष्ठगोसामाना
धिकरण्यस्यसत्त्विकालावच्छेदात्वादितिभावः। एतेनस्वविशिष्टहेत्वधिकरणनिष्ठनिरूपकताकस्वप्रतियोगिसामानाधिकरण्यमित्यर्थो
निरस्तःवैयर्थ्येति। तदनुपादानेकपिसंयोगाभावसाध्यकेसंयोगत्वसाध्याभावप्रतियोग्यधिकरणतायाहेत्वधिकरणताव्यापकत्वेना
व्याप्यप्रसक्तेः। [illegible]चहेत्वधिकरणताव्यापकप्रतियोग्यधिकरणताकत्वमित्येवसम्यक्तथासतिहेतुसामानाधिकरण्यवैयर्थ्यात्। द्रव्यमि
ति। यद्यपिवन्हिमान्धूमादित्यादावपितद्रूपतत्प्रागभावादिकमादायव्याप्तिःसंभवति। तथापिप्रतियोगिवैयधिकरण्याघटितव्यापक
ताकल्पेतत्रनदोषइत्येतावदूरानुधावनंयावत इति। अत्रविशेषणताविशेषसंबंधावच्छिन्नहेतुमद्वृत्तित्वव्यापकस्वनिष्ठप्रतियोगिसामा राम०
नाधिकरण्यघटकप्रतियोगिमन्निरूपिततादृशसंबंधावच्छिन्नवृत्तित्वकत्ववेशान्नदुर्ज्ञेयता। प्रलयस्यप्रमाविशेष्यतायांतर्भावेण ५७

व्यापकताभंगान्नातिव्याप्तिः। एतेन येन येन संबंधेन हेतुमद्वृत्तित्वं तेन तेन संबंधेन तत्सत्त्वे काश्रयत्वं वाच्यं तेन प्रमेयत्वादेः कालिकत
या सत्त्वे कालादौ सत्त्वेपि नातिव्याप्तिरिति निरस्तं। नादेयः लाघवाद्। हाहे त्वधिकरणत्वानि वेति। तत्तल्लक्षणेतान्वद्व्यं विशिष्टसत्त्वाद्
साध्याव्याप्तिवारणार्थं हेतुतावच्छेदकपर्याप्तावच्छेदकताकाधिकरणपर्यंतनिवेशो घटः एनत्वादिसाध्याव्याप्तिः। हेतुनिष्ठाधेयता
या हेतुतावच्छेदकीभूतेतत्त्वत्वे नैव तत्तल्लक्षणवृत्तित्वविशिष्टत्वेनाप्यवच्छेदकतया तत्पर्याप्तावच्छेदकत्वाभावादिति वाच्यं। हेतु
तावच्छेदकव्यापकावच्छेदकताकाधिकरणत्वस्य तदर्थत्वात्। तत्तल्लक्षणावच्छिन्नाधिकरणत्वानीति वार्थः। वस्तुतस्तु निरुक्तहे
तुमद्वृत्तित्वव्यापकत्वस्यानतिप्रयोजनकतया स्वविशिष्टहेत्वधिकरणताव्यापकस्वनिष्ठस्वप्रतियोगिसामानाधिकरण्यनिरू
पकताकत्वं तदर्थः। तेन हेत्वधिकरणत्वानि यावंति तत्सत्त्वे कोश्रयस्य प्रतियोग्यधिकरणकत्वमात्रनिवेशो नैव सामंजस्ये स्वविशि
ष्टपदवैयर्थ्यमिति नशंक्यं। अत्र स्वविशिष्टहेत्वधिकरणताव्यापकप्रतियोगिसामानाधिकरण्यकत्वं विवक्षया नोक्तदोष इति न
सत्। सामानाधिकरण्यस्य हेत्वधिकरणत्वाव्यापकत्वात् परंपरासंबंधस्यावस्य नियामकतया व्यापकताघटकप्रतियोगितानव
च्छेदकत्वात्। केचित्तु। यावत्त्वस्य न्यायकत्वादन्यस्य दुर्वाचकतया स्वविशिष्टसामानाधिकरण्यविशिष्टतया विधाभावत्वव्यापक
तावच्छेदकस्वविशिष्टहेत्वधिकरणावच्छेदेन प्रतियोगिसामानाधिकरण्यत्वधर्मवत्त्वं वाच्यं तदपेक्षया च तादृशाभाववतावच्छेदकस्य प्रति
योगिसामानाधिकरण्यकस्य कत्वतादृशाभावकधर्मनिवेशानमुचितं स्ववैशिष्ट्यावनिवेशो न लाघवात्। तथा सत्यपि गोमान् गो
त्वादित्यादौ गवाभावाधिकरणे प्रमेये गोत्वसामानाधिकरण्यावच्छिन्नाभावसत्त्वेन कपिसंयोगाभावसाध्यके कपिसंयोगरूपसा

टी·अ·म·ज· ध्याभावाधिकरणे कपिसंयोगाभावसामानाधिकरण्यावच्छिन्नाभावासत्त्वात् सत्त्वाज्ञाने इत्यादौ सत्ताभाववति काले सत्तासामानाधिकरण्या
५८ वच्छिन्नाभावासत्त्वाच्च। सामंजस्यात्। गोमान् गोत्वादित्यादौ अतिव्याप्तिवारणाय व्यापकतानिवेशः। तादृशाभावाः ये ये प्रत्येकतत्तद्व्यापकता
वच्छेदकस्वस्वप्रतियोगिसामानाधिकरण्यकत्वेनोपादानात् न धूमवान् वह्नेरित्यादावतिव्याप्तिः। अन्यथा प्रतियोगितावच्छेदकसंबंधादिभे
दात्तवापि कूटनिवेशं विना गतेरित्याहुः। अर्थवत्तादोषवारकतया सार्थकं इदमिति। जन्यमात्रस्य कालोपाधित्वानभ्युपगमे धूमवत्त्व
प्रकारप्रमाविषयत्वाभाववदादायनातिव्याप्तिरिति तु केचित्। दैशिकसंबंधेनापीति। अन्यथा दैशिकविशेषणतयावृत्तित्वनिवे
शादेव दोषोद्धारे शंका स्यादिति भावः। यदि ब्रूयादित्यनेन कालोपाधीनां नाधिकरणत्वं किंत्ववच्छेदकत्वमिति मते स्वरसः सूचि
तः। यदि क्रियैव काल इति मतं तदा प्रलयप्राक्कालीनक्रियायां व्यभिचारी द्रष्टव्यः। उक्तविवक्षानादरे एव विशिष्टे हेत्वधिकरणावच्छेदे
नैयेतदनिवेशो। घटादीति। अपि रूक्तरूपानादरार्थः। तेन गोत्वघटत्वादिना विशेषरूपेणोक्तसामान्यरूपेण वा साध्यत्वेऽतिव्या
प्तिरिति पर्यवसन्नो। कार्यो। चरमध्वंसपक्षकतादात्म्येन प्रलयसाध्यकानुमानेनेत्यर्थः द्रव्यवत्वेनैवेत्यस्य धर्मिण्येवान्वयात्।
तत्र ब्रह्मणो [illegible]र्षशतं खंडप्रलय इत्यागमोपि प्रमाणं यद्यपि कार्यद्रव्यध्वंसः खंडप्रलयः सर्वकार्यध्वंसो महाप्रलय इत्यन्यत्रो
क्तं तथापि खंडप्रलयस्य कार्यद्रव्यवत्तायाः अनुपदं वक्तव्यतया महाप्रलयस्य स्वात्मककार्याधिकरणत्वाच्च द्रव्यपदं ध्वंसा
न्यत्वस्य कार्यविशेषणस्य लाभाय। खंडप्रायावृत्तिरिति। एतद्ध्वंसाउप्रलयावृत्तिरित्यर्थः। तत्प्रलयावृत्तिरितियावत्। तेन खं राम०
उप्रलयसामान्यावृत्तेः वृत्तिमतोऽप्रसिद्धत्वेपि न क्षतिः। तत्पभिन्नत्वप्रकारप्रमाविशेष्यत्वाभावस्याभावप्रतियोगिकतयाऽतिर ५८

रिक्तत्वमतेवस्तुतइत्युक्तं। अयंपक्षोनवीनैर्दूषितइति अन्यत्र विस्तरः। हेत्वधिकरणइति। ननु धूमवान्वह्नेरित्यादौ हेत्वधिकरणवृत्तेरयोगोलका
न्यत्वसामान्याभावस्य व्यापकतावच्छेदकप्रतियोगिताकयावदभावांतर्गतस्य केनापि संबंधेन प्रतियोगिवृत्तित्वाभावादतिव्याप्तिवारणसंभवे
दैशिकविशेषणतया प्रतियोगिवृत्तित्वकथनमसंगतं। न च तदयोगोलकान्यत्वसामान्याभावतदयोगोलकावृत्तिसामान्याभावायोगोलक
भिन्नभेदानांमैक्यसादैश्येनायोगोलकान्यत्वाभावस्य कालिकसंबंधेन धूमादिरूपप्रतियोगिवृत्तित्वात् अतिव्याप्तिरतो दैशिकविशेषणतयेत्यु
क्तमिति वाच्यं तथापि तादृशाभावप्रतियोगिन्ययोगोलकत्वरूपाभावस्य सत्त्वेनातिव्याप्तेः तद्वारणाय व्यापकतावच्छेदकप्रतियोगिताश्रयवृत्तित्वं
वाच्यं तत्रापि प्रतियोगिभेदेन प्रतियोगिताभेदपक्षोऽवलंबनीयः। अन्यथायोगोलकनिष्ठप्रतियोगित्वस्य व्यापकतावच्छेदकत्वेन पुनरतिव्याप्त्यापत्तेः
इत्थं च धूमनिष्ठप्रतियोगित्वस्य न व्यापकतावच्छेदकत्वं किंतु योगोलकान्यत्वमात्रनिष्ठप्रतियोगित्वस्य। अयोगोलकावृत्तित्वावच्छिन्नप्रतियोगित्वेना
तिव्याप्त्यभावादिति चेन्न। तद्धूमवान्वह्नेरित्यत्राति योगोलकान्यत्वाभावस्य दैशिकविशेषणतया धूमवन्निष्ठत्वाभावात् तदाश्रये योगोलकान्य
त्वे केनापि संबंधेनायोगोलकत्वस्य वृत्तित्वाभावेनाव्याप्तिवारणाय दैशिकविशेषणतासंबंधनिवेशस्यावश्यकत्वात्। अन्यथा तादृशप्रतियोगिता
श्रये तद्धूमे कालिकसंबंधेन तस्य वृत्तित्वादतिव्याप्तेरिति। एवं वह्निमान्धूमादित्यादौ तत्तद्धूमावयवसमवायमादायाव्याप्तिरतः तेनैव यत्सामानाधिकरण्यंपनि
वेश्यं। न चैवं व्यभिचारिस्थानान्यत्वाभावो न लक्षणघटकः स्यादिति वाच्यं। तत्तदयोगोलकवृत्तित्वरूपध्वंसवदन्यत्वाभावस्य व्यभिचारनिरूपकतावच्छेद
कधर्मप्रकारकप्रमाविशेष्यान्यत्वाभावस्य वा तथात्वात् तस्य प्रतियोग्यवृत्तित्वेनातिव्याप्त्यभावात्। प्रतियोगिवैयधिकरण्याघटितव्यापकतां निवेश्ये
वेतल्लक्षणकरणात् वह्निसंयोगध्वंसाभावमादाय न वह्निमान्धूमादित्यादावव्याप्तिः द्वितीयलक्षणेऽप्येतादृशनिवेशो वाच्यस्तत्तेन रूपेण व्याप्यत्व

27

त्तिवाच्यत्वाभावमादाय दोषो बोध्यः। नन्वेतद्दोषवारणाय प्रथमलक्षणे वैशिष्ट्यानवच्छिन्नप्रतियोगिकत्वं निवेश्यं द्वितीयलक्षणे च तत्र विशिष्टावृत्तिप्रतियोगि
त्वमित्यत आह। दिगिति। तथापि वाच्यत्व घटत्व भेदो भयाद्यभावमादाय व्याप्तिलक्षणान्तरत्वं वा दिगर्थः। यथासन्निवेशइति। ननु घटत्वाभाववा
न्मेयत्वादित्यादौ घटत्वात्मनः अधिकरणधर्मावच्छिन्नसाध्याभावस्य वा पूर्वलक्षणावृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिनः घटत्वाभावप्रकारकत्ववि
शिष्टज्ञानाभावस्य चेश्वरज्ञानादिरूपप्रतियोगिनः सामानाधिकरण्यादति व्याप्तिरतो व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यमावश्यकं। तथा च
घटत्वाभावप्रकारकयत्किंचिज्ज्ञानप्रमाभावमादाय नातिव्याप्तिः। न च घटत्वाभावप्रकारकज्ञानस्य घटत्वाभावप्रकारतानिरूपितविशेष्यतासं
बंधेनापि व्यापकतयाताभावस्य प्रतियोगितावच्छेदकीभूतेन तेन संबंधेन प्रतियोगिसामानाधिकरण्याभावादति व्याप्तिवारणे प्रतियोगिवैय
धिकरण्यफलमिति वाच्यं। तथा सति धूमवानुयोगिकत्वविशिष्टस्वरूपसंबंधस्य व्यापकताघटकतया तेन संबंधेन घटत्वाभावस्य प्रतियोगप
समानाधिकरणत्वात् एवं धूमवान् वह्नेरित्यादावति व्याप्तिवारणसंभवेन यावत्वनिवेशवैयर्थ्यापत्तेः। तथा च यथासन्निवेशेत्यकीर्तनमसंगतमिति
चेन्नाग्रे धूमेतन तेव्याप्यवृत्तितानिरूपकप्रतियोगितायाश्चलक्षणघटकत्वात् किंचिद्विशिष्टस्वाभावेतरप्रतियोगिसामानाधिकरण्यस्यवादरणी
यत्वात्। अप्रकृतजलादीसदिग्रंथासंगतेस्तद्वारकप्रकारान्तरेणगौरवस्य दुर्वारत्वात् वाच्यत्वस्य पदार्थान्तरत्वपक्षेऽभावप्रदर्शविषयतात्मकत्वेपि
तमाह। गगनत्वेति। अभावस्य स्वसमाधिकरणत्वकीय यत्प्रतियोगिताश्रयवृत्तिप्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेन वृत्तित्वं तदन्य
त्वरूपव्याप्यवृत्तितानिरूपकप्रवेशपक्षे उक्ताभावद्वयवारणाद्दाह। वस्तुत इति। दिगितिदिगर्थस्तु दैशिकविशेषणतया हेतुसामानाधिकर
ण्योपादानेपि पृथिव्यन्यत्वविशिष्टसत्ताद्यभावमादाय दोषस्य निरुक्तव्याप्यवृत्तित्वस्य त्वेन वारणेपि गौरवमिति स्ववैशिष्ट्यमावश्यकमिति। गौरवा

यभावरूपेतिगोत्वाभावस्यधूमव्यापकत्वात्स्वरूपसंबंधेनप्रतियोगिसामा[illegible]धिनोधिकरण्यं नचग्रंथकारमते येन येनेतिनीत्याप्रिये नस्वप्रतियो
गित्वावच्छिन्नव्यापकताघटकयावदंतर्गतसंयोगेनातथात्वस्यादितिभावः नचायोगोलकान्यत्वाभावस्यभावतयातत्रावर्तमानो विशिष्टगोत्वा
भावाभावोतिरिक्तएवस्वीकार्यः। तथाचतस्यप्रतियोग्यसामानाधिकरण्यान्नातिव्याप्तिप्रसक्तिरितिवाच्यं। भावभिन्नत्वस्यैवलक्षणघटकत्वात्। यद्वि
घटत्वेनपर्वतत्वेनभावाभावादिवारणार्थसाध्यवद्वृत्तिभावप्रतियोगिप्रतियोगिकान्यत्वादिरूपंभावभिन्नत्वंमाद्रियतेतदायोगोलकान्यत्वाभावादेरपि
भावभिन्नत्वाज्जलत्वादौसाध्यग्रंथानुस्थितिरेवेत्याहुः। वस्तुतस्तु। अयोगोलकान्यत्वाभावस्यायोगोलकभिन्नभेदरूपतयास्वप्रतियोगित्वावच्छिन्नस्या
योगोलकभिन्नस्यवह्निभेदादेस्वरूपसंबंधेनसामानाधिकरण्यंसंभवतीतिबोध्यं। प्रायेणेति। प्रायेणेति। एकेनैवपाकेनरूपादिगुणोत्पत्तिस्थले तत्प्राग
भावैक्यापत्तिः कार्यभेदस्यकारणभेदप्रयुक्तत्वादस्तु द्वारणाय प्रागभावभेदस्यावश्यकत्वादिति। ननुजलवृत्तित्वविशिष्टगोत्वाभावस्यतादृशगोत्वा
भावरूपप्रतियोगिसामानाधिकरण्यादितिचेन्नादृशातिव्याप्तिरपिद्वितीयलक्षणानुसरणबीजमेवसिद्धांतवागीशभट्टाचार्यैर्धूमाभावा
दिनिष्ठधूमवद्वृत्तित्वविशिष्टगोत्वाभावाभावस्यधूमाभावरूपतयाधूमवान्वह्नेरित्यादावतिव्याप्तेर्द्वितीयलक्षणावतारणात्तद्दोषस्यैतद्दोष
समशीलत्वात्। यत्तुधूमवान्वह्नेरित्यादौजलंगोभिन्नद्रव्यत्वादित्यादौनोक्तरीत्याअतिव्याप्तिः अग्रेस्वन्यूनवृत्तिस्वसमानाधिकरणधर्मानवच्छिन्नत्वस्य
वाच्यत्वात्तत्रन्यूनवृत्तित्वस्यस्वाश्रयवद्वृत्तिभेदप्रतियोगितावच्छेदकतावच्छेदकरूपत्वात्स्वप्रतियोगिताधूमवद्वृत्तित्ववैशिष्ट्योदेश्यतादृशन्यून
वृत्तित्वमेवेतिनातिव्याप्तिरितितत्रस्वसामानाधिकरण्यभेदप्रतियोगितावच्छेदकत्वमेनेन्यूनवृत्तित्वंनतूक्तरूपं अग्रेघटत्वविशिष्टवाच्यत्वाभाव
त्विवनात्तत्रवैशिष्ट्यस्यास्वाश्रयवृत्तिभेदप्रतियोगितावच्छेदकत्वेनतस्यलक्षणाघटकत्वात्। नच्चैनमपिगगनवाच्यत्वोभयाभावतत्रमादायैवम्

२८

व्य·

टी·अ·भेज· धिकरणधर्मावच्छिन्नाभावानुपगमेपि लक्षणसंगतिरस्याभिरूच्यत इति वाच्यं॥ यादृशन्यूनवृत्तित्वप्रवेशेन विशिष्टवाच्यत्वाभावस्य लक्षणघटकताम
६० भिप्रैषिता दृशात्वप्रवेशेनातिव्याप्तेरावश्यकत्वात्। न च धूमवान्वह्नेरित्यादौ घटत्वेन धूमाभावं जलत्वं गोभिन्नद्रव्यत्वादित्यादौ घटत्वेन जलत्वाभावं चा
दायनातिव्याप्तिरिति वाच्यं। समनियताभावैक्य(वेत दृशांकनीयतया तादृशाभावस्य घटत्वे गोत्वाभावस्य योऽभावस्तत्स्वरूपतया गोत्वाभावरू
पप्रतियोगिसमानाधिकरणत्वात्तद्द्वारा संभवादत एव समानाधिकरणधर्मावच्छिन्नाभाव एवैकीकृतः कश्चिदिति चात्राहुरित्यस्वरसाद्विनापरिष्कारान्त
रार्थं समनियताभावैरिति। यत्तु समनियताभावभेदात् जलत्वं गोभिन्नद्रव्यत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नजलत्वाभावमादायैव नातिव्याप्तिः
न हि तस्योक्तरीत्या गोत्वाभावरूपप्रतियोगिसामानाधिकरण्यं संभवति तादृशजलत्वाभावे विशिष्टगोत्वाभावाभावस्यातिरिक्तत्वात्। अन्य
थातस्य प्रतियोगितावच्छेदकप्रतियोगिप्रसिद्ध्या केवलान्वयित्वानुपपत्तेरिति तन्न तथा सति धूमसामान्याभावे तादृशाभावस्यैकत्वेप्यधिकर
णधर्मावच्छिन्नधूमाभावे तादृशाभावस्यातिरिक्तत्वे नातिव्याप्तिवारणसंभवाज्जलत्वादीत्यादिग्रंथानुच्छित्यापत्तेः। तत्तु व्यधिकरणधर्मावच्छि
न्नाभावस्य सर्वक्षणवृत्तित्वविशिष्टस्वाभावरूपप्रतियोगिसामानाधिकरण्यमस्त्येव तादृशप्रतियोगितावच्छेदकविशिष्टप्रतियोगिनासार्ध
मभावस्यावृत्तेः। धादिति जलत्वं गोभिन्नद्रव्यत्वादित्यादावतिव्याप्तिदुर्वारैवेति तन्न। एवं सति धूमवान्वह्नेरित्यादावपि धूमाभावस्य तथावि
धस्वाभावरूपप्रतियोगिसामानाधिकरण्यादतिव्याप्तिः। व्याप्यवृत्तितानिरूपकत्वस्य प्रतियोगिताविशेषणत्वे तु जलत्वादीत्यादिग्रंथानुच्छि
तिरतः किंचिद्विशिष्टस्वाभाववत्तानवच्छिन्नप्रतियोगित्वं निवेश्यमिति नकापि तत्र नातिव्याप्तिः स्यादिति। केचित्तु। ननु जलत्वादिवृत्तित्वविशिष्ट राम०
गोत्वाभाववान् जलत्वादित्यादौ व्याप्तिः। साधनसमानाधिकरणस्य धूमाभावस्य साध्यव्यापकतावच्छेदकगोत्वाभावनिष्ठप्रतियोगिताक ६०

त्वेनयावदंतर्गतस्यस्वविशिष्टहेत्वधिकरणावच्छेदेनवैशिष्ट्याद्यनवच्छिन्नप्रतियोगिताश्रयसामानाधिकरण्याभावात्। आवश्यकश्च प्रतियो
गिसामानाधिकरण्यघटकप्रतियोगितायांस्ववैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नत्वनिवेशः॥ अन्यथाधूमाभावादेः धूमा[redacted]वद्वृत्ति
त्वविशिष्टव[?]स्याद्यभाववन्हिधूमोभयाद्यभावरूपतयाऽतिव्याप्तिः। नचैवं पूर्वक्षणावृत्तित्वविशिष्टवह्न्याद्यभावस्यवन्हिघटोभयाभा
वस्यच यावदंतर्गतस्य वैशिष्ट्याद्यनवच्छिन्नप्रतियोगित्वाप्रसिद्धाऽसंभवइतिवाच्यं। वैशिष्ट्याद्यनवच्छिन्नत्वेनहेतुमद्वृत्त्यभावप्रतियोगिता
यांविशेषणीयत्वात्। एवंचव्यधिकरणधर्मावच्छिन्नाभावानुपगमेपिवैशिष्ट्यव्यासज्यवृत्तिधर्मावच्छिन्नाभावमादायेवलक्षणागमनसं
भवात्। प्रतियोग्यवृत्तिश्चेतिग्रंथावतारानुपपत्तिरित्यपिसमाहितमतआह। जलादीति। तथाचतादृशाभावस्यहेतुसमानाधिकरण्यान्नाव्या
प्तिरितिभावः। नचप्रतियोगितावच्छेदकभेदस्याभावभेदनियामकत्वात्कथंतादृशगोत्वाभावस्यजलत्वाभावरूपत्वमितिवाच्यं। प्रमानि
यताभावान्नामभेदादित्याहुः। परेतुवन्हिमान्नद्योगोलकत्वादित्यादावव्याप्तिः। वन्हिव्यापकतावच्छेदकगोत्वाभावनिष्ठप्रतियोगिताक
धूमाभावस्यधूमासामानाधिकरण्यात्॥ नचगोत्वाभावरूपप्रतियोगिसामानाधिकरण्यंसंभवतीतिवाच्यं। स्वप्रतियोगिसामानाधि
करण्यघटकप्रतियोगित्वस्यस्वसमानाधिकरणवृत्तिर्यःसमानाधिकरणधर्मस्तदनवच्छिन्नत्वेनविशेषणीयत्वादन्यथाधूमवद्वृत्तित्ववि
शिष्टगोत्वाभावाभावस्यधूमाभावरूपत्वेनातिव्याप्तेरित्यतआह॥ जलादीति। तथाचश्चेतिचेतत्पूर्वापरदलयोःप्रतियोगितावविशेषणनिवेशान्ना
व्या[redacted]प्तिव्याप्तीइतिप्राहुः। यत्तुस्वविशिष्टत्वानुक्तौवन्हिमान्धूमादित्यादौमहानसीयधूमाभावेजलवृत्तित्वविशिष्टगोत्वाभावाभावस्याधिक
रणरूपतयातस्यहेत्वधिकरणमहानसावच्छेदेनप्रतियोगिसामानाधिकरण्याभावादव्याप्तिःकथंनोक्तइत्यतोजलादीतितन्नास्ववैशिष्ट्यो

त्तिकल्पेतस्यसत्वविशिष्टहेत्वधिकरणावच्छेदेनगोत्वाभावरूपप्रतियोगिसामानाधिकरण्यसंभव[illegible]वेनाव्याप्यसत्वात्प्रतिक्षेपवैयर्थ्यात्। केचित्तुसत्व
विशिष्टत्वानुपादानेगोभिन्नद्रव्यत्ववान्वह्नेरित्यादौहेतुसमानाधिकरणस्यसाध्यव्यापकतावच्छेदकतादृशगोत्वाभावनिष्ठप्रतियोगिताकस्यध
माभावस्यसाध्यव्यापकतावच्छेदकप्रतियोगिताकत्वाभावादेवनाव्याप्तिरितिसानोक्तेतिभावइतिवदंतितन्न। धर्माभावस्यतादृशगोत्वाभावा
प्रतियोगित्वेपिधर्मवद्वृत्तित्वविशिष्टगोत्वाभावाभावमादायाव्याप्तेस्तद्वारणस्यैवतत्पदप्रयोजनत्वसंभवात्। ननुतादृशगोत्वाभावाभाव
स्यधर्माभावरूपत्वेपिव्यापकताघटकयावदंतर्गतसंयोगेनप्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरितिचेन्न। स्वाधिकरणसंबंधेनवा
च्यत्वाभावमादायसर्वत्रापिलक्षणसमन्वयसंभवात्प्रतियोग्यवृत्तिश्चेतिग्रंथावतारानुपपत्त्याप्रतियोगितावच्छेदकसंबंधेनैवप्रतियोगिसामा
नाधिकरण्यस्योक्तत्वादिति। अव्याप्तिवारकत्वादिति। स्वाश्रयनिरूपितत्वसंबंधेनहेतुसामानाधिकरण्यंप्रतियोगिताविशेषणं। हेतुसमानाधि
करणाभावीयत्वमितिपालितार्थः। नन्वेवंजलादिवृत्तित्वविशिष्टगोत्वाभावाभावस्यधर्माभावरूपत्वेप्यदोषात्तत्प्रतिक्षेपासंगतिरित्यतआ
ह। जलादाविति। वस्तुगतिमिति। जलादिवृत्तित्वविशिष्टगोत्वाभावाभावोधर्माभावरूपइत्यतिव्याप्तेः। वीप्सयावारणेपिप्रतिपत्सार्थमेवता
दृशाभावोधर्माभावः किंतुजलत्वाद्यभावरूपइतितस्यवस्तुस्थितिकथनमित्यर्थः। अप्रतीकारइति। नचायोगोलकभेदेनधूमाद्य
भावमादायैवनातिव्याप्तिः। अयोगोलकभिन्नत्वेनप्रमेयसामान्याभावस्यक्वचिदप्यवृत्तेः संयोगसंबंधावच्छिन्नतदभावस्यतदन्यात्मकत्वाच्चेतिवाच्यं।
अयोगोलकान्यत्वेनवह्निधूमोभयाभावमादायातिव्याप्तेः संभवादिति। भिन्नत्वादिति। अ[illegible]न्यत्वसामान्याभावत्वेप्रतियोगित्वाभेदेपिधर्मभिन्न
त्वेनधर्माद्यभावीयप्रतियोगितायाअयोगोलकवृत्तितानवच्छेदकत्वान्नातिप्रसंगः। धर्मभिन्नत्वेनवह्निधूमोभयाभावप्रतियोगितातुभिन्नैव।

तदभावस्य वह्निमद्वृत्तित्वापत्त्या प्रतियोगितावच्छेदकभेदात्। एकधर्मावच्छिन्नप्रतियोगिताया एवैकत्वादित्यपि दूष्यं भिन्नत्वादिति। तत्र
धूमनिष्ठप्रतियोगितानां साध्यव्यापकतानवच्छेदकत्वेपि तथापि उभेदाभावमादायैव नातिप्रसंगः प्रतियोगिभेदे न प्रतियोगिता
भेदानंगीकारे तु उक्तास्वरसादेव द्वितीयलक्षणारंभ इति भावः। एतच्च युक्तिमनुरुध्य। अन्यथा पुनः प्रमेयमात्रवृत्तिप्रतियोगित्व
धूममात्रवृत्तिप्रतियोगितानां तदंगीकारेण समाधानं बोध्यं। नन्वेवं साध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकयद्यत्प्रतियो
गिताकोऽभाव यदधिकरणावच्छेदेन यत्र कुत्रचित्तत्प्रतियोगिताश्रयसामानाधिकरण्यं। यदधिकरणावच्छेदेन तत्प्रतियोगिता
श्रयवत्त्वानतत्त्वमेवाभिमतत्वमित्यस्यैव सम्यक्त्वे यत्सामानाधिकरण्यत्वादिविशेषणानां वैयर्थ्यमित्यतः। तादृशप्रतियोगि
ताद्वयमात्रव्यप्रतियोगितायां यावत्त्वपरिसत्त्वप अभाव एव तत्सर्वेऽपि यथाश्रुतानुसारेणाह। वस्तुत इति। वह्निमान्धूमादित्यादौ घट
त्वेन प्रमेयाभावस्य यावदंतर्गतस्य स्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगित्वाप्रसिद्धिरतः साध्यव्यापकतावच्छेदकप्रतियोगितायां अन
वच्छिन्नत्वान्तनिवेशः। अत्र च जलत्वादीत्यादिग्रंथो नासंगतः साध्यव्यापकतावच्छेदकीभूतस्य स्वन्यूनवृत्तिधर्मानवच्छिन्नप्रतियोगिता
कधूमाभावस्य तादृशप्रतियोगिताश्रयगोत्वाभावसामानाधिकरण्यादिति। यद्यपि साध्यव्यापकतावच्छेदकीभूततादृशप्रतियोगि
ताकवह्निधूमोभयाभावाभिन्नस्य धूमाभावस्य तादृशप्रतियोगिताश्रयसामानाधिकरण्यमादायातिव्याप्तिः। तथापि वह्निधूमोभयत्वे
न प्रमेयाभावत्वस्यापि वह्नित्वरूपन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वान्न दोषः। घटान्यत्वविशिष्टसंयोगवान् द्रव्यत्वादित्यादौ घटा
न्यत्ववैशिष्ट्यस्य न्यूनवृत्तितया साध्यसामा[illegible]न्याभावस्य लक्षणाघटकत्वेऽपि व्यभिचारिरूपगगनान्यत्वाभावमादाय नातिप्रसंगो धर्मि

30

घटत्वेनधूमाभाववद्धूमत्वेनवह्न्यभावयोः

टी·अ·मं·जू·म· वच्छिन्नेसत्त्रपर्याप्तेरनिवेशात्।यद्यपिचैवंयादृशपदंसमर्थंधूमाभावस्यवह्निधूमोभयाभावाभिन्नत्वेपितत्प्रतियोगितायाःउक्तरीत्यादुर्द्धर

६२ त्वात्।तथापिधूममात्रवृत्तिप्रमेययात्रवृत्तिप्रतियोगिताद्वयानंगीकारपक्षेघटत्वेनधूमाभावस्यघटत्वेनवह्न्यभावतयावह्न्यासमकेप

योगिसमानाधिकरणतयाऽतिरतीयादृशेति।वस्तुतस्तु।धूमोसामान्याभावादेरुक्तरीत्याप्रतियोगिताद्वयांगाकारेपिधूमवद्वृत्तित्वविशिष्टा

भावाद्यभेदोनोपपद्यतव्यः।अन्यथासाध्यव्यापकतावच्छेदकतादृशविशिष्टनिष्ठप्रतियोगिताकस्यतस्यतादृशप्रतियोगिताश्रयसमानाधिकर

णतयाप्रतियोगितायांयावत्त्वासत्त्वेनयादृशपदोपादानेप्यतिप्रसंगात्धूमाभावस्यघटत्वेनवह्न्यभावादिप्रतियोगिसमानाधिकरणतयातिव्या

प्तेर्यादृशेति।स्वस्वप्रतियोगिसामानाधिकरण्यनिवेशेगौरवात्।अथवाप्रतियोगिभेदेनप्रतियोगिताभेदपक्षेधूमाद्यभावस्यलक्षणघट

कत्वार्थयद्रूपावच्छिन्नार्थकंयादृशेति।एवंचात्रापिप्रतियोगितायाअतिरिक्ततामतेतुल्ययुक्त्यातथापिविद्यप्रतियोगिताद्वयांगीकारेपिनि

स्तारहस्यनादेयांइदंतुचिंसतैं[redacted]धूमभिन्नत्वेनधूमाभाववह्निभिन्नत्वेनवह्न्यभावाद्योश्चैकत्वेपियद्यदर्थांगतधूमनिष्ठप्रतियोगितामादा

यातिव्याप्तिप्रसक्तिः।नचैसादिशंकायाएवाऽनतारात्समाधानद्वयमप्यसंगतमिति।स्वन्यूनवृत्तित्वंचस्वसमानाधिकरणाभेदप्रतियोगि

तावच्छेदकत्वेसतिस्वसमानाधिकरणत्वं।तेनव्याधिकरणधर्मावच्छिन्नाभावसंग्रहः।नचलाघवात्साध्यतावच्छेदकव्यापकस्वन्यूनवृत्तिधर्मा

नवच्छिन्नप्रतियोगिताकाभावएवनिवेश्यः।नतुयथोक्तइतिवाच्यं।भूतत्वमूर्तत्वोभयसद्दिसाध्यकेतिव्याप्तेः।प्रतियोगिभेदेपिप्रतियोगिता राम०

याएकत्वात्।नचमूर्तत्वादिस्वन्यूनवृत्तिधर्मावच्छिन्नप्रतियोगिताकतयाऽभावाऽप्रसिद्धेर्नातिव्याप्तिरितिवाच्यं।घटान्यत्वविशिष्टसंयो ६२

गवान्घटत्वादिसाध्यकसादौघटान्यत्वविशिष्टस्यन्यूनवृत्तितयाघटत्वादिनासंयोगाभावमादायाति[redacted]व्याप्तेर्न्यूनवृत्ति

(१ स्वात्मकस्वरूपसंबंधावच्छिन्नवत्त्वतयाभावस्यव्यधिकरणसंबंधावच्छिन्नत्वादिह१)

धर्मावच्छिन्नेऽन्यत्र तत्पर्याप्तिप्रवेशावश्यकत्वात्। स्वात्मकेति। प्रतियोगित्वे व्यधिकरण्याघटितव्यापकत्वे तद्घटितत्वकल्पे तु धूमवदनुयो
गिकत्वविशिष्टस्वरूपसंबंधः। न चैवमपि तद्धूमवान्वह्नेरित्यादौ उक्तसंबंधेन तद्घटितव्यापकत्वाप्रसिद्धिरिति वाच्यं। तत्रायोगोलकाद्य
नुयोगिकत्वविशिष्टस्वरूपसंबंधेन तत्प्रसिद्धेरिति दिक्। यावंतरुयस्य स्येति। नन्वेवमपि धूमवान्वह्नेरित्यादौ घटत्वादिना वाच्यत्वाभावस्य
धूमवदनुयोगिकत्वविशिष्टस्वरूपसंबंधेन प्रतियोगिसामानाधिकरण्याभावादतिव्याप्तिविरहेऽपि तद्वह्निमान्धूमादित्यादावतिव्याप्तिः।
घटत्वादिना वाच्यत्वाभावस्य घटत्वादिनामहानसत्त्वप्रकारकप्रमाविशेष्यत्वाभावाभावरूपतया तस्य व्यापकताघटकीभूतधूमवद

ननु व्यधिकरणधर्मावच्छिन्नाभावासत्त्वेऽपि सर्वत्र सद्धेतौ घटत्वादिविशिष्टवाच्यत्वाभावं गगनत्ववाच्यत्वोभयाभावं वा स
मादाय प्रोक्तलक्षणासमन्वयसंभवात् सतीयोगपवृत्तिश्रेति मूलावतारानुपपत्तिः॥

नुयोगिकत्वविशिष्टस्वरूपसंबंधेन प्रतियोगिसामानाधिकरण्यसत्त्वादतो पावसद्मावरूपकं। न च तद्वह्निरूपसाध्यवद्व्यक्तिव्यभिचार
निरूपकाधिकरणाय किंचिद्व्यक्तिएतन्द्रमतरानुयोगिकत्वविशिष्टस्वरूपसंबंधस्यापि व्यभिचारनिरूपकतत्तद्व्यक्तित्वाद्यभावनिष्ठव्या
पकताघटकत्वात्तेन संबंधेन व्यभिचारनिरूपकव्यक्तमतरावच्छेदेन प्रतियोगिसामानाधिकरण्याभावान्नातिव्याप्तिरिति तत्पदं वैय
र्थ्यमुद्धरमेवेति वाच्यं। तद्धूमवान् तद्धूमवदेतद्व्यक्त्यन्यतरत्वादित्यादावतिव्याप्तिः। घटत्वप्रकारकप्रमाविशेष्यत्वाभावनिष्ठव्यापकता

31

टी·प·मं·न· अ· घटकेनरातदन्यतरानुयोगिकस्वरूपसंबंधेन प्रतियोगिसामानाधिकरण्यसत्वादिति यावत्पदाचव्यापकत्वात्तत्रासत्तिसाध्याभावादिकमादा
६३ यातिव्याप्त्युद्धारादिति चेन्न। व्यभिचारनिरूपकान्याधिकरणवृत्तित्वविशिष्टस्वरूपसंबंधेन वाच्यत्वस्यैव व्यापकत्वात्तेन संबंधेन हेत्वधि
करणावच्छेदेनातथात्वान्नातिव्याप्तिरिति। तत्पदवैयर्थ्यापत्तिः। अत्र विशिष्टाभावादीनां वैशिष्ट्यादिप्रतियोगिकत्वे प्रथमं विशिष्टादिप्रति
योगिकत्वे द्वितीयमिति नव्याः। व्यधिकरणधर्मावच्छिन्नाभावविशिष्टाभावादिघटितत्वात्तेन प्रथमं तत्र व्यधिकरणधर्मावच्छिन्नाभावा
नुपगमे स्ववैशिष्ट्यनिवेशे विशिष्टाभावसंभवस्यानुशये न द्वितीयमिति ग्रंथद्वयमतः। घटत्वादिविशिष्टवाच्यत्वाभावमिति। नन्वेतद
संगतं। साध्यव्यापकतावच्छेदरूपावच्छिन्ने सत्त्वप्रयोजनाभावेन पर्याप्तिनिवेशात्तादृशाभावस्य वाच्यत्वत्वरूपव्यापकतावच्छेदक
प्रतियोगितावच्छेदकतया वाच्यत्वत्वरूपतदवच्छिन्नसामानाधिकरण्यसंभवेन लक्षणासमन्वयसंभवात्तन्मूलावतरणानुपपत्तिता
दवस्थ्यादिति चेन्न। स्वरूपसंबंधावच्छिन्नप्रतियोगिकत्वलाभायैव वाच्यत्वनिवेशात् न तु अव्यावर्त्तकवाच्यत्वत्वेन निवेशाद् असंग
त्यभावात्॥५४॥ ॥६॥

(१ वह्निध्वंसात्यन्ताभाववत् घटवृत्तित्वविशिष्टवाच्यत्वाभावसत्तदाप्याहु १)

राम·
६३

॥वस्तुतस्तु धूमवान्वह्नेरित्यादौ धूमवद्वृत्तित्वविशिष्टगोत्वाभावाभावस्योक्तरीत्या धूमाभावतया गोत्वाभावरूपप्रतियोगिसामानाधिकर
ण्यादतिव्याप्तिरित्यवतारणं सम्पूर्णावस्तुतस्त्वासमनियताभावे । कपिसंयोगी गोत्वकान्यवृत्तित्वविशिष्टाकाशाभावाभावं धूमवद्वृत्तित्व
विशिष्टघटाभावं चादायातिव्याप्तिरतः प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसामानाधिकरण्यविविक्षणाभावरूपकं । कृत्स्नं च
प्रतियोगितावच्छेदकतावच्छेदकरूपमात्रावच्छिन्नानि वेश्यं । तेन विशिष्टाभावोभयाभावादिकमादाय नासंभवः । एवं च घटवृत्तित्वविशि
ष्टवाच्यत्वाभाववाच्यत्वगगनत्वोभयाभावादेर्न लक्षणाघटकता दृशविशिष्टत्वस्य तादृशोभयत्वस्य चाव्यापकतानवच्छेदकत्वादिति ग्रं
थसंगतिः । यद्वा योगोत्वकान्यवृत्तित्वविशिष्टाकाशाभावाभावादेः प्रतियोगितावच्छेदकत्वाघवाद्विशिष्टमेव न त्वाकाशाभावत्वा
दिकमपीष्यते व्याप्यप्रसक्त्या न प्रतियोगितावच्छेदकतापर्याप्तिपर्यंतनिवेश इत्यव्याप्यमावान्वतास्वरूपमात्रावच्छिन्नत्वनिवेशास्त्वुच्यते
तदोभयाभावमादायासंगतिः सुधीभिः परिहरणीयावन्हिमानिति । यद्यपि सर्वत्र घटादिवृत्तित्वविशिष्टगगनाभावाभावमादाय लक्षणागमवा
दसंभवस्तथापि गगनाभावत्वप्रकारकप्रमाविशेष्यतावान् गगनाभावस्तत्त्व्यक्तित्वादिसादौ लक्षणगमनादसंभवाभावादस्माभिरिसुक्तं ।
न च तत्राप्युक्तविशिष्टाभावमादायासंभवः । तादृशाभावस्य प्रकृतेऽभावप्रतियोगि[illegible]कत्वेनाभावाधिकरणत्वेनाधिकरणरूपतया
हेत्वधिकरणगगनाभावे तस्य वाच्यत्वत्वेन घटाद्यभावेन सहाभेदे न तत्प्रतियोगितावच्छेदकावच्छिन्नेन सामानाधिकरण्यादसं
भवानवकाशात् न च घटादिवृत्तित्वविशिष्टवाच्यत्वाभावमादायासंभवः इच्छाविषयतारूपवाच्यत्वस्य विषयभेदेन भिन्नत

-टी-अ-ग्र-व्या-

यासाध्यव्यापकत्वाभावादिति प्रतियोग्यवृत्तिश्चेति ग्रंथे। तिनचात्र व्यभिचारावारकत्वे न प्रतियोगितावच्छेदकसंबंधावच्छिन्नत्वव्यर्थमिति वा

६४ च्यं। स्पंदः कालत्वादिसादौ समवायेन स्पंदत्वाद्यभावस्य व्यापकघटककालिकसंबंधेन महाकाले प्रतियोगितावच्छेदकावच्छिन्नसामानाधि

करण्यादिति व्याभिचारवारणार्थं तदावश्यकत्वात्। एवं नित्यज्ञानमीश्वरस विषकत्वादिसादौ समवायसंबंधावच्छिन्ननित्यज्ञानत्वाभावादेर्व्यापकता

घटकविषयितासंबंधेन तथात्वादिति व्याप्तिवारणमपि तत्सकलं बोध्यं। साध्यवदिति। यत्तु वन्हिमान् धूमादिसादौ तथाविधानवच्छेदकाप्रसि

द्धिः सर्वेषामेव साध्यवन्निष्ठाभावप्रतियोगितीयसंबंधांतरावच्छिन्नावच्छेदकत्वात्। यत्किंचिदवच्छेदकभेदनिवेशे व्याप्तिरिति। तन्न। प्रतियो

गितावच्छेदकताघटकसंबंधेन साध्यव्यापकतावच्छेदकताया वाच्यत्वात्। ननु पूर्वकल्पइव व्यधिकरणधर्मावच्छिन्नाभावस्य व्यापकताघट

कत्वेन दोषवारणाय प्रतियोगिवैयधिकरण्यमेव कुतो नोक्तमित्यत आह। नत्विति। प्रतियोगिव्यधिकरणत्वाघटितव्यापकताकत्वेपि घट

त्वादिविशिष्टवाच्यत्वाद्यभावमादाय व्यधिकरणधर्मावच्छिन्नाभावं विनालक्षणसंगतेरिदं चिह्नमिति चेदीदृशाभावानां द्वितीयलक्षणाव

तारबीजत्वेन अप्यमतोऽस्फूर्तेः। जन्येति। ईश्वरीयतादृशाबुध्यभावस्यासत्वात्तत्र न हेतुसामानाधिकरण्यमित्याशयेन। तच्छब्दादेर्हेतुवे

तच्छब्दोऽसंस्तिकालोत्पत्तिकतादृशबुद्धिमादाय बुद्धिविषयत्वसामान्याभावस्य न हेतुसामानाधिकरण्यमित्यतः यत्किंचिदिति। तत्रापि पूर्वो

सत्तिकालोत्पत्तिकबुद्धिमादाय बुद्धिविषयत्तरकालीनबुद्ध्युपादानार्थं। एवं च तस्याः प्रमेयत्वाकारकत्वेपि न क्षतिः। तस्यातंत्रत्वात्। उक्तेति। स्वरूपसंबंधे राम॰

नसाध्यवन्निष्ठत्वोक्तेः कपिसंयोगात्मकाभावस्य तद्भिन्नसाध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकत्वेपि भावभिन्नत्वाभावादि ६४

स्यर्थः। नन्वेवं चेत्साध्याभिधानमसंगतं प्रतियोगिवैयधिकरण्यघटितव्यापकताकल्पेपि गगनत्वविशिष्टवाच्यत्वत्वस्य व्यापकतानवच्छेदक
त्वात्तदवच्छिन्नाभावस्य लक्षणाघटकत्वाप्रसक्तेः। न च स्वावच्छिन्नानधिकरणेत्यस्य स्वाश्रयानधिकरणेत्यर्थः। एवं च गगनत्वविशिष्टवा
च्यत्वत्वस्य व्यापकतावच्छेदकत्वनिर्वाह इति वाच्यं। तथापि स्वविशिष्टपददानेपि तादृशाभावस्य प्रतियोगितावच्छेदकतापर्याप्त्यधिकर
णपर्याप्त्यवच्छेदकतानिरूपकाधिकरणतावद्वृत्त्यधिकरणतानिरूपिताधेयत्वस्य रूपस्य प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्य
स्याभावेऽव्याप्तेस्तादवस्थ्यादिति चेन्न। प्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्याभिन्नस्य प्रतियोगितावच्छेदकताश्रययत्स्वावच्छे
दकतानिरूपके साध्यर्थकतया गगनत्वविशिष्टवाच्यत्वत्वावच्छिन्नाभावस्य तादृशावच्छेदकताश्रयवाच्यत्वत्वावच्छिन्नसमानाधिकरण
तयाऽसंगत्यभावात्॥ अत एव सत्तावान् जातेरित्यादौ विशिष्टसत्तात्वावच्छिन्नाभावस्यापि यावदन्तर्गतत्वेन तस्य विशिष्टहेत्वधिकरणावच्छे
देन प्रतियोगितावच्छेदकतापर्याप्त्यधिकरणधर्मावच्छिन्नसामानाधिकरण्यासत्त्वेपि नाव्याप्तिरिति। प्रमेयत्वेन गगनाभावो गमेत्याह। गु
र्विति। गुरुधर्मावच्छिन्नेपक्षवृत्तित्वानुमितिरेवोपेयत इत्युक्तावाह। वसेति। दिगर्थस्तु धूमवान्वह्नेरित्यादौ धूमत्वेन घटाभाववह्नित्वेन घटा
भावयोरैक्यादिति व्याप्तिः। प्रतियोगितेत्यपि विवक्षायामपि साध्यतावच्छेदकावच्छिन्न यत्प्रतियोगिताकोभावो यद्धेत्वधिकरणावच्छेदेन सा
ध्यतावच्छेदकसंबंधेन तत्प्रतियोगितावच्छेदकाश्रयसमानाधिकरणाऽइत्यस्यैव सम्यक्त्वादधिकस्य वैयर्थ्यादिति। वह्नित्वेनेति। न चैवं त
दभावस्य कथं धूमाभावरूपत्वं धूमाभाववत्तिवह्नित्वेन धूमकालीनतादृशवह्निसंभवादिति वाच्यं। धूमवद्वृत्तित्वविशिष्टस्याधेयता
संबंधेन धूमवद्विशिष्टस्यैव वा विशेषणत्वात्। तद्विशिष्टाधिकरणतायास्तत्रैवोपगमेन विरोधसंभवात्। न च प्रतियोगितायाः व्या

टी· अ· मंजू· व्या प्यवृत्तितानिरूपकत्वोक्तेः वह्नित्वेन धूमवद्वृत्त्यभावस्य वारणमिति वाच्यं। सत्तावान् द्रव्यत्वादित्यादौ सत्तानिष्ठप्रतियोगितायाव्याप्यवृत्ति
६५ त्वानिरूपकतया सत्ताभावस्य लक्षणाघटकत्वेनाव्याप्यभावेन स्वविशिष्टत्ववैयर्थ्यापत्तेरिति। तद्विशेषणस्य त्याज्यत्वात्। तत्र वह्निधू
मवद्वृत्त्वयोरवच्छेदकत्वमते पर्याप्तिनिवेशो नानतिप्रसंगादाह। धूमीयेति यावत्त्वस्येति। एतस्य साध्यव्यापकतावच्छेदकविशेषणत्वे तु
यावत्त्वं तिव्यापकतावच्छेदकानीत्यर्थः स्यात्। एवं च पर्वतेतिव्याप्तिवारणेपि स्वरूपसंबंधेन प्रमेये र्थ्यातस्य प्रमेयवह्न्यादिसाध्यकेतार
शव्यापकतावच्छेदकप्रमेयवह्नित्वादिरूपगुरुधर्मावच्छिन्नाभावस्य चाप्रसिद्ध्याऽसंभवः स्यादतः तथा नोक्तं। स्वन्यूनेति। न च धूमवान्वह्ने
रित्यादौ धूमीयसंयोगेन द्रव्यसामान्याभावमयोगोलकान्यत्वस्वरूपसंबंधेन भेदसामान्याभावं चादायातिव्याप्तिरिति वाच्यं।
स्वन्यूनवृत्तिधर्मस्यत्र धर्मत्वाविवक्षयाऽनतिप्रसंगात्। तादृशप्रतियोगितायाः स्वन्यूनवृत्तितादृशसंबंधावच्छिन्नत्वेन स्वपदेनो
पादानुमशक्यत्वादिति। इदमत्र विचार्यते। यत्समानाधिकरणइति लक्षणघोर्ज्ञानस्यानुमितिहेतुत्वोपगमेन संभवति। विशि
ष्टा धूमाभावनिष्ठप्रतियोगिसामानाधिकरण्यविषयतायाः कारणतानवच्छेदकत्वे धूमवान्वह्नेरित्यादौ परामर्शस्य प्रमा
त्वापातात्। तत्र धूमाभावेप्रतियोगिसामानाधिकरण्यभानेपि कारणतावच्छेदकविषयस्यवास्तवत्वात्। न च तस्याः कारणतावच्छे
दकत्वमंगीकृत्य सतादृशपरामर्शस्य भ्रमत्वमुपपादनीयमिति वाच्यं। तथा सति धूमाभावोवह्निसमानाधिकरण इति ग्रहदशायां
हेतुसमानाधिकरणयावदभावेषु प्रतियोगिसामानाधिकरण्यावगाहिपरामर्शादनुमित्यनुपपत्तेः। तत्र हेतुसमानाधिकरणत्वेन राम०
धूमाभावभानासंभवात्। न च हेतुसामानाधिकरणत्वेन ज्ञायमानयावदभावेप्रतियोगिसामानाधिकरण्यप्रकारितायाजनक ६५

तावच्छेदकत्वोपगमान्नानुपपत्तिरिति वाच्यं। अनंतकार्यकारणभावप्रसंगादिति चेन्न। यद्‌ तत्तदभावप्रतियोगिसामानाधिकरण्यावगाहितानां
हेतुतावच्छेदकत्वमुच्यते तत्तद्विनिगमनाविरहेण। एकस्यैवगाहितावि शिष्टापरावगाहितानां प्रत्येकं तथात्वप्रसंगेन स्यादप्येतादृशरूप
नुपपत्तिस्तथैवलुप्तसामानाधिकरणधर्मावच्छिन्नाभावे हेतुसामानाधिकरण्यग्रहदशायां तदन्ययावदभावेषु प्रतियोगिसामानाधिकरण्य
प्रकारकप्रमाणत्वाद्‌ अनुमित्यनुपपत्तेरुक्तत्वात्। किंतु प्रतियोगिसामानाधिकरण्यादिविशिष्टाभावत्वावच्छेदेन प्रतियोगिसामानाधिकरण्या
दिप्रकारकज्ञानत्वेन हेतुत्वं। एवं च घटाभावाभाववान्‌ ह्रदसमानाधिकरण इति ज्ञाने प्रयुक्तकारणविरहादीदृशानुमित्यनुपपत्तिः। नन्वेवमपि सामा
न्यतः प्रतियोगिसामानाधिकरण्यघटकप्रतियोगित्वस्य वृत्तिमन्मात्रवृत्तितया स्वस्वप्रतियोगिसामानाधिकरण्यनिवेशे पुनरननुगमो
दुर्वार इति वाच्यं। प्रतियोगिसामानाधिकरण्ये त्यनेन स्वनिरूपकत्वस्वाश्रयसामानाधिकरण्योभयसंबंधेन प्रतियोगितावत्वस्य वाच्यत्वा
त्। प्रतियोगितात्वेन न निवेशोपि अप्रामाण्यांतरस्य प्रतियोगित्वांतरनिरूपकत्वविरहेणैवादोषात्। नन्वेवमपि स्वविशिष्टे स्वत्वस्य पदार्थ
तयात तत्तभावप्रवेशः। तदात्म्यस्य विशिष्टाधिकरणतासामानाधिकरण्योभयसंबंधेनाभाववत्वस्योक्तत्वात्। स्वविशिष्टस्य स्वनिरू
[redacted] पितप्रतियोगिता [redacted] श्रयनिरूपितत्वस्वविशिष्टहेतुव्यापकत्वोभयसंबंधेनेति। अत्र वदंति। एवं दलांतरेपीत्युक्तदिशाधिकरण
तायां तत्तदभावप्रतियोगितावच्छेदकसंबंधावच्छिन्नत्वनिवेशादननुगमो दुर्वार इति अत्राहुः। उक्तसंबंधेन स्वनिरूपितप्रतियोगिता
[redacted] श्रयनिरूपितत्वपरित्यज्य स्वनिरूपितप्रतियोगितावत्वं निवेश्यं। तच्च स्वावच्छेदकसंबंधावच्छिन्नत्वस्वाश्रयनिरू
पितत्वोभयसंबंधेनेति। नाननुगमः। एवं स्वविशिष्टहेतुव्यापकत्वमपि स्वविशिष्टहेतुसमानाधिकरणाभावप्रतियोगिताव

34

त·टी·अ·मंज·
६६

छेदकत्वसंबंधेनस्वाभाववत्त्वमतो नाननुगमः॥नन्वेवमपिसाध्यवन्निष्ठाभावीयतत्तत्संबंधावच्छिन्नप्रतियोगितानवच्छेदकस्य
त्रतत्तत्संबंधावच्छिन्नप्रतियोगितेसत्रचाननुगमइतिवाच्यं॥स्वावच्छेदकसंबंधावच्छिन्नत्वस्वावच्छेदकत्वस्वसमानाधिकरणत्वे
तदुभयाभाववत्त्वेतदुभयसंबंधेनसाध्यवन्निष्ठाभावप्रतियोगिताविशिष्टप्रतियोगितायाएवसाध्यव्यापकतावच्छेदकप्रतियोगिता
रूपत्वात्॥साध्यवन्निष्ठाभावप्रतियोगित्वेप्यधिकरणप्रवेशाकल्पेतुतदनुगमश्चिंतनीयइतिनिगर्वः॥छ॥इत्यनुमानमंजूषायां
स्वलक्षणानुगमः॥छ॥ ॥श्री॥

त·म·
६६

॥श्रीगणेशाय नमः॥ ॥सामान्यरूपेण विशेषाभावानुपगमे घटत्वपटत्वाभ्यां घटत्वादिना वा प्रमेयसामान्याभावमादाय प्रमेयवान्
वाच्यत्वादित्यादौ लक्षणसंगतेरुक्तमव्याप्तिरिति। संबंधांतरावच्छिन्नप्रमेयाभावस्य साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिता
कत्वाभावात्। साध्यनिष्ठप्रतियोगिताकत्वसाध्यतावच्छेदकावच्छिन्नव्यापकतावच्छेदकत्वेन साध्यतावच्छेदकव्यापकत्वेन वा विशे
ष्यात् तेन महानसीयवह्न्याद्यभावमादायैव लक्षणगमनेपि न प्रतियोग्यवृत्तित्वेति ग्रंथावतारानुपपत्तिः। वस्तुतस्तु साध्यपदमेव तद्वत्ता
रकं व्यधिकरणधर्मावच्छिन्नाभावानुपगमे साध्यपदघटितलक्षणसंगतेः॥ एवं च तत्तल्लक्षणेपि विशिष्टवह्नित्वावच्छिन्नाभावमादायाव्याप्ति
व्याप्तिवारणं संगतिः। विशिष्टाभावोभयाभावयोर्वैशिष्ट्योभयत्वप्रतियोगिकत्वमते रदं लक्षणं सिद्धांतमते चाग्रिममिति तु नव्याः। प्रति
योग्यसामानाधिकरण्यविशिष्टसाध्याभावः प्रसिद्धानुमानेप्यप्रसिद्धेः अतः प्रतियोग्यनधिकरणवृत्तित्वप्रसिद्ध्या विशिष्टाप्रसिद्धिं वक्तुं वा
च्यत्वसाध्यकानुधावनं। यद्यपि अव्याप्यवृत्तिसाध्यकाव्याप्तिवारणाय प्रतियोग्यनधिकरणहेत्वधिकरणवृत्तित्वमावश्यकं। एवं च प्रसिद्धानु
मानेप्यव्याप्तिः। घटत्वेन वह्न्यभावप्रतियोगिताया अतिरिक्ता। ननु स्वरूपसंबंधयेन तस्या महानसीयवह्न्यादिरूपतया तत्र तदनधिकर
णहेत्वधिकरणं प्रसिद्धमेव। घटत्वेन तत्त्वह्न्यभावमादाय लक्षणसमन्वयो भवतीति चेदेवमपि गगनरूपादिसाध्यकेऽव्याप्तिर्दुर्वारैवेति। केवलान्व
यिसाध्यकानुधावनमफलं। तथापि केवलान्वयिसाध्यके प्रतियोग्यनधिकरणस्यैवाप्रसिद्धिः। अन्यत्र पूर्वोक्तविशिष्टस्येति विशेषमभिप्रे
त्यैव तदनुधावनं। परं तु एतद्ग्रंथामात्रमित्यग्रेस्फुटीभविष्यति। निरवच्छिन्नेति। किंचिन्निष्ठावच्छेदकतानिरूपकत्वसामान्याभावः। तेन कपि
संयोगाभावनिष्ठवृत्तितायामवच्छिन्नत्वघटितोभयाद्यभावस्य घटत्वेनावच्छिन्नत्वाभावस्य च सत्वेपि नाव्याप्तिः। यत्तु कपिसंयोगाद्यभावस्य

३५

प्रमेयत्वाद्यवच्छिन्नवृत्तित्वस्य निरवच्छिन्नत्वान्नाव्याप्तिवारणमिति तदसत्। निरवच्छिन्नवृत्तितावच्छेदकप्रतियोगिताया उक्तत्वात्। वह्नि
त्वेन तार्णतार्णादहनोभयाभावादिवारणार्थमाह। हेत्वधिकरणेति। घटत्वेन वाच्यत्वाभावादिनिष्ठतद्व्यक्तित्वस्यैव व्यधिकरण्येन हेत्वधिकर
णनिष्ठाभावप्रतियोगितावच्छेदकत्वादव्याप्तिरतः सामानाधिकरण्येनेति। साध्याभावत्वादेः अधिकरणधर्मावच्छिन्नसाध्याभावसाधार
ण्येन तदवच्छिन्नाभावाप्रसिद्धेर्व्यावर्तकत्वस्यादतो यदभावव्यक्तित्वमिति। अव्याप्तिरिति। सामान्यरूपेण विशेषाभावानुपगमे विरुद्धघट
त्वपटत्वोभयेनरूपेण प्रमेयसामान्याभावस्य प्रमेयसाध्यके सत्त्वान्नासंभवः। विषयितासंबंधेन यत् किंचित्प्रतियोगिकसंयोगादिनावा
प्रमेयाभावं केचिदाहुः। यद्यपि व्याप्यवृत्तिहेतुसमानाधिकरणाभावीयसाध्यनिष्ठप्रतियोगितानवच्छेदके सुक्तो समनियताभावैक्यम
तेपिनाव्याप्तिस्तथापि तस्य लक्षणांतरत्वात् उर्वारएवप्रकृतलक्षणे दोषः। प्रतियोगितावासज्यवृत्तित्वमतेऽभावं प्रदर्श्य तद्व्यासज्यवृ
त्तित्वमते तं प्रदर्शयति। वह्नित्वेन पर्वतावृत्तेरभावस्येति। तद्व्यासज्यवृत्तित्वमते पूर्वाभावस्य केवलान्वयितानिर्वाहार्थमुभयत्वस्यापि प्र
तियोगितावच्छेदकत्वमावश्यकं। न तत्त्वं पर्वतावृत्तित्वस्यापि तथात्वं प्रयोजनाभावात् अतः अवच्छेदकतापर्याप्त्युपादानेपि नैतदभावव्याव
त्तिः। यद्वा। प्रतियोगितापर्याप्तिमनंगीकुर्वतां वह्नित्वेन वह्निधूमोभयाभावादेर्लोपएव वह्नित्वेन तार्णतार्णोभयाभाववदिति भावः। वह्नि
त्वेन पर्वतावृत्तेरभावस्य वह्नित्वेन तार्णतार्णदहनोभयाभावस्य च यत्किंचित्त्वघटितव्याप्यवृत्तित्वसत्त्वेपि तत्पक्षे वक्ष्यमाणावतारणांतरस
त्वात्तदनिवेशापक्षे तु दोषः अव्याप्तिरिति। रात तद्रूपवानेतद्व्यादिसादेल्लक्षणागमनात्। एतद्रूपत्वेन तद्रूपेत द्रूपतदुभयाभावमादाय दोषस्य प्रति
योगितापर्याप्त्यधिकरणवृत्तित्वरूपसामानाधिकरण्यनिवेशाद्वारणात् समानासमानाधिकरणधर्मावच्छिन्नसाध्याभावासत्त्वाच्चाप्य

७(एतन्मतेप्रतियोगिविशेषस्याप्यवच्छेदकत्वादितितु न। उक्ताभावेपि तस्यावच्छेदकत्वात्)७

न्यूनवृत्तित्वं तत्समानाधिकरणभेदप्रतियोगितावच्छेदकं यद्यत्तदन्यत्वं घटत्वेन वह्न्यभावमादाय व्याप्तिवारणायावच्छेदकमिति। धर्मे
स्य। तन्मात्रस्य प्रतियोगिविशेषणस्यावच्छेदकत्वस्याप्रामाणिकत्वमत एव तस्य तृतीयान्तेनानोल्लेख इति। व्यंजनायसस्यामिसंतासाध्
मिति। अभावस्य तथाविधे न विरोधः। गगनाभावे व्यभिचारात्। किंतु तथाविधेऽभावे सत्रनासत्त्वं। न च विशिष्टसत्ताया विरोधित्वं उर्वचं।
प्रतियोगितावच्छेदकावच्छिन्ननिष्ठतादृशधर्मावच्छिन्नाधेयतानिरूपिताधिकरणतानिवेशे घटत्वेन प्रमेयाभावादौ तत् उर्वचं। तत्रता
दृशधर्मावच्छिन्ननिष्ठप्रतियोगितावच्छेदकावच्छिन्नाधेयतानिरूपिताधिकरणत्वे विरोधित्वात् तदुक्तौ विरोधभेदादननुगम इति वाच्यं। त
च्छरीरे तादृशधर्मप्रतियोगितावच्छेदकोभयावच्छिन्नाधिकरणताया एव निवेशात्। अत एव। उक्तविरोधस्य स्वयमुद्धारकत्वादेव तादृशनि
र्णयसत्त्वेऽपि तादृशप्रत्यययोस्तत्त्वो बीजं दर्शयन्नेव सामान्यधर्मस्यावच्छेदकत्वं साधयति। अन्यथेति। द्रव्याभावादिबुद्धेरप्रतिबध्यत्वाद्वह्नित्वे
ति। वह्नित्वेन वह्निविशिष्टनिश्चयोत्तरं वह्नित्वेन घटाभावप्रत्ययोदयाद्वह्नितिष्ठतीति। धर्मिविशेषणतापन्नवह्नित्वावच्छिन्नप्रतियोगिताक
त्वेन गुंजायां वह्निर्नास्तीति भानेऽपि प्रतियोगितायां वह्निनिष्ठत्वमेवेति स्मर्तव्यं। प्रकारः संसर्गः। द्रव्यवत्तानिश्चयादेः प्रतिबंधकतावार
णाय वह्नित्वेनेति। अवच्छिन्नप्रकारताकत्वं तृतीयार्थः। अथ वह्निमानित्याकारस्य वह्नित्वेन घटादिमत्तानिश्चयस्यापि विरोधितयाव
ह्निविशिष्टत्वसंगतं। न च वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेनाभावबुद्धौ वह्नित्वावच्छिन्नवह्निवृत्तिप्रकारताशालिनिश्चयत्वेन
वह्नित्वावच्छिन्नघटनिष्ठप्रतियोगिताकत्वेनाभावबुद्धौ वह्नित्वावच्छिन्नघटवृत्तिप्रकारताशालिनिश्चयत्वेनेत्याद्रिक्रमेणापृथगेवप्रतिबंधकत्वं प्रति
योगितायां वह्न्यादिनिष्ठत्ववैशिष्ट्यानिकमेवेति सांप्रतं वह्नित्वादिना घटादिभ्रमे सति वह्नित्वावच्छिन्नवह्निनिष्ठप्रतियोगिताकत्वेनाभावबुद्धि

असंगात्। मैवं। प्रकारतावच्छेदकताघटकोयः संबंधः स्वप्रांशे विशेषणतापन्नवह्नित्वनिष्ठत्वसंबंधावच्छिन्नावच्छेदकताकप्रतियोगिकेतो
त्वेनाभाव बुद्धिप्रतीतसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकताप्रकारताघटितनिर्णयत्वेन प्रतिबंधकत्वमित्यर्थः। तद्घटितनिर्णयत्वं च तन्नि
रूपितत्वसंबंधावच्छिन्नवह्नित्वनिष्ठावच्छेदकताकप्रतियोगिताकत्वावच्छिन्नप्रकारतानिरूपितविशेष्यताशालिज्ञानत्वं वह्निनिष्ठपदं दृश
विशेषणत्वस्य वह्निपदं च संबंधस्य लाभार्थमिति न विरोधः। घटत्वविशिष्टवह्निमानिति भ्रमसाधारणं चेदं प्रतिबंधकतांतथाविधरूपेण
वह्न्यभावनिश्चयस्य तथाविधबुद्धौ प्रतिबंधकत्वं तु नोक्तं। द्रव्यत्वेन वह्निविशिष्टबुद्धौ वह्नित्वेन वह्न्यभावबुद्धेरपि विरोधितया प्रकृतासि
द्धिप्रसंगात्। व्यधिकरणधर्मावच्छिन्नाभावस्थले तु वह्नित्वावच्छिन्नघटवृत्तिप्रतियोगिताकत्वेनाभावज्ञानं प्रतिवह्नित्वघटत्वोभयावच्छिन्न
प्रकारतानिर्णयत्वेनेति क्रमेण। वह्निमानित्याकारकवह्नित्वेन घटभ्रमस्या विरोधित्वाय घटवृत्तित्वमुपेक्ष्य घटत्वावच्छिन्नत्वविवेशः। न च
वह्नित्वेन घटवानिति निर्णयोत्तरं वह्नित्वावच्छिन्नघटवृत्तियोगितासंसर्गकस्य वह्नित्वेन पटो नास्तीति ज्ञानस्यानुपपत्तिरिति वाच्यं संसर्गघट
कप्रतियोगिताश्रयस्यैव प्रतियोगित्वेन भानात्। सामान्यरूपेण विशेषाभावस्थले त्वाह। अस्मोकमिति। वह्निविशिष्टेति। वह्नित्वावच्छिन्नप्रकारताके
त्यर्थः। प्रकारतान्यत्वावच्छिन्नत्वं तत्तीयार्थः। एवं च वह्निमान्द्रव्यवानिति ज्ञानस्य न विरोधित्वं। द्रव्यत्वेन वह्निमानिति निर्णयस्य उक्त। रीसावह्नि
नास्तीति धीविरोधित्वमिष्टमेव। नन्वास्तां सामान्यरूपेण विशेषाभावः वह्नित्वेन तार्णतार्णदहनोभायाभावश्च नोपगंतुमर्हः। सौंदरैरेवानुपग
मात्मणिकृष्णिश्चानिराकरणात् विशेषरूपेण सामान्याभावादिश्च व्यधिकरणधर्मावच्छिन्नाभावप्रभेद इति तदंगीकारेण विरोधः। हंत तर्हि त
र्कालंकारणावजल्पैंकुत श्रमितोऽइति चेत् बहुवित्तव्ययायाससाध्यादुःखासंभिन्नानंदात्। श्रवणादिक्रमेण निदिध्यासनसंस्कृतात्तत्वज्ञाना

त्तदधीनान्निश्रेयसाद्यासत्त्वं पंडितमंडलीमध्योपजाततत्ल्पानंदस्पर्द्धीयस्त्वात्। [redacted] एवं च वह्निमानिति निर्णायसत्वे
द्रव्यत्वेन वह्निर्नास्तीति प्रत्ययो नैव भवतीत्याहुः। वह्नित्वेन पर्वतावृत्तेरभावमादाय दोषवारणायाह। सामानाधिकरण्यमभेदइति।। स्वम
वच्छेदकं। अतिव्याप्तिवारणाय भेदकूटं निवेशयति। यद्यदिति।। ननु घटाभावादिप्रतियोगितायाः प्रतियोगिरूपत्वेनासंभव इत्यत आह।।
प्रतियोगित्वं हीति।। अभेदेनेति। आधारताधेयत्वयोरन्योन्यविरुद्धत्वात्। वह्नित्वेन तद्वत्त्वाभावप्रतियोगितायाः वह्नित्वाभिन्नत्वेऽसं
भवमाशंक्याह। सामान्यधर्मेणेति।। वह्नित्वेन घटाभावप्रतियोगितायाः प्रतियोगितावच्छेदकाभिन्नत्वेतमाशंक्याह। व्यधीति।। आ
दिना प्रतियोगिविशेषणरूपत्वसंग्रहः। तथा सति आत्मत्वे साध्ये तत्कालिकसंबंधेनात्मत्वत्वस्यावर्तमानतया तेन संबंधेनात्म
त्वाभावस्य प्रतियोगिविशेषणमेव प्रतियोगितावच्छेदकमित्यव्याप्तिरिति तु न वाच्यं। साध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छे
दकताया निवेशनीयत्वात्। किंतु घटत्वेन पटाभावीययोः प्रतियोगिविशेषणयोः पटत्वघटपटत्वेन घटाभावत्वयोः परस्परावच्छेदत्व
प्रसंगः। मानाभाव इत्यभिप्रायः।। प्रतियोगितावच्छेदकरूपत्वे प्रतियोगपवृत्तित्वरूपदोषस्य स्पष्टत्वे तादात्म्यथेति।। प्रतियोगिविशेषण
रूपत्वसाधारण्येनाह।। विवादेऽपीति अतिरिक्ततायामिति। यथा मणिकृतामभावेन विवादस्तथा प्रतियोगितायामवच्छेदकादिरूप
त्वे विवादो नस्यात्।। तदंशेऽविवादादिति भावः। न च प्रतियोगितायामधिकरणधर्मावच्छिन्नत्वे विवादः। न तु प्रतियोगितावच्छेदकादि
भिन्नत्वे इति वाच्यं। गगनाभावप्रतियोगिता गगनवृत्तिधर्माभिन्ना न वेति विवादः सामानाधिकरण्येन विधिकोटिः सोऽदत्वानामव
च्छेदकावच्छेदेन निषेधकोटिः। परेषां ततः विलक्षणप्रतियोगितासिद्धौ प्रतियोगियाः किंचिदवच्छेद्यत्वनियततया अधिकरणधर्मा

37

सी·अ·मंजू· वच्छिन्नत्वसिद्धिः। तेषां तत्सामानाधिकरण्यविशिष्टतदवच्छेद्यत्वस्य तदात्मकत्वनियतत्वोपगमात्। यद्वा॥ गगनाभावप्रतियोगिता गगनत्वे
६९ तद्धर्मावच्छिन्नानवेत्येव विवादे गगनत्वभिन्नत्वं सोंदलानां हेतुः। तस्याः प्रतियोगिविशेषणीभूतगगनत्वरूपत्वे हेतुसिद्धेरतिरिक्तत्वविवा
दवे। यद्वा तद्धर्मानवच्छिन्नप्रतियोगिता तद्धर्मान्यधर्मावच्छिन्नानवेति विवादः। तद्धर्मानवच्छिन्नत्वं च सामानाधिकरण्यगर्भं। ने
नव्यधिकरणतद्धर्मावच्छिन्नप्रतियोगितायाः पक्षत्वनिर्वाहः। निषेधकोटिः सोंदलानामवच्छेदकावच्छेदेन विधिकोटिश्चिंतामणिकाराणां
धर्मभिन्नत्वं सोंदलानां हेतुः। शेषं पूर्ववत्॥ एवकारः समानाधिकरणधर्मावच्छिन्नाभावव्यधिकरणधर्मावच्छिन्नाभावभिन्नो वेति विवादश्चेव
छेदार्थः। उभयत्वत्वेन व्यासज्यवृत्तेः प्रतियोगितात्वेनातथात्वेप्यसम्भवादाह॥ अतिरिक्तं वेति। आहुरित्यत्र येन साध्यतावच्छेदकसंबंधे
नस्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताग्रहं प्रति येन संबंधेन तत्प्रकारकनिश्चयः प्रतिबंधकस्तेन संबंधेन हेत्वधिकरणवृत्ति
त्वनिवेशेनैवोपपत्तेर्लक्षणांतरारंभोऽनुचित इत्यस्वरसः सूचितः आहुरिति। स्वाधिकरणयत्किंचिद्वृत्तिवृत्तित्वसंबंधेन हेतुविशिष्टाभावनि
वेशान्न तु वचत्वमित्यस्वरसः। केचित्तु कालिकसंबंधावच्छिन्नाकाशाभावाभावे साध्ये आत्मत्वादावव्याप्तिः। तत्र साध्यतावच्छेदकीभूतता
दृशाभावत्वस्य हेतुसमानाधिकरणव्याप्यवृत्त्याकाशाभावरूपाभावप्रतियोगितावच्छेदकत्वादत आह। प्रतियोग्यधिकरणस्येति प्राहुः।
तन्न। हेतुमन्निरूपितनिरवच्छिन्नवृत्तितावच्छेदकं यदभावत्वं तन्निरूपकतानवच्छेदकत्वस्य निवेशेनादोषात्। घटवद्वृत्तेरिति। घटकालावच्छि
न्नत्वानिवेशः पूर्ववत्। यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यं तदन्यप्रतियोगिताकत्वरूपमपि तन्निरस्यति। प्रस रामः
तियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यप्रतियोगिताश्रयसामानाधिकरण्योभयाभाववत्तत्तदन्यप्रतियोगिताकत्वेना ६९

५(अतिव्याप्तिवारणाय) ५-६(समवायेन वह्निमान् वह्न्यवयवत्वादित्यादौ)४

सर्यो। तेन न पूर्वोक्तदोषः। अधीति। साध्यतेति। समवायेन वह्न्यभाववारणाय। समनियताभावैक्यमते वह्नित्वेन घटाभावस्य घटत्वेन व
ह्न्यभावतया हेतुमतः प्रतियोग्यधिकरणत्वात् याद्दृशेति। वह्नित्वेन तत्तद्वह्न्याद्यभावमादाय आक्षेपः। सामानाधिकरण्यमनतिरिक्तवृत्ति
त्वं न चावच्छेदकत्वेनानतिरिक्तवृत्तिप्रतियोगिताकभेदः। सामान्यरूपेण विशेषाभावानुपगमेन वेदा। विशिष्टेति। याद्दृशप्रतियोगि
तावच्छेदकावच्छिन्नानधिकरणत्वनिवेशे तु सामानाधिकरण्यनिवेशे तद्वैयर्थ्यात् नावतारकत्वं। स्वाश्रयेति। स्वसाध्यसामान्याभावस्य
प्रतियोगिताकेवलान्वयिनि च साध्यभेदादेः साध्यतावच्छेदकसंबंधेनेति। प्राग्वत्। धूमवान् वह्नेरित्यादौ अतिव्याप्तिवारणाय हेत्वधि
करणेत्याद्युक्तं। द्रव्यत्वाद्यवच्छिन्नद्रव्यनिष्ठप्रतियोगितान्यवह्निनिष्ठप्रतियोगितामादाय अतिव्याप्तिवारणाय प्रतियोगितायां तत्
अयोगोलके वह्निधूमान्यतरत्वरूपधर्मावच्छिन्नत्वसमत्वात् स्वपदेन धूमाभावप्रतियोगितोपादानापत्तिरतः स्वावच्छेदकधर्मेति॥
स्वाश्रयवृत्तित्वनिवेशसामानाधिकरण्यनिवेशेन सार्थक्यमर्थः। स्वाश्रयवृत्तिस्वावच्छेदकधर्मावच्छिन्नाधिकरणयावद्वृत्त्यधिकरण
कयत्किंचित्प्रतियोगितावच्छेदकत्वस्य साध्यतावच्छेदकविशेषणत्वेऽप्यधिकरणधर्मावच्छिन्नाभावोपगमेऽपि स्वाश्रयवृत्तित्वसामानाधि
करण्ययोर्वैयर्थ्यं अव्यभिचारिसंबंधरूपतानुपपत्तिश्चेति न उभयोपादानं। साध्याभावघटितलक्षणे। तादृशप्रतियोगिवैयधि
करण्यनिवेशः संभवस्येन पूर्वग्रन्थस्तु यथाश्रुताभिप्रायेणेत्यवधेयं। ननु स्वाश्रयवृत्तित्वस्य दोषावारकत्वात् सामानाधिकरण्यनिवेशे
तद्वैयर्थ्यं किंच स्वरूपसंबंधेन गगनादेर्महाकालान्यत्वविशिष्टघटादेश्च वृत्तिमत्वपक्षे घटवान् महाकालत्वादित्यादावव्याप्तिरि
त्यत आह। वस्तुतस्त्विति॥ याद्दृशप्रतियोगितावच्छेदकावच्छिन्नाधेयत्वेनेति। याद्दृशप्रतियोगितावच्छेदकविशिष्टावच्छिन्नप्रतियो

38

१(स्वाश्रये समसमवायसंबन्धाभावघटकतया सार्थक्यं तदाप्याह। किं च)२

॰अ॰भङ्ग॰ ७० ताकयादृशप्रतियोगिताश्रयवदन्यत्वं तु न पर्वतप्रतीकार्थः। अधिकरणधर्मावच्छिन्नभेदानंगीकारात्। किंतु यादृशप्रतियोगितावच्छेदकावच्छिन्नाधिकर
णतात्वेन यादृशप्रतियोगिताश्रयाधिकरणत्वनिष्ठावच्छेदकताकप्रतियोगितानिरूपकभेदवत्वं। पर्वते वह्नित्वावच्छिन्नाधिकरणतात्वेन वह्नि
धूमोभयाधिकरणतावान्नेति न प्रतीतिः प्रत्येकाधिकरणतातिरिक्ताया उभयत्वावच्छिन्नाधिकरणताया अनंगीकारात्। यत्किंचिदवच्छेदकाव
त्तिधर्मावच्छिन्नावच्छेदकताकतादृशभेदावगाहितादृशप्रतीत्युपगमे तु प्रतियोगिसामानाधिकरण्यपर्याप्तिगर्भनिवेशः। एवं च वह्नित्वाव
च्छिन्नाधिकरणतात्वेन तार्णवह्न्यधिकरणत्वाभावात् तार्णवह्न्यधिकरणत्वाभावयत्तान्नेति प्रतीतेस्तादृशभेदांगीकारेऽपि न क्षतिः। अवच्छेदकतायां वा वे
शिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नपर्याप्तिकत्वं विशेषणं। तेन न वह्न्यधिकरणतात्वेन महानसीयत्वविशिष्टवह्निमत्त्वावच्छिन्नभेदमादाय व्या
प्तिः। सामान्यरूपेण विशेषाभावानंगीकारात्। न वह्नित्वेन तद्वह्न्यभावमादाय दोषः। वह्न्यधिकरणतात्वेन तद्वह्निमत्त्वावच्छिन्नभेदानुपगमात्। ए
तत्प्रतियोगिवैयधिकरण्यं प्रतियोग्यधिकरणतात्मिस्याशयेन तत्र साध्यतावच्छेदकसंबंधावच्छिन्नत्वोऽन्वयः। अवच्छेदकतानुसरूपसंबं
धावच्छिन्नत्वं च विवक्षितमस्तु। यादृशप्रतियोगितावच्छेद[redacted]कावच्छिन्नीयत्वेनेत्यस्य
यादृशप्रतियोगितावच्छेदकधर्मावच्छिन्नावच्छेदकताकत्वेनेत्यर्थः। अन्वयश्चास्यान्यत्वे। साध्यतावच्छेद[illegible]कसंबंधेनेत्यस्य च यादृशप्रति
कप्रतियोगिताकभेदरूपान्यत्वांतर्घटकावच्छेदकत्वे। अथवा प्रत्ययः संपातायातस्वरूपार्थको नाविशेषणतत्त्वीयावश्यायादृशप्रतियो
गितावच्छेदकधर्मावच्छिन्नत्वं वत्वस्य तत्रान्वयः। तथा च यादृशप्रतियोगितावच्छेदकावच्छिन्नसाध्यतावच्छेदकसंबंधावच्छिन्नयादृश ताम॰
प्रतियोगिताश्रयवदृत्त्यवच्छेदकतानिरू[illegible]पकप्रतियोगिताकभेदवत्त्वमित्यर्थः। घटत्वेन वह्निमद्भेदसमवायेन वह्निमद्भेदवह्नित्वेन परव ७०

योगिताश्रयवृत्त्यवच्छेदकता

५(तर्कालंकारोक्तयादृशभेदोदर्शितस्तादृशभेदस्य तादृशार्थकत्वे न लक्षणघटकत्वमित्यवसेयमिति वदन्ति)५

छेदानां वारणायावच्छिन्नांतद्द्वयवत्त्वं तन्निवेशाः। सामान्यरूपेण विशेषाभावानंगीकाराद्वह्निमान्धूमादित्यादौ वह्नित्वेन तद्वह्नेरभावमि
ववह्नित्वेन तार्णतार्णेदहनोभयाभावमादाय नाव्याप्तिः। सामान्यरूपेण विशेषवद्भेदस्याप्यनंगीकारात्। केचित्तु। अवच्छेदकत्वाभाववद्वृत्त
वच्छेदकवृत्तिधर्मानवच्छिन्नत्वमवच्छेदकतायां विशेषणं तेन तदंगीकारेपि न क्षतिरित्याहुः। तादृशेति। सामानाधिकरण्यावच्छिन्नतादृशप्रति
योगितावच्छेदकत्वाभावनिवेशे तु प्रतियोगितावच्छेदकताघटकसंबंधः सामानाधिकरण्यं। तेन धूमवान्वह्नेरित्यादौ नातिव्याप्तिः। वह्नि
मान्धूमादित्यादावव्याप्तिवारणायावच्छेदकतानिष्ठत्वनिवेशः। तादृशेति।। तादृशप्रतियोगितासमानाधिकरणत्वेन रूपेणेत्यादिः। केचित्तु प्र
तियोगितांतमनुवर्तते। न च तादृशप्रतियोगितासमानाधिकरणवृत्तित्वेनावच्छेदकभेदनिवेशे धूमसाध्यकवह्न्यादावतिव्याप्तिरवच्छेद
कत्वनिष्ठतादृशरूपेणावच्छेदकभेदस्य केवलान्वयित्वेन धूमत्वे सत्त्वादिति वाच्यं। प्रतियोगितासमानाधिकरणवृत्तित्वशब्देन वृत्तिपदस्य
छप्रतियोगितासमानाधिकरणमात्रस्यानुपर्वर्तनादित्याहुः। एवं सति स्वावच्छेदकविशिष्टावच्छिन्नस्वाश्रयवन्निष्ठप्रतियोगिताकभेदवद्वृ
त्तित्वरूपप्रतियोगिवैयधिकरण्यनिवेशानं भवत्येपि बोध्यं। यादृशेति। अत्रेदं चिंत्यं। वह्निसामान्याभावप्रतियोगितायाः एवं ता
दृशप्रतियोगिसत्त्वेनोपादानसंभवात्तद्वृत्तित्वकवृत्तित्वसमानाधिकरणभिन्नत्वेन महानसीयवह्नित्वेन वह्निमद्भेदं तद्रूपगामे महान
सीयवह्नित्वेन महानसीयवह्निमद्भेदमादाय वह्निमान्धूमादित्यादावव्याप्तिः।। अथवा तादृशविवक्षा। स्वयुक्तेव समानाधिकरणवृत्तित्वेनान्य
स्यानतिरिक्तवृत्तिवृत्तित्वेनेत्यत्र तात्पर्यं। तेन वह्नित्वेन तद्वह्न्यभावमादाय न दोषः। अत्रेदं समाधानं। अनतिरिक्तवृत्तित्वमिह सनंतरं स्वपरत्वयितो
तेन यादृशप्रतियोगिताव्यापकत्वं समुच्चेयं। तच्च यादृशप्रतियोगिताव्यापकतद्वृत्तिभिन्नत्वं। अवच्छेदकताद्वेनस्वरूपसंबंधरूपावच्छेदक

१ (सामानाधिकरण्ये नेत सार्थकाय सामानाधिकरण्यनिवेशो गौरवं) १

टी·अ·मंजू· म॰ त्वं द्विवक्षणीयं। वस्तुतस्तु। वह्नित्वेन तार्णतार्णदहनोभयाभाववह्नित्वेन वह्निधर्मोभयाभावादिवारणाय यादृशप्रतियोगिताश्रयनिष्ठावच्छेद
७१ कतायां स्वाभाववद्वृत्तित्वे सति स्वसमानाधिकरणो यो धर्मस्तदनवच्छिन्नत्वं विशेषणं देयं स्वमवच्छेदकतात्वं तादृशाभावश्च प्रत्येकं सुलभः। न
चैवं वह्नित्वेन तद्वृक्षाभावस्यापि वारणादनतिरिक्तवृत्तित्वविवक्षणं व्यर्थं तस्योक्तार्थलाभार्थत्वात्। प्रतियोगिविशेषणेपि तादृशाभाव
प्रतियोगितावच्छेदकत्वमनेनैतस्यार्थवत्त्वादिति। अत्र त्वानतिरिक्तवृत्तित्वशरीरे सामानाधिकरण्यप्रवेशात् तु सामानाधिकरण्येनैतस्य तत्सा
र्थक्यमित्ययुक्तं। एकविशेषणसार्थक्याय विशेषणांतरदानस्यानौचित्यादित्यस्वरसो गुरुचरणानां सूचितः। एवं वस्तुतस्तु कल्पेपि
सामानाधिकरण्येनैतस्य न सार्थक्यं। स्वाभाववद्वृत्तिधर्मानवच्छिन्नत्वमात्रस्यावच्छेदकताविशेषणत्वेपि सामान्यरूपेण विशेषाभावमादाय
दोषवारणात्। इदमत्रावधेयं। कालस्य जगदाधारत्वपक्षे घटवान्महाकालपरिमाणादित्यादावव्याप्तिः। हेतुमति कालेऽन्यत्वविशिष्टघटादेर
पि सत्त्वात्। न च गगनादिना घटाद्यभावः सुलभः। गगनादिना घटवद्भेदप्रतियोगितावच्छेदकतायाः। गगनादेरवृत्तित्वेन स्वाभाववद्वृत्तिधर्मो
नवच्छिन्नत्वादिति वाच्यं। घटवद्भेदप्रतियोगितावच्छेदकतामाः स्वाभाववति कालिकादिसंबंधेन वृत्तिना घटत्वादिनाऽवच्छिन्नत्वात्संभ
वोतः स्वाभाववद्वृत्तित्वं साध्यतावच्छेदकताघटके न प्रतियोगितावच्छेदकताघटके न वा संबंधेन विवक्षणीयं। रूपवान्पृथिवीत्वादित्यादौ
विषयितया रूपत्वविशिष्टज्ञानाभाववारणाय साध्यतावच्छेदकताघटकसंबंधेन प्रतियोगितावच्छेदकता विवक्षणीया। एवं च कालिकसं
बंधेन घटत्वविशिष्टस्य तेन संबंधेन साध्यतायामुक्तहेतावव्याप्तिः। गगनादेरपि कालिकसंबंधेन वृत्तेः। अतः भेदप्रतियोगितावच्छेदकताप्रति राम॰
योगिताघटकसंबंधावच्छिन्नत्वेन विशेष्यप्रतियोगिताधर्मिकोभयाभाववनिवेशमवलंब्यैव लक्षणं कार्यं। तत्र गुरुचरणोक्तसपतत्स्थानि ७१

—८(यदि प्रतियोगितावच्छेदकताघटकसंबंधेन स्वाभाववद्वृत्तित्वेन लक्ष्ये दूषणमाह। रूपवानिति)—८

कस्य वा सामानाधिकरण्याघटितस्यापि विशेषणतस्य व्यधिकरणधर्मावच्छिन्नाभावानुपगमेऽपि सामान्यरूपेण विशेषाभाववारकतया चरितार्थ
त्वात्प्रतियोग्यवृत्तिश्चेति ग्रन्थावतारानुपपत्तिरिति आलोचास्व यं साध्यतावच्छेदकसंबन्धावच्छिन्नत्वेन भेदप्रतियोगितावच्छेदकतां विशिष्टसा
न्नवच्छेदकत्वघटितलक्षणमादृतं । तन्न सामान्यरूपेण विशेषाभावोपगमेऽपि कालो घटवान्महाकालत्वादित्यादौ कालिकसंबन्धेन पटत्वेन त
त्पटानधिकरणतायां महाकाले दुर्लभतयाऽनायत्या व्यधिकरणधर्मावच्छिन्नाभावमादायैव लक्षणसमन्वयो वाच्य इति सामानाधिकर
ण्ये नेत्येतद्दलवैरूप्यं । तदर्थश्चास्वरसमुपवर्णित एव । एतेन प्रोक्तव्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकत्वाभावादिनिवेशानर्थक्यं ।
तादृशप्रतियोगितायाः सामानाधिकरण्येन वह्नित्वेन घटाद्यभावादिकमादाय दोषादिति नआभिमतमनादेयं । तथा सति उक्तस्थल एवाग
तेः । एतेन विशिष्टसत्तावान् जातेरित्यादौ अतिव्याप्तिवारणाय यादृशप्रतियोगितावच्छेदकावच्छिन्नत्वतद्भेद एव निवेश्यः ततएव वह्नित्वेन घट
वह्न्यादिवारणात्साध्यसामान्याभावप्रतियोगितामादाय दोषात् । सामानाधिकरण्येनेत्येतत्सार्थक्याय यादृशप्रतियोगिताश्रयनिष्ठत्व
निवेशस्यानौचित्यादिति प्रत्युक्तं । एवं च गुरुचरणानां सामानाधिकरण्येनेत्येतत्सार्थक्याय स्वोक्तविशेषणेतदुपादानमिति सूक्तिरसंगतैव । सा
मानाधिकरण्याघटितप्रतियोगितानतिरिक्तवृत्तिधर्मावृत्तिधर्मावच्छिन्नावच्छेदकताकभेदनिवेशो भावाऽप्रसिद्धेरुक्तस्थलेऽव्याप्त्याप
त्तेः एतदेवाभिप्रेत्य स्वयमपि कालो घटवान्महाकालत्वादिति स्थले विशिष्टाभिधायलक्षणसमन्वयः प्रपञ्चितः । वस्तुतस्तु वह्नित्वेन ता
र्णतार्णदहनाभाववारणाय यादृशप्रतियोगितावच्छेदकस्य यादृशप्रतियोगितासंबन्धावच्छिन्नप्रकारतावच्छेदकावच्छिन्नभिन्नवृत्तित्वेम
तियादृशप्रतियोगितासमानाधिकरणं यत्तदन्यत्वं विशेषणं । ननु गुरुचरणोक्तमिति । यदि च वह्नित्वेन घटाभाववन्वह्नित्वेन वह्निधूमो

दी॰ प्र॰ मंज॰ व्या॰ भयाभावयोः प्रतियोगित्वे वंपात तदपि भेदप्रतियोगितावच्छेदकतायाः एकधर्मावच्छिन्नत्वेऽपि भेदाद्वह्नित्वेन घटवद्भेदादिकमादाय लक्षणसंगतिः। ता च०लती२
७२ याः सामानाधिकरण्येनावच्छेदकत्वं तादृशप्रतियोगितायाश्च न्यूनवृत्तित्वेऽसत्यवच्छेदकत्वं तेन प्रतियोगितायां वह्निधूमोभयसाधारण्येऽपि न क्ष
तिरिति वक्ष्यमाणदोषानवकाश इति निगर्वः। व्यधिकरणधर्मावच्छिन्नावच्छेदकताकभेदानंगीकर्तृणामतमुपपादयति। यत्त्विति।। यदिति।
यत्प्रतियोगितावच्छेदकविशिष्टाधिकरणत्वयत्प्रतियोगिताश्रयाधिकरणत्वोभयाभाववत्त्वमर्थः। तेनैतद्रूपवान्मेयत्वादित्यादौ साध्या
भावप्रतियोगिताश्रयतदवच्छेदकविशिष्टयोरेकत्वेऽपि नातिव्याप्तिः। यादृशप्रतियोगितावच्छेदकयादृशप्रतियोगित्वोभयत्वविशिष्टावच्छिन्नानधिकरण
त्वं तु नार्थः। न च कालो घटवानित्यादिशंकाया एवानुत्थानापातात्। घटत्वेन पटाभावादेः व्यधिकरणधर्मावच्छिन्नप्रतियोगितावच्छेदकत्वांवि
रहप्रतियोगितावच्छेदकताकभेदस्यैतन्मतेऽसत्त्वात्। यद्वा व्याप्यवृत्त्यधिकरणताया अव्याप्यवृत्तित्वेनाव्याप्यवृत्तिसाध्यकेऽव्याप्तिरित्युक्त
तेन सातथावि धाधिकरणताद्वयावच्छिन्नभेदः यत्प्रतियोगिताश्रयाधिकरणनिष्ठयत्प्रतियोगितावच्छेदकविशिष्टावच्छिन्नप्रतियोगितक
भेदो वा निवेश्यः। व्यधिकरणधर्मावच्छिन्नभेदस्यापि सिद्धान्तसिद्धत्वादिति। घटवान्महाकालत्वादित्यादौ लक्षणागमनादव्याप्तिरिति। प्रागुक्तार्थक
मिति। नातः सामानाधिकरण्यप्रवेशेऽपि वह्नित्वेन घटाभावादिप्रतियोगितायां यादृशतादृशशब्दाभ्यां ग्रहणात्तदीयसामानाधिकरण्येनाव
च्छेदकाप्रसिद्धेरव्याप्तिः सामान्यरूपेण विशेषाभावोऽगमेऽपि एकव्यक्तिकसाध्यकसद्धेतौ लक्षणागमनादव्याप्तिरिति अव्याप्तिरिति द्रव्यत्वादिसा
ध्यकसद्धेतौ लक्षणागमनात्। अव्याप्तिरिति घटत्वेन पटाभावप्रतियोगितावच्छेदकविशिष्टघटादेः प्रतियोगिताश्रयपटादेश्चोभयस्य कालेऽस गम॰
त्त्वात्। घटत्वादिना गगनाभावं निरस्यति।। गगनादीति। महाकालान्यत्वविशिष्टघटादेर्महाकाले वृत्तित्वमतेऽप्याह। यद्वेति। यद्वा घटवानित्यत्रा ७२

४ (स्वाधिकरणत्वविषयितासंबंधेन ज्ञाने सत्वेपि उक्तस्थलेपि न क्षतिः। एवंप्रकारतायां बोध्यं) ४

३ (स्वपदद्यंकपिसंयोगपरं) ३

८ (प्रतियोगितावच्छेदकविशिष्टे सत्वप्रतियोगितापरं) ८

नत्वादिसाध्यकव्याप्तिः। तद्धर्मि वृत्तित्वविशिष्टविषयितात्वसंबंधावच्छिन्नाधिकरणतायाः एवं तद्धर्मित्वनियततया विषयितासंबंधेन भगवज्ज्ञा
नात्मत्वविशिष्टघटवत्तायाः सर्वमते ईश्वरज्ञानवृत्तित्वादिसत्वतारणीयं। यत्किंचित् मते च स्वाधिकरणप्रतियोगिकत्वविशिष्टतादात्म्यसंबं
धेन सत्वे निष्ठप्रकारतानिरूपितविशेष्यत्वसंबंधेन वाभावप्रतियोगितायाः विशेषणीयत्वान्नाव्याप्यवृत्तिसाध्यकाव्याप्तिः। गगनघटयोस्तथाविध
अधिकरणसंबंधावच्छिन्नाभाव एवाप्रसिद्धः। अत्र वस्तुतोवच्छेदकसंबंधावच्छिन्नत्वेन संबंधघटकाधिकरणसांतादृशप्रकारतावानिवेशपीता
दृशप्रतियोगितायाः सामा[illegible]नाधिकरण्येनावच्छेदकत्वं च तत्सामान्यधर्मसमानाधिकरणवृत्तित्वेन साध्यतावच्छेदकसंबंधावच्छिन्नत्वविशिष्टय
द्धर्मावच्छेद्यत्वाभाववत्वं यद्धर्मसमानाधिकरणत्वसाध्यतावच्छेदकसंबंधावच्छिन्नत्वाभ्यां यद्धर्मावच्छेद्यभिन्नत्वं वा अतो घटवानीश्वरज्ञानत्वादि
साध्यलक्षणसंगतिरिति दृष्टव्यं। न च तद्रूपसाध्यकव्यभिचारिणि साध्ये तदुभयत्वाप्रसिद्धेः तिव्याप्तिरिति वाच्यं विषयि[illegible] विशेष्यस्यैव तदुभयत्वा त
दार्थत्वात्। तस्य चैककत्वापि पर्याप्तेः। यादृशप्रतियोगितावच्छेदकोभयावच्छिन्नावच्छेदकताकप्रतियोगिताकभेदाय किंचिदुत्वधिकरणवृत्ति
र्वाच्य इति तु संप्रदायः। तदेति वह्नित्वेन घटाभावस्य प्रतियोगितायाः वह्निसामान्याभावप्रतियोगिते कथं नाभिप्रेतमिति वह्नित्वेन वह्निधूमोभ
याभावानुपादनं। तथा च प्रतियोगिविशेषणेन सार्वत्रिकधर्मावच्छिन्नापर्याप्तत्वरूपविरोधगणत्वैकधर्मावच्छिन्नप्रतियोगितायां एकं ते
न प्रतियोगिविशेषणविशिष्टं यत्प्रतियोगितावच्छेदकविशिष्टं न वृत्तायाः एवाभावविरोधित्वात्। नैकेवलान्वयित्वभंगः। वह्निसामान्याभा
वप्रतियोगिते कथं तत्भंगापत्तेः। अभावात्मकत्वं प्रतियोगित्वस्येति सर्वमतेप्यधिकरणधर्मावच्छिन्नाभावानामैक्ये विरुद्धत्वमनुपादेयं वह्निसामान्याभा
वप्रतियोगितायाः एव ततोन्यत्वात्। एकधर्मानधिकरणवृत्तितदवच्छिन्नप्रतियोगितानामेव[illegible] नियमेप्रवेश इति तु ऋजुः पंथाः। ननु वह्नित्वेन व

41

न्हिधूमोभयाभावस्यप्रतियोगिताया आसज्यवृत्तिर्भिन्नैव। नचैवमपिवन्हित्वेनधूमाभाववन्हित्वेनघटाभावप्रतियोगितयोरैक्यात्सामानाधिकरण्येनैतस्यवै
यर्थ्यं दुर्वारमितिवाच्यं। वन्हिभिन्नवान्घटादिस्यादेवन्हिभिन्नत्वेनवस्त्वभावप्रतियोगितायाःवन्हिभिन्नेऽसंभवितत्वयाप्रतियोगिव्यधिकरणांतदभा
वमादायैवाव्याप्तेस्तत्सार्थक्यादित्यत आह। द्विगीति। उक्तरीत्यैवोपपत्तौतत्प्रतियोगितायाव्यासज्यवृत्तित्वानुपगमाद्वन्हिभिन्नवान्घटादिस्यादेवन्हि
भिन्नत्वेनवन्हिघटोभयाभावप्रतियोगिताया उक्तप्रतियोगित्वैक्यात्तद्वैयर्थ्यं दित्यर्थः। वस्तुतस्तु। एकधर्मावच्छिन्नप्रतियोगितायाःऐक्यनियमदूष
णमात्रमिदं। यद्यभेद इति दर्शनात्। एवंचव्यासज्यवृत्तिप्रतियोगिताया अपव्यासज्यवृत्तिप्रतियोगितैक्यंस्यात् इष्टापत्तौचसामानाधिकरण्येनैत
द्वैयर्थ्यात्तथाविधसजातीयप्रतियोगितायाऐक्यनियमालंब्यतुस्वरूपसंबंधात्मकप्रतियोगितायाइतिशंकानसमाधानंतुशक्या। व्यधिकरणी
भूतवन्हित्वाद्यवच्छिन्नप्रतियोगित्वस्यसमानाधिकरणीभूततत्तदवच्छिन्नप्रतियोगित्वाभेदप्रसंगवारणायएकधर्मेव्यधिकरणत्वविशेषणानि
वेशपनियमस्यपरिष्कारणीयतयासामानाधिकरणधर्मावच्छिन्नप्रतियोगितायास्तदविषयत्वात् अयमेवंचदित्यर्थः। यदिचसमानाधिकरणध
र्मावच्छिन्नाप्रतियोगिताप्रतियोगितावच्छेदकरूपाव्यधिकरणधर्मावच्छिन्नातुअतिरिक्तेतिसिद्धांतउपादीयतेतदानिरुक्तिर्निर्दुष्टैव। नचसाध्यनिष्ठप्रति
योगिताश्रयस्येत्यादिक्रमेणसाध्याभावघटितलक्षणेप्रतियोगिवैय्यधिकरण्यनिवेशापत्तिरितिवाच्यं। नवीनैस्तत्रतथाविधलक्षणस्या
भिमतत्वात्। यादृशप्रतियोगितावच्छेदकावच्छिन्नसाध्यनिष्ठप्रतियोगितावच्छेदकताकभेदघटितलक्षणस्यैवाभिष्टत्वात्। अव्यभिचारस्येति।
अव्यभिचारीसंबंध इत्यव्यभिचारिणिसंबंध इतिव्युत्पत्त्यासाध्याभाववदवृत्तिहेतुनिष्ठसाध्यसामानाधिकरण्यंप्रतीयते। अव्यभिचा राम०
रिणःसंबंध इतिव्युत्पत्त्याचहेतुमन्निष्ठसाध्याभावप्रतियोगितानवच्छेदकसाध्यतावच्छेदकाश्रयसामानाधिकरण्यं। यद्यपिनञ्मेरस्य ७३

भिचारपदार्थान्वयितावच्छेदकं यद्रूपं तदवच्छिन्नसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमेवाव्यभिचारशब्दाद्बुध्यते न त्वेतदित्यभिहितं
तथापि नञर्थोऽप्रतीताभावः व्यभिचारपदस्य हेतुसामानाधिकरण्यं साध्याभावः प्रतियोगित्वमवच्छेदकत्वं साध्यतावच्छेदकं चार्थः। तत्रा
कांक्षाबलात् उद्देशक्रमप्रातिलोम्येन पदार्थान्वये प्रथमार्थलाभः। साध्याभावः साध्यमभावः तत्र प्रतियोगित्वस्य प्रकारकत्वमेव। सोद
लानां मणिकाराणां च प्रतियोगिवृत्तित्वाविशेषितसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताया एव नसंसर्गत्वात्। उद्देशक्रमेणान्वये द्वि
तीयार्थलाभः। उभयत्राप्यंतरा नञर्थप्रवेशो लक्षणाकर्तृसंमतः संबंधपदार्थस्य साध्यसामानाधिकरण्यस्योभयत्रापि विशेष्यत्वमे
व। एवं च किंचित्तात्पर्यं न कुर्यादिति न्यायात् उपक्रांतलक्षणानुरोधेनैवं चेत्यस्य संगमनीयतया विशेष्यविशेषणभावभेदभिन्नानामपि
व्यभिचारपदार्थत्वे न तुल्यानामेवाव्यभिचारशब्दगोचरत्वप्रदर्शनाय दृष्टांताभिधाने न च प्रकृताव्यभिचारिपदाद्दाश्रयत्वलाक्षणि
केन वशा उपक्रांतलक्षणप्रत्यये न किंचिद्बाधकमित्यभिप्रायः। साध्याभाववेतीति। द्वितीयव्यभिचारपदार्थघटकं प्रथमव्यभिचारघट
केतु व्याप्यवृत्तित्वमर्थसिद्धं। सामान्यरूपेण विशेषाभावानुपगमे इदं। अन्यथा तु वह्नित्वेन तार्णतार्णदहनोभयाभावादिवारणा
य प्रतियोगिवैयधिकरण्यं स्वाभिन्नप्रतियोगितेव वक्तोपादेया एतेनैव वह्नित्वेन महानसीयवह्न्याद्यभाववारणाय साध्यतावच्छेदक –
व्यापकप्रतियोगिताकत्वं निवेश्योपादेयः। कपिसंयोगी एतत्वादावव्याप्तिं निरस्यति। अत्रेति। व्याप्यवृत्तित्वे चैकाशक्तिरिति भावः। सा
ध्यवत्ताग्रहविरोधिताघटकसंबंधेन साध्याभाववत्त्वं निवेश्यमिति तु केचित्। परत्रापि परलक्षणद्वयेपि सामानाधिकरण्यं प्रवेश्य व्यभिचार
परिष्कारेण वह्नित्वेन घटाद्यभाववारणमित्यर्थः। ननु महानसीयत्वस्य प्रतियोगिविशेषणत्वे रूपवद्धूमयाभावकथनमकिंचित्करं। प्र

42

गा०टी०ध०मंजू०मा० तियोगितावच्छेदकतायां विरुद्धविरुद्धोभयनिष्ठरूपविशेषस्य फलगुत्वादिसन्न आह। महानसीयत्वादिति तथा च प्रथमाभावे विशेष्यविशेषणभावाप च०तती२
७४ न्नेऽवच्छेदकतापर्याप्तिः द्वितीये त्वतथाभूते सैतिपर्याप्तिप्रकारप्रपंचनं चार्थमुभयोपादानमिति भावः। यद्वा महानसीयत्वादिविशिष्टेतिपदं तस्यो
घटाभावसजातीयस्य तस्यैव घटत्वेन वह्न्यभावरूपतया यद्यदन्तर्गतघटत्वावच्छिन्नाभावत्वसत्त्वात्तेन घटत्वादिरूपेण हेतुव्यापकत्वान्त
स्माद्धि साध्यस्थैव। अतिव्याप्तिवारणाय च सजातीयाभावनिष्ठा यद्रूपावच्छिन्नप्रतियोगिता यां प्रतियोगिकाभावे स्वावच्छेदकसंबं
धेन स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावत्वादृशरूपव्याप्यवृत्तितानिरूपकत्वं नि
वेश्यमिति चेन्न। यथासन्निवेशे ऽतिव्याप्तिवारणार्थं दीधित्या एव निवेश्यत्वादसंभववारणार्थं च साध्यव्यापकतावच्छेदकत्वेन यद्रूपसन्निवे
शनीयत्वात्। ननु वह्नित्वेन घटाभावसजातीयघटत्वेन वह्न्यभावनिष्ठयद्रूपत्वावच्छिन्नप्रतियोगिताकत्वं तद्वह्नित्वेन घटाभावरूपसा
ध्याभावव्यापकतावच्छेदकं घटत्वं तु न धूमव्यापकतावच्छेदकमित्यसंभववारणाय साध्यव्यापकतावच्छेदकयद्रूपनिवेशे तच्चेत् सादि
ग्रन्थविरोधः। द्रव्यान्यत्वविशिष्टसत्ताभावत्वस्य साध्यव्यापकतानवच्छेदकत्वात्। यथाश्रुते निरुक्तसाध्यहेतोरभावे सत्तारूपे साध्यता
वच्छेदकावच्छिन्नेऽप्रतियोगिताकत्वस्य साध्यव्यापकतानवच्छेदकत्वात्। यथाश्रुते निरुक्तसाध्यहेतोरभावे सत्तारूपे साध्यतावच्छे
दकावच्छिन्नप्रतियोगिताकत्वसत्त्वात् साध्यतावच्छेदकीभूततद्रूपेण हेतुव्यापकत्वादतिव्याप्त्यप्रसक्तेश्च। न च हेत्वधिकरणत्वाभावस्य
सत्ताभिन्नतया तमादाय तत्र सत्त्वमिति वाच्यं। हेत्वधिकरणतात्वस्य साध्यव्यापकतानवच्छेदकत्वात्। न चैवं दशा विरोधो ऽसंगतः। आदि
दशायां द्रव्यत्वविशिष्टसत्ताभाववान् घटत्वविशिष्टसत्ताभावादित्यादौ सत्तारूपसाध्याभावस्य सजातीये वर्तते साध्यव्यापकता
वच्छेदकीभूतयद्घटत्वविशिष्टसत्ताभावत्वावच्छिन्नप्रतियोगिताकत्वं साध्याभावसमानाधिकरणवर्तते न रूपेण हेतुव्यापकत्वादिति रामः
व्याप्तिवारणाय साध्याभावव्यापकतावच्छेदकत्वस्योपादानादिति वाच्यं। तत्र दीधित्या पटत्वादिविशिष्टसत्ताभावत्वस्याप्युपादानात्तद्वैय ८७

र्थस्य दुर्वारत्वात् इति चेन्न। सजातीयाभावे यावत्त्वाऽसत्त्वेन सममनियताभावभेदमते वैयर्थ्येन वीप्सायाः साध्यव्यापकत्व
त्वस्य च हेयत्वेन तत्र चेत्स्यादिग्रन्थस्य समस्त्वात्। न च तन्मते साध्याभावव्यापकतावच्छेदकत्वोपादानेपि सजातीयाभावे याव
त्वासत्त्वे धूमवान्वह्नेरित्यादौ साध्याभावसजातीयं वह्नित्वेन धूमवद्भेदत्वे रभावं आत्मापरिमाणादिसाधारणपरिमाणत्वेनाभाववत्ते
रभावमादायातिव्याप्तिः। पूर्वोक्तव्याप्यवृत्तित्वप्रवेशे च द्रव्यान्यत्वविशिष्टसत्ताभावाभावस्य सत्तारूपस्य तादृशसत्ताभावत्वा
वच्छिन्नसामानाधिकरण्ये न व्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वेन च व्याप्यवृत्तित्वासंभवादेव नातिव्याप्तिरिति तद्ग्रन्थासंगति
दुर्वारैवेति वाच्यं। प्रतियोगिताकाभावत्वे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यावच्छेदकत्वव्यधिकरणधर्मावच्छिन्ना
भावाव्यवृत्तित्वोभयाभाववत्त्वनिवेशाभिप्रायेण तद्ग्रन्थसंगतेः। न च तत्रैस्यादिग्रन्थस्य समनियताभावभेदपरत्वेन तदेकमते
साध्याभावव्यापकतावच्छेदकत्वे वैयर्थ्यप्रसंग इति वाच्यं। एवं सति गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यगुणान्यत्वविशिष्टसत्ता
भावात् कर्मान्यत्वविशिष्टसत्ताभाववान् गुणकर्मान्यत्वविशिष्टसत्ताभावादित्यादावतिव्याप्तेः। हेतुतावच्छेदकस्य साध्यव्याप
कतावच्छेदकत्वादिति धूमवान्वह्नेरित्यादौ धूमाभावसजातीयाभावनिष्ठवह्नित्वावच्छिन्नस्वरूपसंबंधावच्छिन्नप्रतियोगि
ताकत्वं साध्याभावव्यापकतावच्छेदकमिसति व्याप्तिरतः हेतुतावच्छेदकसंबंधावच्छिन्नत्वेन प्रतियोगित्वविशेषणीयं। एवमा
त्माद्रव्यत्वादित्यादौ विषयितासंबंधेन द्रव्यत्वविशिष्टज्ञानादेः समवायावच्छिन्नाभावस्य साध्याभावसजातीयस्य द्रव्यत्वत्वा
वच्छिन्नप्रतियोगित्वमादायातिव्याप्तिरतो यद्रूपनिष्ठावच्छेदकतायां हेतुतावच्छेदकताघटकसंबंधावच्छिन्नत्वमावश्यकं। एवं यद्रू

56

ी॰ अ॰ मंजू॰ पावच्छिन्नव्यापकत्वं हेतुतावच्छेदकसंबंधेन वाच्यं। तेन धूमवान्वह्नेरित्यादौ साध्याभाववत्सजातीयधूमाभावे धूमत्वावच्छि
८८
न्नप्रतियोगिताकत्वं साध्याभावव्यापकतावच्छेदकं। इति धूमत्वेन संबंधसामान्ये न हेतुव्यापकत्वेपि नातिव्याप्तिः। हेतुव्याप
कतावच्छेदकत्वं हेतुतावच्छेदकताघटकसंबंधेन वाच्यं तेन तत्रैव वह्न्यादिनिष्ठव्यापकताया धूमत्वादेः कालिकसंबंधेना
वच्छेदकत्वेपि न क्षतिः। यद्वा। येन संबंधेन यद्रूपनिष्ठावच्छेदकताकत्वे येन संबंधेन प्रतियोगिताकत्वं तेन संबंधेन हेतुव्या
पकतायास्तेन संबंधेनावच्छेदकत्वं वाच्यमिति संक्षेपः। अत्र एवं यद्रूपावच्छिन्नाभावाधिकरणतो साध्याभावसमाना
धिकरणोस्येव सम्यक्। गुणान्यत्वविशिष्टसत्ताभाववान् द्रव्यान्यत्वविशिष्टसत्ताभावाद्द्रव्यगुणान्यत्वविशिष्टसत्ताभावादे
त्यादौ द्रव्यान्यत्वाभाववति कर्मान्यत्वविशिष्टसत्ताभाववान् गुणकर्मान्यत्वविशिष्टसत्ताभावादित्यादौ गुणान्यत्वाभा
ववति हेत्वभाववत्तावच्छिन्नवत्वाभावेनानतिप्रसंगात्। किंच व्यापकत्वनिवेशारक्षणं प्रकर्षः। साध्याभावीयसमनियता
भावभेदपेक्षिवीप्यावेयर्थ्यस्य स्वहस्तितत्वात्तद्वैवम् मतेपि सानोपादेयैव निरुक्तव्याप्यवृत्तिता निरूपकप्रतियोगिताविवक्षैवा
तिव्याप्तिवारणासंभवादिसस्वरसः। यत्संबंधेनेति। घटो घटपटान्यतरत्वादित्यादौ घटत्वाभावप्रतियोगितावच्छेदकीभूतघ
टत्वत्वादिमादिकृतविशेषणतासंबंधेन हेतुव्यापकत्वादतिव्याप्तेः कालिकसंबंधानवच्छिन्नव्यापकत्वेनोक्तं अवच्छिन्नत्व
योरेकसंबंधावच्छिन्नत्वस्मर्त्तव्यं। सामान्यधर्मेणेति शंका गगनाभावत्वादिना सजातीयमतेन च सामान्यधर्मेण विशेषाभावा राम॰
गीकारे वह्नित्वेन तद्वह्नेरभावमादाय धूमवान्वह्नेरित्यादावतिव्याप्तिरिति वाच्यं। यत्प्रतियोगिताकाभावेस्वावच्छेदकावच्छि ८८

न्नसामानाधिकरण्यगगनाभाववद्भिन्नत्वोभयाभाववत्त्वप्रतियोगितावच्छेदकत्वस्य वक्तव्यत्वात्। अन्यथा प्रमेयत्वेन घटपटोभया
भावं प्रमेयत्वेन गगनतद्भिन्नोभयाभावं वा ब्रूयात्। तथा च प्रमेयत्वावच्छिन्नगगननिष्ठप्रतियोगितायास्तथाविधाया अवच्छेदकं प्र
मेयत्वमिति भावः। यत्तु। सामान्यधर्मेण विशेषाभावानुपगमेपि गगनप्रमेयत्वाभ्यां प्रमेयाभावमादायैव नाव्याप्तिरिति। तत्तुच्छं।
द्रव्यं सत्त्वादित्यादौ विशिष्टसत्ताभावमादायातिव्याप्तेर्वारणाय हेतुतावच्छेदकप्रतियोगितावच्छेदकतापर्याप्तेर्वाच्यत्वात्। तथा
पीति। अत्र वदंति। स्वसमानाधिकरणव्याप्यतावच्छेदकधर्मांतराघटितस्यैव हेतुतावच्छेदकत्वनियमात् प्रमाविषयत्वं हेतुतावच्छे
दकताकमेव नेति कुतो गौरवाभिधानं कुतस्तरां धूमवान्वह्नेरित्यादौ अतिव्याप्तिवारणाय स्वाधिकदेशावृत्तिधर्मानवच्छिन्नप्र
तियोगितायाः प्रवेशपत्वेप्युद्विषयत्वेन गगनाभावनिरासनं। एवं उक्तव्याप्यवृत्तितानिरूपकत्वनिवेशो चानतिप्रसंगादेरुक्तत्वात्
इति। अत्रेदं बोध्यं। नीलधूमत्वादेरपि व्याप्यतावच्छेदकत्वपक्षे ज्ञेयं प्रमेयादिति पंक्तिः। पक्षांतरे तु वह्निमान् विषयादित्यादौ वह्न्यभा
वसजातीयविषयत्वेन गगनाभावीयनिरुक्तव्याप्यवृत्तितानिरू[illegible]पप्रतियोगितावच्छेदकं विषयत्वमित्यतिव्याप्तिर्दुष्टव्या। न च
तत्र स्वोक्तसाजात्यं नास्तीति वाच्यं। तन्निवेशे लक्षणांतरत्वादिति। मिश्रस्तु दूषणमुद्धरतां मतं दर्शयति॥ ॥नव्यास्त्विति। धूमसा
मान्याभावेति। अयोगोलकान्यत्वाभावेस्यार्थः। अन्यथा संयोगेन द्रव्यत्वस्याव्याप्यवृत्तित्वेन धूमसामान्याभावो न लक्षणघटक
इति व्यधिकरणधर्मावच्छिन्नधूमाभावमादायातिव्याप्तितादवस्थ्यात् वह्निमान् धूमादित्यादौ द्रव्यत्वाद्यभाव एव साध्याभावः।
हेत्वभावेपि द्रव्यत्वधूमान्यतराभावः। अत्र तत्प्रतियोगित्वे हेतुतावच्छेदकधर्मसंबंधावच्छिन्नत्वेन देयं धूमवान्वह्नेरित्यादौ स
57 मवाये न वह्न्यभावादेः द्रव्यं सत्त्वादित्यादौ विशिष्टसत्ताद्यभावस्य च निरुक्तव्याप्यवृत्तित्वासंभवात्। द्वितीयरीतौ प्रतियोगिताघटक

अ॰मं॰ज॰ संबंधादिनिवेशे गौरवादाह॥ एवं चेति॥ द्रव्यं सत्त्वादित्यादौ द्रव्यत्वाद्यभावस्य कालिकसंबंधेन साध्यसमानाधिकरणतया व्य
८१ धिकरणधर्मावच्छिन्नाभावमादायातिव्याप्तिः तत्साध्यसामानाधिकरण्यं न स्वरूपसंबंधेन तथा सति प्रसिद्धानुमानादौ जात्या
देरपि साध्याभावतयाभावभिन्नत्वप्रवेशापत्तेः किंतु स्वप्रतियोगिमत्ताग्रहविरोधितानियामकसंबंधेन अभाववानिति।
इदमुपलक्षणं। वह्निमान् धूमादित्यादौ पर्वतावृत्त्यभावस्य साध्यप्रतियोगिकस्य सजातीयसमा[illegible]नाधिकरणव्यावृत्त्यभा
वनिरूपितप्रतियोगित्वस्य हेतावभावाद् व्याप्तिरित्यपि बोध्यं। तत्सजातीयाभावो विशिष्टसत्ताभावः। यथाश्रुतमेवेति। स्वस
मानसजातीयसाध्याभाववन्निष्ठाभावप्रतियोगित्वमिति यथाश्रुतमित्रलक्षणमेवेत्यर्थः। सम्यगिति। सामानाधिकरण्यप
स्थानिकस्य व्यापकत्वस्य व्यर्थत्वादिति भावः। ग्रंथावतारेति। ननु वह्निमान् धूमादित्यादौ गगनाभावत्वस्य साध्यव्यापकताव
च्छेदकतया यावदंतातिलदवच्छिन्नप्रतियोगिताकगगनरूपाभावस्य प्रतियोगितावच्छेदकगगनाभावत्वधस्य हेतुव्यापकताव
च्छेदकत्वेन लक्षणासमन्वयात् तदवस्थानुपपत्तिर्दुर्वारैवेति चेन्न। व्यापकत्वं न प्रतियोगिवैय्यधिकरण्यघटितं किंतु स्वरूपसंबंधेन सा
ध्यवद्वृत्तित्वघटितं। एवं च जात्यभावत्वस्य धूमव्यापकतानवच्छेदकतयाऽव्याप्तेः साध्याभावे भावभिन्नत्वनिवेशात्। केचित्तु व्या
प्यवृत्तयः यावंतः साध्यव्यापकतावच्छेदकस्तदवच्छिन्नाभावः यद्धर्मावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावा
प्रतियोगिताभाववंतस्तद्धर्मवत्त्वमेव तत्त्वमित्यतन्मूलावतारसंभवाच्छेषवैयर्थ्यमित्याहुः। यत्संबंधेनेति। प्रतियोगितावच्छेदकसंबंधे
न साध्यव्यापकत्वानुपादाने समवायेन वह्न्यभावमादाय व्याप्तिर्बोध्या। तत्संबंधेनेत्यस्य फलमाहोमिनमिति। अत्र लक्षणादावपि यद्धर्मा राम॰
वच्छिन्नप्रतीत्यादेः यद्धर्मावच्छिन्नवृत्तिभेदप्रतियोगितावच्छेदकतायाः सामानाधिकरण्येतावच्छेदकान्यत्वमित्यर्थो धूमाधिकरणे ८१
वह्नित्वेन घटवद्भेदमादाय नातिव्याप्तिः॥ इति सिद्धान्तलक्षणं समाप्तं ॥६॥ ॥६॥ ॥६॥ ॥ ग

१८ ननु संयोगसंबंधावच्छिन्नवृत्तित्वाभावसंयोगाभावात्मकस्तस्याव्याप्यवृत्तित्वेन दैशिकविशेषणतासंबंधेन तादृशाभाववत्वं हेतोः सत्वादतिव्याप्ति) =
१९ (रत आह। निरवच्छिन्नेति) २

॥श्रीगणेशाय नमः॥ ॥दैशिकेति॥ ॥निरवच्छिन्नदैशिकविशेषणतेत्यर्थः। सामान्याभावस्य॥गगननिष्ठस्य। असंभवस्तु नास्तीति॥
अत एवानुपदमव्याप्तिश्च यमुक्तं। नाद्यस्येनेति। नाद्यस्यस्यानतिरिक्त हेतुघटत्वघटत्वाभावस्य गगनादस्याभावो बोध्यः। विषयिता संबं
धेनेस्यपि बोध्यं विषयताया विषयस्वरूपत्वेतिरिक्तत्वमते व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्विषयतात्वेनाभानं वाप्रसिद्धेर्व्यधि
करणधर्मावच्छिन्नविषयत्वाभावमादाय लक्षणसंगतेः। मन्विति। वक्ष्यमाणाव्याप्यवृत्तितानिरूपकत्वमिवेशो। एतद्रूपवानेतद्रूसा
दित्यादौ एतद्रूपत्वद्रूपीमव्याभावपूर्वक्षणवृत्तित्वविशिष्टैतद्रूपाभावयोर्वारणात्। तदनिवेशे वह्निमान् गगनादित्यादौ वैशिष्ट्याद्य
नवच्छिन्नसाध्यप्रतियोगिताकाभावनिवेशे एतद्रूपादिसाध्यकएववालक्षणगमनादव्याप्तिरित्युक्तं। यद्वा। विशेषणत्वेन संसर्गतास्वी
कारेतेनस्वैतातेनसंबंधेनहेतोलक्षणगमनाद्विशिष्टाभावादिकमादाय नासंभव इति। ननु गगनादिरूपसाध्याभाववारणाय साध्य
सामानाधिकरण्यस्य वत्तिमत्ता ध्यप्रतियोगिकत्वस्य वक्ष्यमाणव्याप्यवृत्तित्वं वा निवेश्यतां हेवमिति। अत्र घ्राणग्राह्य गुणत्वं यद्गुण
त्वव्याप्यग्राह्यजातिमत्वं। तदा पृथिवीत्वहेतुः गंधत्वंल्लघुधर्मः। नो चेदणुभिन्नपृथिवीत्वं हेतुः त्रसरेणुगंधस्याप्रत्यक्षतयातन
त्र्यणुकान्यत्वं देयं तत् पृथिवीत्वं। वा। घ्रोस्य गंधत्वंल्लघुधर्मः साध्यतावच्छेदकव्यापकधर्मावच्छिन्नप्रतियोगिताकाभावोक्तौज
लाघटस्य भावमादाया दोषादाह॥प्रमेयवानिति। विषयत्वेन घटास्य भावोपगमेपि न क्षतिः। तस्यव क्ष्यमाणाव्याप्यवृत्तित्वाभावात्।
सत्तावान् जातेरित्यादौ विशिष्टानतिरिक्तत्वे विशिष्टसत्ताभावमादायाव्याप्तिरपि बोध्या। यथाश्रुते। व्याप्यवृत्तित्वानुक्तौ असंगसाप
त्तेः। अव्याप्यवृत्तिविशेषसाध्यकाव्याप्त्यापत्तेः। यत्तु। यथाश्रुते साध्यमात्रप्रतियोगिकाभावस्य साध्याभावपदार्थत्वे संयोगी

58

काभावस्य साध्याभावपदार्थत्वे। संयोगी सत्त्वादित्यादौ संयोगाभावस्य वक्ष्यमाणाव्याप्यवृत्तिताविरहेण गुणान्यत्वाभावादेः साध्यमात्रप्रति
योगिकत्वाभावेनाधिकरणधर्मावच्छिन्नाभावमादाय अतिव्याप्त्यापत्तेरित्यर्थ इति। तन्न। पूर्वोक्ततत्तद्व्यभावावारणेन संदर्भविरोधात्।
प्रथमरीत्या साध्याभावनिवेशे तु किंचिद्विशिष्टद्रव्यत्वाद्यभावमादाय असंभवो बोध्यः। प्रमेयत्वादेरिति। प्रमेयत्वानधिकरणाप्रसिद्धा।
वक्ष्यमाणव्याप्यवृत्तिः विषयिताया वृत्तिनियामकतया कालिकसंबंधप्रदर्शनं वन्हिमान् धूमादित्यादौ तु तादृशनित्यनिरूपितसंयो
गावच्छिन्नवृत्तित्वाप्रसिद्धेरुपेक्षा। प्रमेयत्वेति। साध्यताघटकसंबंधेन व्यापकत्वस्येदानीमनुक्तत्वात्। त्यागः ज्ञेयत्वं साध्यं तत्रोक्ताभावस्य
साध्यताघटकस्वरूपसंबंधानवच्छिन्नप्रतियोगिताकत्वं बोध्यं ज्ञानादेरिति। नित्यज्ञानादेरित्यर्थः। जन्यज्ञानाद्यभावस्य वक्ष्यमा
णाव्याप्यवृत्तित्वाभावात्। वृत्तीति। यद्यप्यधिकरणधर्मावच्छिन्नाभावस्य प्रतियोगितावच्छेदकसंबंधो नोपगम्यते। साध्यतावच्छेदक
संबंधान्यसंबंधानवच्छिन्नप्रतियोगिताकः साध्याभावो निवेश्यः। साध्यव्यापकतावच्छेदकत्वं च साध्यसमानाधिकरणभेदप्रति
योगितावच्छेदकतायां साध्यतावच्छेदकताघटकसंबंधावच्छिन्नापामनवच्छेदकत्वं इति ब्रूयात्तदा वृत्त्यनियामकसंबंधेन साध्यतायाम
ाद्वेतावतिव्याप्तिरिति दोषांतरमाहुः। [redacted]। धूमवानिति। व्याप्तीति। संयोगेन द्रव्यस्याव्याप्यवृ
त्तित्वे धूमाभावस्याव्याप्यवृत्तित्वाद्युदाससूचनायैवकारः। ननु वन्हिमान् धूमादित्यादौ लक्षणघटकाभावप्रसिद्ध्यर्थं प्रतियोगि
व्यधिकरणसाध्यतावच्छेदकसंबंधाव+समानाधिकरणाभावप्रतियोगितानवच्छेदकत्वं साध्यव्यापकतावच्छेदकत्वमुपेयं तत्र च
प्रतियोगितावच्छेदकावच्छिन्नसाध्य+च्छिन्नप्रतियोगितावच्छेदकताकभेदवत्वं प्रतिवेश्यधिकरणघटकं। वन्हित्वेन घटवद्भेदो नोपगम्य

तद्इतिनतद्वारकविशेषणाप्रवेशः। एवंच वृत्त्यनियामकसंबंधेन साध्यतायां न साध्यव्यापकतावच्छेदकत्वाप्रसिद्धिः। प्रयोजना
भावेन तद्घटकप्रतियोगितायां साध्यतावच्छेदकसंबंधावच्छिन्नत्वाप्रवेशात्। साध्याभावे च न साध्यतावच्छेदकसंबंधावच्छिन्नप्रति
योगिताकत्वं। किंतु प्रोक्तसाध्याभाववत्तादृशरूपविशिष्टप्रतियोगिकसाध्यतावच्छेदकसंबंधानुयोगिविशिष्टत्वं च अनुनेयोगि
त्वगगनाभावत्वतद्वद्न्यत्वान्यतररूपेण साध्याभावसाजात्यं विशेषणं। केवलान्वयिसाध्यके च अधिकरणधर्मावच्छिन्नैवानुयोगप्रसि
द्धिः। एवं च तत्र समवायादिनाधनाद्यभाववत्त्वलक्षणघटकः। धूमवान्वह्नेरित्यादौ धूमाद्यभावोपि रूपवान्पृथिवीत्वादित्यादौ
सत्तादि ६ नित्यत्वादिना रूपाभावो दुर्धरः। नित्यैव द्विन्नसामान्यादिवृत्तित्वविशिष्टतद्भिन्ननिरूपितहेतुताघटकसंबंधावच्छिन्नवृत्तित्वाप्रसिद्धेः।
एवंरूपत्वेन नित्यसमवेताभावस्य गृहीतुं शक्यत्वेपि तादृशवाय्वादिवृत्तित्वविशिष्टता [redacted] दशाभावाधिकरणवृत्तित्वसत्वेनाव्याप्तस
त्वात् वक्ष्यमाणव्याप्यवृत्तित्वं न देयं यद्वा तादृशानुयोगितात्वावच्छिन्नप्रतियोगिताक एवाभावो निवेश्यः। तादात्म्यान्यवृत्त्यनियामकसंबं
धेन साध्यतायां सद्धेतावपि एतल्लक्षणं लक्ष्यत्वमेवोपेयते। प्रतियोगिताघटकसंबंधेन प्रतियोगिव्यधिकरणहेतुसमानाधिकरणाभावी
यसाध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगिताघटितसिद्धांतलक्षणे लक्ष्यतायाभवदभिमतत्वात्। सामान्यरूपेण विशेषाभावेनोप
गम्यत इति न रूपवान्पृथिवीत्वादित्यादौ वक्ष्यमाणरीत्या व्याप्तिः। साध्यतावच्छेदकसंबंधावच्छिन्नधर्मसामान्याभावस्य केवलान्वयित्वे
पि निरवच्छिन्नवृत्तित्वरूपव्याप्यवृत्तित्वविशिष्टतदधिकरणानिवेशादेव नातिव्याप्तिरित्यत आह। प्रमेयमिति। प्रमेयत्वेन घटपरो भे
यत्वे दोन वक्ष्यमाणव्याप्यवृत्तिनापि [redacted] गगनाभावरूपः तथा सति निरूपावच्छिन्नवृत्तित्वप्रसंगात्। तथा च सजातीयप्रमेयता दा

57

त्यानुयोगित्वाभावोऽप्रसिद्धः। प्रमेयतादात्म्यानुयोगित्वत्वेन घटतादात्म्यानुयोगित्वपटतादात्म्यानुयोगित्वोभयाभावस्तागग
नाभावरूपः द्वितीयकल्पे च प्रमेयतादात्म्यानुयोगितात्वेन तदुभयाभावे मानाभाव एवं तत्तीये च प्रमेयत्वेन घटपटोभयभेदस्या
प्रमेयेऽप्यव्याप्यवृत्तित्वविशिष्टतदधिकरणं दंडाद्येवेति अव्याप्तिर्भवत्येव तदनुपगमो वा एवं। घटत्वादिनाप्रमेयत्ववद्भेदो नांगीक्रि
यते। अन्यथाज्ञेयं प्रमेयादित्यादौ इत्यादिना ग्रंथकृता मयास्पभिन्नासंबंधेन विवक्षणीयं। तेन वह्निसंयोगाभावस्य साध्यव्याप
कतानिर्वाहः। जातिभावस्याप्युक्तरीत्या साध्यव्यापकत्वात्तदभावस्य जात्यात्मकस्याव्याप्यवृत्तित्वादाह। वस्तुतस्त्विति। अप्रसिद्धेति वार
णान्वयि। एतेनेति। साध्यतावच्छेदकसंबंधेन व्यापकतायामेवप्रतियोगिवैयधिकरण्यमावश्यकं नान्यथेति भावः। न च स्पंदत्वादेः
साध्यव्यापकतावच्छेदकत्वानुपपत्तिरिति वाच्यं तात्। यद्वा। पूर्वकल्पेव ह्रादिमति उत्पत्तिकाले स्वरूपसंबंधेन वह्न्यभावसत्त्वाद्वह्नि
त्वादेर्व्यापकतावच्छेदकत्वानुपपत्तिरतस्तत्र संबंधमनिवेश्य प्रतियोगिव्यधिकरणत्वेन साध्यसमानाधिकरणाभाव निवेश्य तत्रा
स्वरसं प्रकाशयति। एतेनेति। असंभव इति। विशेषरूपेण संसर्गत्वोपगमे वह्निमान् धूमादित्यादावसंभव इत्यर्थः। एतद्रूपवान्तए
तद्व्यक्त्यनुयोगिकत्वविशिष्टसमवायेन सत्तादित्यादौ सत्तावृत्तित्वविशेषाभावमादाय तत्र व्याप्तेस्तु रूपवान् घटानुयोगिकत्ववि
शिष्टद्रव्यत्वप्रतियोगिकत्वविशिष्टसमवायेन द्रव्यत्वादित्यादौ लक्षणागमनात्। वह्निमान् धूमादित्यादौ इंधनत्वेन वह्न्यभावाधिक
रणजगद्वृत्तित्वालोकभेदोभयाभाववारणमाह। व्यासज्यवृत्तिधर्मावच्छिन्नेति। आलोकेति। उक्तविशेषणाक्रांतस्येत्यादिः। अव्याप्तिः। रामः
केवलान्वयिनि लक्षणागमनात्। वृत्तित्वमात्रवृत्तिप्रतियोगितोक्तौ आलोकावृत्तिवृत्तित्वाभावमादाय दोषो बोध्यः। स्वहेतुः। अतिरिक्तांतमि ९१

जा॰टी॰अ॰मंजू॰ त्पस्य जगत्तादात्म्यकत्वमुक्तं। एकं चेति। घटत्वादिना तादृशवृत्तित्वाभावे निषेधगर्भोक्तविशेषणाभावात्। पटत्वस्याप्यवच्छेदके प्रवे
९२ शः। न च व्यधेयता या अव्यासज्यवृत्तिवृत्तितया घटत्वपटत्वयोः प्रतियोगिता सामानाधिकरण्यं दुर्वारमिति वाच्यं। स्वसमानाधि
करणधर्मावच्छिन्नत्वस्य स्वावच्छेदकतापर्याप्त्यधिकरणधर्मवद्वृत्तित्वरूपत्वात्। न च घटत्वेन पटाभावः सुलभः। उक्तरीत्या तादृशा
वृत्तित्वभिन्नावृत्तित्वस्य प्रतियोगितायामावश्यकत्वात्। स्वछोंतरैः प्रयोजनसंभवात् तादात्म्यस्य तादात्म्यरूपतामालंब्य प्रयोजनदा
नमनुचितमित्यस्वरसः। न व्यास्तु। निषेधद्वयस्यागे द्रव्यं पृथिवीत्वादित्यादौ व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्तित्वेन घटस
मवेतत्वजातित्वान्यतराभावमादाय दोषो नोद्भाव्यः। वृत्तित्वभिन्नावृत्तित्वरूपविशेषणास्फुरणापत्तेः। निषेधद्वयोपादानस्य तद्वा
रकत्वात्। वा। किंतु वाच्यं ज्ञेयत्वात् जगद्वृत्तित्वेन घटाभावप्रसिद्ध्या नाव्याप्तिः तथा च तादात्म्यसंबंधेन हेतावव्याप्तिवारणाय नत
स्यानतिरिक्ततानुधावनक्लेशप्रसंगः। एवं घटत्वेन पटाभावप्रवाव्याप्तिवारकइति सामानाधिकरण्यं धर्मविशेषणं यथाश्रुतमेव।
पश्चात्त्वतिरिक्तत्वं साध्याभाववद्वृत्तित्वत्वनिष्ठप्रतियोगिविशेषणतापन्नीयावच्छेदकतान्यत्वरूपमवच्छेदकतायां निवेश्यं द्रव्यं पृथि
वीत्वादित्यादौ दोषो वारणीय इत्याशयः। लक्षणकरणादिति। तत्तत्साध्याभाववेत्यादिकल्पकरणादित्यर्थः। वृत्तित्वत्वमात्रस्येत्यनेन जग
द्वृत्तित्वस्यापेक्षया लघुत्वं दर्शितं। नन्वेतत्कल्पे वृत्तिमद्वृत्तित्वं स्यात् अप्रमेवेत्यत आह। किंचेति। अन्योन्याभावघटितं गुरुधर्मप्रदर्शनासं
ताभावघटितं तं दर्शयति। एवमिति। द्विगिति। गुरुधर्मस्य प्रतियोगितावच्छेदकत्वकल्पेप्युक्तरीत्या निषेधद्वयसार्थक्यसंभवात्तस्या राम॰
नवच्छेदकत्वकल्पानुधावनं निर्बीजमिति। यस्य कस्यचिदिति। कालिकादिसंबंधेन गगनस्यापि सामानाधिकरण्यात् तत्तद्वृत्तियो ९२

60

प्तेः। तदनवच्छिन्नप्रकारतावच्छेदकत्वं तदतिरिक्तत्वात्तेन विशिष्टस्यानतिरिक्तत्वेऽपि स्वनिष्ठवृत्तितात्वेन जगद्वृत्तित्वाभावमादाय न दोषः
सामान्यतः अधिकरणधर्मावच्छिन्नाभावसाधारणरूपेण। जातित्वेति। सामान्यरूपेण विशेषाभावानुपगमाज्जातिपदं। न च जातित्वं नियतत्वे
सति अनेकसमवेतत्वं। तथा च सामान्यरूपेण विशेषाभावानंगीकारेणायमभावः प्रसिद्ध्यतीति। अन्यथा वक्ष्यमाणविशेषणेन न वारणमिति
वाच्यं। अनेकसमवेतत्वे सति नित्यत्वस्य जातिलक्षणत्वे न तदभावस्य सामान्यरूपेण विशेषाभावभिन्नत्वात्। तादृशसाध्याभाव
वद्वृत्तित्वेन घटसमवेतत्वघटसंयुक्तत्वान्यतराभाववारणाय हेतुतावच्छेदकसंबंधेति। न चैवं वाच्यं प्रमेयादिसाध्यव्या
प्तिः। तादृशसाध्याभावाधिकरणनिरूपितहेतुतावच्छेदकसंबंधीभूततादात्म्यावच्छिन्नवृत्तित्वरूपजगदात्मकतादात्म्य
भिन्नाप्रसिद्धेरिति वाच्यं। तत्तत्साध्याभाववद्वृत्तित्वत्वातिरिक्तसमानाधिकरणधर्मानवच्छिन्नस्वव्यापकतत्तत्साध्याभावे
वद्वृत्तित्वत्वकप्रतियोगिताया निवेशात्। सामान्यरूपेण विशेषाभावानुपगमाच्च न जगद्वृत्तित्वत्वेन महानसवृत्तित्वाभावमादा
याव्याप्तिः। वाच्यमिति। न च ज्ञेयत्वस्य ज्ञानविषयत्वरूपस्य नानात्वात्। वाच्यत्वाभाववद्वृत्तित्वत्वेन घटवृत्तित्वघटान्यवृत्तित्वोभया
भावस्य हेतोरसत्त्वान्नाव्याप्तिरिति वाच्यं। वाच्यं गगनाभावादिसाध्ये घटमात्रनिष्ठध्वंसादेः प्रसिद्धस्योक्ताभावस्य हेतावसत्त्वे नाव्या
प्तेः। वस्तुतः सामान्यरूपेण विशेषाभावो नास्त्येवेति यथाश्रुतमेवं युक्तं। हेतुनेति। प्रयोजनं पूर्वोक्तमेव। वाच्यमिति। यद्यपि जा
गत्तादात्म्येन घटतादात्म्यपटान्यतराभावस्य घटभिन्ने प्रसिद्धस्य हेतौ चासत्त्वादसंभवो वाच्यस्तथापि विशेषरूपेण संसर्गतास्थले
तादृशाभावस्य तत्संबंधेन वृत्तिमद्वृत्तित्वाभावाद्व्याप्तिरित्युक्तं। तादात्म्यस्यातिरिक्तत्वे तादृशतादात्म्यत्वेन पटाद्यभावसंभवात्तादा

वच्छेदकत्वानिरूपकप्रतियोगिताकाभावाऽइति निष्कर्षः। समवायेन घटत्वेन जगद्वृत्तित्वाभावप्रतियोगितायां प्रतिद्वन्द्वस्य निरूपकत्वात्तस्य
संयोगेन घटत्वेन जगद्वृत्तित्वाभावप्रतियोगितायामप्यभावमादाय लक्षणासमन्वयः। यदि च धर्मपदोपसंदानात्स्वावच्छेदकसंबंधावच्छि
न्नाधेयतावच्छेदकत्वमवच्छेदकताविशेषणं तदाऽधिकसमावान्तरं लक्षणघटकं दर्शयति। विरुद्धेति। तेन व्यधिकरणसंबंधमवच्छेदक
तावच्छेदकीकृत्याभावसंभवेपि न क्षतिः। यदि च धर्मपदं यथाश्रुतमेव तदा सर्वत्राप्येकाभावसौलभ्यमाह। अवृत्तीति। न च संयोगादि
संबंधेन घटत्वादिकं न धर्मः। कालिकादिसंबंधेन गगनादिकं धर्म इति कथमेतदिति वाच्यं। एतत्कल्पे ऽआधेयत्वाश्रयवृत्तित्वं अवच्छि
दकताविशेषणं तत्वाधेयतायां संबंधावच्छिन्नत्वं प्रयोजनाभावात्। गगनादेश्च केनापि संबंधेनाधेयता नोपगम्यते कालिकसंबंधे
नाप्यवृत्तित्वादित्यभिप्रायात्। अलोकावृत्तिवृत्तित्वाभावमिति। धूमवत्साधेयतायामपि तत्प्रतियोगितासत्वात्। यद्यप्यभावानव
च्छिन्नत्वाविशेषणादेवैतदभाववारणात् गुरुतरस्वव्यापकेत्यादिव्यर्थं तथापि जगत्संयुक्तत्वधूमत्वाद्यधिकरणत्वोभयाभाववा
रणार्थं तद्दलमावश्यकमिति। स्वसमानेति स्वंप्रतियोगितास्त्रप्रतियोगित्वं वैशिष्ट्यान्वच्छिन्नप्रतियोगिताश्चान्यत्वं भेदप्रतियोगिता
नवच्छेदकत्वं तु ज्ञायः। वस्तुभावेति। यद्यपि इंधनत्वेन घटाभाववसुवचस्तथापि महानसीयवह्न्यभावव्यावृत्तये रूपपर्याप्तप्रतियो
गितावच्छेदकताकाभावोपि वक्तव्यीयः। एवं च प्रतियोगिविशेषणस्यापि अवच्छेदकतास्वीकारे तादृशाभावस्य रूपपर्याप्ता
वच्छेदकताकत्वाभावाद्वह्न्यभावानुसरणं। नन्वेवमपि ज्ञेयत्वत्वेन वाच्यत्वाभावस्यालेखनस्य निवृजत्वापत्तिः प्रतियोगि
तावच्छेदकावच्छिन्नसामानाधिकरण्यदले प्रयोजनाभावेन प्रतियोगितावच्छेदकतापर्याप्तेरविवक्षणात्। रूपपर्याप्तप्रतियोगिता

61

गितेति। तथा च कूटानिवेशे आलोकाद्यत्यभावादिसंग्रहापत्तेस्तन्निवेशो बोध्यः धूमत्वादीति। आदिना धूमत्वादिप्रकारकप्रमावि
शेष्यत्वपरिग्रहः। तेन निरुक्तवृत्तित्वाभावस्य स्वरूपसंबंधावच्छिन्नप्रतियोगिताकत्वविशेषणेऽपि न क्षतिः। घटाद्यन्यत्वाभाव
स्य चेति पाठे तु द्रव्यत्वादिपरित्यागः। अत्रापीति। अत्रापि वाच्यं प्रमेयादिसाध्यके उक्तरीत्याऽव्याप्तिवारणाय तत्तत्साध्याभाववद्वृ
त्तित्वत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नस्वव्यापकतादृशसंबंधावच्छिन्नवृत्तित्वत्वप्रतियोगिताकत्वमर्थो बोध्यः। हेतुताघ
टकसंबंधावच्छिन्नत्वप्रयोजनं प्रागवत्। इंधनत्वेन वह्न्यभाववद्वृत्तित्वत्वेन पर्वतवृत्तित्वाभावमादायाव्याप्तिस्तत्सामान्यरूपे
ण विशेषाभावानुपगमाद्वारणीया। एतेनैतत्कल्पत्रये पि द्रव्यं पृथिवीत्वादित्यादौ अव्याप्तिः। द्रव्यत्वत्वावच्छिन्नघटाभाववद्वृ
त्तितात्वेन घटवृत्तित्वघटान्यवृत्तित्वोभयाभावस्य घटरूपादौ प्रसिद्धस्य पृथिवीत्वेऽभावादिति पूर्वपक्षोऽप्यपास्तः। यद्वा। यत्प्रति
योगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावान्यत्वोभयाभावस्तत्प्रतियोगितायाः
वोक्तकल्पत्रयविशेषणघटकतया न दोषः। परंतु प्रतियोग्यंशे प्रकारीभूतधर्मस्यापि प्रतियोगितावच्छेदकत्वाद्व्यासज्यवृत्त्यव
च्छेदकताकान्यत्वं प्रतियोगिताविशेषणमिति। न दसत्। तथासति घटभेदत्वे घटभेदनिर्वह्निसंयुक्तत्वान्यतराभावस्य तत्तत्साध्या
भाववद्वृत्तित्वत्वातिरिक्तवृत्तित्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकस्योक्तविशेषणेन वारणात्प्रतियोगितायां विशेषणांतर
दानवैयर्थ्यापत्तेः। स्वन्यूनेति। धूमत्वाद्यभाववारणाय वृत्तितानिष्ठत्वं वृत्तित्वमात्रवृत्तित्वमपेक्ष्य न विशेषणे गौरवमित्यस्वरसः।
धर्मेणेवेति। तथा च तत्तत्साध्याभाववद्वृत्तित्वत्वानवच्छिन्नप्रकारतावच्छेदकः यदवच्छेदकसंबंधावच्छिन्नाधेयत्वाश्रयो धर्मः। तद

वच्छेदकतापर्यविवक्षणेपि महानसीयवह्न्यभावमादायादोषादिति चेन्न यथाश्रुतशिरोमणिमते धूमवान्वह्नेरित्यादौ धूमाभाववह्नि
धूमोभयाभावयोः समनैयत्येनैवप्रतियोगितावच्छेदकतापर्याप्तेरावश्यकत्वात्। अथ यत्कीलंकारैन द्रूपावच्छिन्नस्वरूपेन वृत्ति
धर्मीनवच्छिन्नयादृशप्रतियोगितानिरूपकोऽभावः तादृशप्रतियोगितावच्छेदकावच्छिन्नसामानाधिकरण्यं समनैयत्यमिबंधनदोषा
नुपपत्तयेजरीकृतमिति चेत्तर्हि तेषामर्थेस्यादिशंकायाः स्वलक्षणाभिप्रायकत्वयालक्षणाद्वयेप्यभावप्रदर्शनायसमवायित्वेन
वाच्यत्वाभावशब्दार्थत्वेनैवज्ञेयत्वेन वाच्यत्वाभावाभिधानेनाविरोधात्। अत्रैतिवदंतीत्यनेनान्वयः। तथापीति। ननु विशेषरूपे
णासंसर्गतानोपेयतेइति चेत्तथापि गोर्महाकालवृत्तित्वविशिष्टादित्यादौ समवायेन साध्यतायां कालिकसंबंधेन हेतुतायां वि
रूद्धरूपावच्छिन्नप्रतियोगिताकस्यतत्तद्धटावृत्त्यभावस्याधिकरणतत्तद्धटादिवृत्तित्वाभावस्य महाकालमात्रवृत्तिहेतौ सत्वा
त्। गोत्वाभाववत्कालावृत्तित्वलक्षणव्याधिकरणधर्मावच्छिन्नस्यैववृत्तित्वात्साध्यसामानाधिकरण्यावरूपकत्वात्। ननु विशेषरूपे
णासंसर्गतानोपेयते। यत्तु। विशेषरूपेणासंसर्गत्वोपगमेन क्षतिः। वृत्तिमद्वृत्तित्वेच वृत्तेर्हेतुतावच्छेदकसंबंधान्यहेतुप्रतियोगि
कसंबंधभिन्नसंबंधावच्छिन्नत्वेन निवेशपतयाहेतुप्रतियोगिकसंबंधावच्छिन्नवृत्तिमद्वृत्तेः साध्याभाववद्वृत्तित्वस्य हेतावस
त्वेनोक्तस्थलयोरदोषात्। न च वाच्यं स्वीयस्वरूपसंबंधेन ज्ञेयत्वादिसाध्यकाव्याप्तिः। तादृशवृत्तिमतिघटादौ तादृशसंबंधावच्छि
न्नजगद्वृत्तित्वसामान्याभावस्यैववृत्तेर्हेत्वभावादिति वाच्यं यथा नीलधूमत्वं न व्याप्यतावच्छेदकधर्मः। किंतु धूमत्वमेव तथा
स्वीयस्वरूपसंबंधेनव्याप्यतावच्छेदको गौरवात्किंतु शुद्धस्वरूपसंबंधः लाघवादिति प्राचीनसिद्धांतात्। इति। नदसत्वात्वह्नि

62

जा॰टी॰अ॰मंजू॰ मान्धूमादिसाध्येचययोत्ताव्रत्तिमद्वृत्तित्वघटितैवमवदुक्तव्याप्तेर्लक्षणाप्रसिद्धेरित्यतआह।तादृवस्थमादिति।नन्वेतत्क्षत्वेनिरवच्छिन्नविशेषण
९४ इतिचेन्न।धूमादौव्यधिकरणधर्मावच्छिन्नसाध्याभाववत्संयुक्तत्वाभावस्यस्वावयवावच्छेदेनवृत्तिमद्वृत्तिर्निरवच्छिन्नविशेषणतासंबंधे
नेतद्वृत्तित्वाभावादव्याप्तेः।निरवच्छिन्नविशेषणतासंबंधेनवृत्तिमद्वृत्तित्वनिवेशोन्योक्त।तिव्याप्तिर्दुर्वारैवतथासतिव्यधिकरणध
र्मावच्छिन्नमहाकालवृत्तित्वाभावस्यैवलक्षणाघटकत्वादिति।ननुतर्हिसाध्यसामानाधिकरण्यंव्यर्थमेवेत्यतआह।एवमिति।सर्वत्रेति
अभाववद्वृत्तित्वादिपरिग्रहार्थं।हेतुतावच्छेदकसंबंधेनाभाववद्वृत्तित्वंपरित्यजतिअन्यथेति।व्यधिकरणधर्मावच्छिन्नसाध्याभाववद्वृत्ति
त्वाभावस्यघटादौप्रसिद्धस्यहेत्वधिकरणतासामान्येऽभावाद्वृत्तिमत्वेस्वरूपसंबंधेनवर्तमानध्वंसादौतस्यैवप्रसिद्धस्यतत्राभावात्तद्वृत्ति
त्वे।धूमवान्वह्नेरित्यादावतिव्याप्तेश्चाधिकरणता।निष्ठतद्वृत्तेचस्वरूपसंबंधावच्छिन्नत्वनिवेशात्स्वावच्छिन्नाधिकरणताचहेतुताघटकसंबं
रि धेनवाच्या।अन्यथाधूमादावव्याप्तिः।व्यभिचारंवारणायसामान्यपदं।अधिकरणस्यैकत्वेतु[illegible]न्नदेयमितिकेचित्।। ।कूटाघटितलक्षणंस
माप्तं।। ।।श्रीगुरवेनमः।।कूटपदप्रवेशेनोनसौर्वभौमीयंलक्षणंपरिष्कुर्वन्नाहेतिवृत्तौडलितं।कूटपदमप्रवेश्यविशिष्टसाध्याभावंप्रवेश्य
परिष्कारस्यजगायस्त्वेनतत्कौलंकारैस्तथादुर्वचत्वात्।घटादेरिति।नन्वेतादृशवृत्तित्वत्वावच्छिन्नवृत्तित्वनिष्ठप्रतियोगिताकाभावनिवेशा
देतदभावव्युदासः।तादृशवृत्तित्वत्वेनन्हदवृत्तित्वाभावसत्वात्।तादृशेति।निर्वह्निवृत्तितत्त्वमप्येकव्यधिकरणधर्मावच्छिन्नसाध्याभावघटि
तकूटवद्वृत्तित्वत्वस्यापिगुरुतयानवच्छेदकत्वेनासंभवइत्यर्थः।अतएववक्ष्यमाणदोषाद्देव।तादृशवृत्तित्वसामान्याभावनिरुक्तसाध्याभा राम॰
वकूटाधिकरणवृत्तित्वावच्छिन्नतादृशकूटाधिकरणव[illegible]त्तित्वाभावः।प्रतियोगित्वेन्चस्वानाश्रयवृत्तिधर्मानवच्छिन्नत्वनिवेशात्सा ९४

मान्यरूपेण विशेषणाभावमादाय नातिव्याप्तिः। वह्निमान् धूमादित्यादावसंभवभयेन गुरुधर्मस्य प्रतियोगितावच्छेदकत्वस्वीकाराद्य
हा। केवलेति। इत्थमपि तादृशवृत्तित्वाभावे यावत्त्वनिवेशेऽपि गगनादिनिष्ठस्येति शेषः। प्रागुक्तदोषः। घटत्वेन वाच्यत्वाभावघटितकू
टवद्वृत्तित्वसामान्याभावस्य जातिवृत्तेर्द्वयत्वेऽभावाद्वाच्यत्वसाध्यकेऽत्राव्याप्तिः घटत्वाभावाभाववत्त्वेन विशेषणेन यावद्वृत्तित्वस्या
भावाभावस्यातिरिक्तत्वस्य वा स्वीकारे त्वाह। एवमिति। गगनाभावस्य केवलान्वयित्वात् कालिकसंबंधावच्छिन्नतदभावसाध्य
केनाव्याप्तिरतो गगनत्वाभावेति। अधिकरणमात्रा। अत्र कालिकसंबंधावच्छिन्नगगनाभावाभावसाध्यकगगनान्यत्वप्रकारक
प्रमाविषयत्वहेतावतिव्याप्तिरिष्टैव। संसर्गविधया संसर्गविषयतया नतत्राव्याप्तिरिति। साध्याभावकूटघटकसंयोगात्मकसाध्या
भावस्य तादृशसंबंधेन वृत्तित्वाभावाद्द्रव्यत्वादिना संयोगाभावाभावमादाय नाव्याप्तिः। अन्यथा तु निरवच्छिन्नसमवायसंबंधेन
संयोगघटिततादृशकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिः स्यादित्यर्थः। घटत्वाभाववान् पटत्वादित्यत्वादेस्सादावुक्ताव्याप्त्यतिव्याप्तीनि
रस्यति। घटत्वाद्यभाववत्त्वेनेति। तादृशसंबंधेन वृत्तिमतां साध्याभावानां प्रत्येकं तादृशसंबंधेनाधिकरणतानां कूटस्य निवेशात् स
मवायविशेषणतादिरूपविभिन्नसंबंधेन वृत्तिमत्त्वाद्यप्रसिद्धावपि न क्षतिः। स्वमिति। ननु प्रतियोगितायाः प्रतियोगिरूपतया
कस्याः अपि तस्याः न जगद्वृत्तित्वव्यापकत्वं तदभावप्रतियोगितात्वेन समनैयत्यस्य निवेशे च निर्वह्निवृत्त्यभावप्रतियोगितायाः
स्याभाववृत्तित्वादसंभव इति चेन्न। स्याभावस्यानवच्छिन्नप्रतियोगितात्वेनैव तदुक्तेर्नन्वभावानवच्छिन्नप्रतियोगिताकत्वनि
वेशादेवालोकाद्यभाववारणे तस्य व्यापकत्वं गुरुतरमपीति चेन्न। साध्याभावसमुदायाधिकरणवृत्तित्वलाभेकभेदत्वान्मत

63

वा
रावच्छिन्नाभावस्यजगद्वृत्तित्वलक्षणेयत्त्वाधिकरणत्वोभयाभावस्य च [illegible] रणायतदावश्यकत्वात्। स्वन्यूनेसारेः प्रयोजनं तत
रवदृत्तामतं निराकरोति। सार्वभौमेति प्रागिवेति। तत्र महानसवृत्तित्वाभावस्य लक्षणाघटकत्वान्नासंभवः कूटाघटितत्वसं
भवः। वह्न्यभावघटितकूटाधिकरणवृत्तित्वस्य च नवृत्तित्वत्वमवच्छेदकं अप्रसंगापादकत्वात्। अतो निर्वह्निवृत्तित्वत्वेति। साध
नसमानाधिकरणत्वेति साध्याभावविशेषणत्वेतु वृत्तित्वत्वमेवावच्छेदकमतः कूटे वह्न्यभावघटितत्वोत्कीर्तनं। साध्यप्रति
योगिकेति। समुदायपदानुपादानेस्वव्यापकसाध्यतावच्छेदकव्यापकत्वं व्यर्थं। एकैकपर्याप्ति वृत्तित्वावच्छिन्नाभाववद्वृत्तित्वनिष्ठ
प्रतियोगितायाः सामान्यतः साध्याभाववद्वृत्तित्वव्यापकतयापृथिवीत्वाभाववान्जलत्वादित्यादौ एकैकघटादिवृत्तित्व
निष्ठप्रतियोगितायाअपितथात्वेनाभाववान्मेयत्वादित्यादौचादोषादिसततस्ततस्त्यागः। साध्यप्रतियोगिकत्वं त्वखंडाभावघ
टकं साध्यघटितत्वलाभार्थं। वृत्तिमत्वेनापीति। इदं तु चिंत्यं। संबंधनिवेशानुरोधेन साध्याभावाधिकरणताकूटस्यावश्यक
त्वात्। यदि च समनियताभावे कपमते केवलान्वयिसाध्यके साध्याभावकूटाप्रसिद्धिभयेन साध्यतावच्छेदकसमनियतप्रति
योगिता कूटघटत्वं प्रवेश्यं। स्वनिरूपकाभाववत्त्वं च संबंधः तत्र च वृत्तिमद्देभावीयत्वं प्रतियोगिताविशेषणमावश्यकमित्युच्यते
तदापि तत्वतादृशप्रतियोगितावत्वकूटस्यावश्यकतया साध्यसाधनभेदेन व्याप्तिभेदात्केवलान्वयिस्थलीयव्याप्तौ कूटाप्रवेशेन च त
द्वैयर्थ्यमेवेति। अत्र चेति स्वव्यापकसाध्याभावसमुदायाधिकरणावृत्तित्वे सति साध्याभावाधिकरणावृत्तित्वव्यापकप्रति राम०
योगिताकावृत्तिमद्वृत्तयो यावंतोऽभावास्तद्वत्वामेसर्वथाप्रसिद्धेः। स्वव्यापकवृत्तितात्वेति। स्वव्यापकसाध्याभाववद्वृत्तितात्वे १५

सर्थः। तदभावेति। आलोकाद्यभावे सर्थः। तत्त्वं समुदायवद्रूपत्वं। अन्ययोभययोः समुदायपदप्रवेशो। व्यधीति। घटत्वादिना
जगद्वृत्तित्वाभावप्रतियोगितायाः धूमनिष्ठवृत्तित्वेपि सत्त्वात्। ननूत्तरदले समुदायपदानुपादाने स्वव्यापकसाध्याभाववत्समुदायवद्वृत्तित्वस्व
रूपत्वरूपं पूर्वदलमेव नास्ति आलोकाद्यभावादेः प्रतियोगितायाः साध्याभाववद्वृत्तित्वसाव्यापकत्वेनैवावारणात्। तथा च धूमवान्वह्ने
रित्यादावतिव्याप्तिसंगतेः किमनुचितं। यत्तूत्तरदलमात्रप्रवेशे पृथिवीद्रव्यत्वप्रकारकप्रमाविषयत्वादिसाध्ये जलाद्यभावतेजोत्वाभावघ
टितकूटवत्साध्यादिवृत्तित्वव्यापकप्रतियोगिताकत्वस्य जलान्यवृत्तित्वाभावस्य यावदंतर्गतस्य हेतावसत्त्वादेवानतिप्रसंगात्साध्य
तावच्छेदके स्वव्यापकत्वं नोपादेयमित्यपरमनुकूलमिति तत्तुच्छं। तस्य पृथिवीत्वाभावसाध्यकसद्धेतौ कृताधिकरणाप्रसिद्धिवारणार्थत्वा
दुत्तरदले घटासत्त्वे तु साध्यतावच्छेदकव्यापकप्रतियोगिताकाभाववत्त्वस्य जगति सत्त्वेनोक्तस्थलेऽतिरेव सत्त्वात् इति चेन्न। आलोकाद्यभेदा
जगत्संयुक्तत्वोभयाभावादिकमादाय पूर्वदलाभावेप्यतिव्याप्तेर्वारणासंभवात् समुदायपदस्यार्थवत्त्वात्। न च पूर्वदलोपादानेपि केवला
न्वयिसाध्यके घटसंयुक्तत्वघटान्यसंयुक्तत्वोभयाभावमादायाव्याप्तेर्धर्मासत्त्ववृत्तिधर्मानवच्छिन्नप्रतियोगिताकत्वं देयमिति नोक्ताभावा
ल्लक्षणाघटक इति वाच्यं। वह्निवृत्तिवृत्तितात्वेन जगद्वृत्तित्वाभावमादायानतिप्रसंगात्। न च ज्ञेयत्वनिष्ठवृत्तितात्वेन जगद्वृत्तित्वाभावमा
दायाव्याप्तेर्वारणाय विशेषरूपेण सामान्याभावप्रतियोगिताया विशेषधर्मनिष्ठत्वमतमालंब्यमिति वाच्यं। तथापि धूमभेदत्वेन धू
मभेदजगत्संयुक्तत्वान्यतराभावमादायानतिप्रसंगात्। न च वाच्यत्वभेदत्वेन वाच्यत्वभेदजगद्वृत्तित्वान्यतराभावमादाय केवलान्वयिसा
ध्यकेऽव्याप्तिवारणाय स्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं ग्रंथकृदुक्तं प्रतियोगिताविशेषणमिदानीमप्यावश्यकमिति वाच्यं। धूमभेदजगत्संयुक्तत्वे

64

ग·टी·म· तन्निष्ठाखंडाभ्यतरत्वेन धूमभेदजगत्संयुक्तलोभयाभावमादायैवानतिप्रसंगात् उभयत्वस्य एकविशिष्टापरत्वरूपतानिराकरणात् न च तुल्यायु
९६ क्त्यालोकभेदजगत्संयुक्तत्वे तन्निष्ठाखंडाभ्यतरत्वेनालोकभेदजगत्संयुक्तलोभयाभावमादाय वन्हिमान् धूमादित्यादावव्याप्तिरतः स्वव्या
पकसाध्याभावाधिकरणावृत्तित्वमुपादेयमिति युक्ताभाववारणादिति व्याप्तिसंगतिर्वाच्यं। आलोकावृत्तिवृत्तित्वाभावमादाय व्याप्तिवार
णायेतत्र समुदायपदस्यावश्यकतया नौचित्यसंगतेः। न चैवं वन्हिमान् धूमादित्यादावव्याप्तिः। निर्वन्हिवृत्तित्वाभावे उत्तरदलाभावात्।
जगद्वृत्तित्वाभावे पूर्वदलाभावात्। अतः पूर्वदले समुदायपदं न निवेश्यं। आलोकावृत्तित्वाभावस्येदानीमुत्तरदले समुदायपदाभावे न वारणा
दिति प्रतिव्याप्तिसंगतिरिति वाच्यं। पूर्वदले समुदायप्रवेशमभिप्रेत्यानौचित्याभिधानात्। तथा सत्यव्याप्तेरनभिधानेनातिव्याप्त्यभिधाने
न चानौचित्यात्। पूर्वदलेपि तदप्रवेशेनोदलद्वयस्यैवासत्वेन स्वमतपर्यवसानादिति। ननु गुरुधर्मस्य प्रतियोगितावच्छेदकत्वानंगीकृतमते
साध्याभावसमुदायाधिकरणावृत्तित्वस्य समानाधिकरणाभावप्रतियोगित्वापेक्षया स्वव्यापकत्वघटितता दशावृत्तित्वसमानाधिकर
णाभावप्रतियोगित्वस्य गुरुत्वेन तदवच्छिन्नाभावरूपव्यापकतानिवेशोऽसंभवादुक्तरीत्या द्वेधा निवेश आवश्यकः। न चोक्तदीधितिविरो
धः द्वितीयदले समुदायपदासत्वे पूर्वदलस्यैव व्यर्थत्वेपि आलोकभेदजगत्संयुक्तलोभयाभाववारणार्थं स्वव्यापकवृत्तित्वकत्वमात्रनिवेश
नात् तथा चान्यथेत्यादिग्रंथोक्तदूषणमसंगतमिति चेन्न। द्वेधानिवेशमतेपि निर्वन्हिवृत्तित्वापेक्षयाप्यधिकरणधर्मावच्छिन्नाभावघटितसा
ध्याभावकूटवद्वृत्तित्वस्य गुरुत्वेन तदवच्छिन्नाभावनिवेशासंभवात् साध्याभावकूटवद्वृत्तित्वनिष्ठाभावप्रतियोगिता नियावंति प्रत्येकं तत्तद्वृ राम·
त्तित्वावच्छिन्नाभावकूटरूपव्यापकत्वनिवेशस्यावश्यकतया तद्दीधितिसकलनिवेशासंभवेन द्वेधानिवेशानैरर्थक्यादिति। धूम इति। वह्नि ९६

वयवे धूमो सत्तिमभिप्रेत्य। नन्वत्र साध्यतावच्छेदकसंबंधावच्छिन्नप्रतियोगितानिवेशेऽपि समवायावच्छिन्नवह्न्यभावघटितकूटवत्ताया
गगनादावपि सत्त्वात् वह्न्यवयवमात्रसंयुक्तपदार्थाप्रसिद्धेः। वृत्तिमद्वृत्ति वह्न्यसमवायिसंयोगसंबंधावच्छिन्नसंवद्धत्वाभावोऽव्यधिकरण
धर्मावच्छिन्नाभावरावेत्यात्तिव्याप्तितादवस्थ्यं तादात्म्यादिसंबंधेन हेतुतास्थलानुरोधेन साध्याभावकूटवत्त्वसंबद्धत्वस्यैव निवेशादिति
चेन्न। वृत्तिनियामकसंयोगत्वेन हेतुताघटकसंबंधतायामतिव्याप्त्यभिधानात्। प्रलयः संडः विभुमूर्तजन्यानां यथायोगमिति। जन्ये
विभौ मूर्त्ते च क्रमेणेत्यर्थः। प्रलयपूर्वोत्पन्नेति पाठांतरं व्यर्थं प्रलयेपि कर्मणो वा बुस्थाप्यमानत्वात्। ननुपलयोत्पन्नकर्मणि ब्रह्मांडा
तरस्थवह्निसंभवइत्यत आह। तद्ध्वंसेति। तत्र महाप्रलयावच्छेदेन कालिकसंबंधावह्न्यभावसंभवात्। ननु तत्र तत्स्मनिरवच्छिन्ना
स्वरूपसंबंधेन न वृत्तिः स्वप्रतियोगितावच्छेदकविशिष्टप्रतियोगिमत्ताग्रहविरोधित्वनियामकसंबंधेन वृत्तिमत्त्वस्य साध्याभा
वेद्दत्त्वात् इत्यत आह। नित्यरूपेति। अत्रेदं चिंत्यं विभौ वृत्तिनियामकसंयोगेन ह्निसत्त्वेपि प्रतियोगितावच्छेदकतार्ह वृत्तिनियामकसंयो
गेन न वह्निः एवं कालिकसंबंधदिक्कृतविशेषणतासंबंधावच्छिन्नवह्न्यभावयोः प्रथमं कथं परीक्षागःप्रश्नाहुकथंमुपानां न च संबंध
द्वयावच्छिन्नवह्न्यभावद्वयवति जन्ये वह्न्यनधिकरणदेशावच्छेदेन कालिकसंबंधावच्छिन्नवह्न्यभाववत्त्वा एवं तादृशे मूर्त्ते तादृशदेशा
वच्छेदेन दिक्कृतविशेषतासंबंधेन वह्न्यभाववत्त्वमित्यभिप्रेत्य नयोरनभिधानमिति वाच्यम् एवं तत्सत्संयोगावच्छिन्नवह्न्यभाववत्तानि
राकरणे न विरोधितानियामकतया निरवच्छिन्नविशेषणतासंबंधस्यैवाप्यपर स्वभावस्थलीयत्वात् तादृशसंबंधेन तादृशं जन्ये म
त्तैवतयोरसत्त्वात्। तस्मादत्र वह्निमान्धूमादित्यादौ कालिकसंबंधदिक्कृतविशेषणतासंबंधावच्छिन्नवह्न्यभावघटितकूटव

65

टी·अ·मंजू· न्निरूपे हेतुता घटकसंबंधेन वह्न्यप्रसिद्धेरव्याप्तिवारणाय सर्वाधारतानियामकसंबंधानवच्छिन्नप्रतियोगिताकसाध्याभाव एव नि
९१ वेश्यः। कालिकादिसंबंधेन साध्यतायामव्याप्तिसत्वेपि अतिदुष्टत्वादतिव्याप्त्यनुधावनं। यादृशसाध्याभाववत्तावच्छेदकतावच्छेदकसंबंधवदिति
साविवक्षणीयं। कालिकसंबंधावच्छिन्नवह्न्यभावमात्रघटितसंबंधद्वयावच्छिन्नवह्न्यभावद्वयघटितत्तोमवति दैशिकविशेषणतासंबंधा
वच्छिन्नवह्न्यभावमात्रघटितद्वयघटितत्तोमवति संयोगिनि धूमस्यावृत्तेरव्याप्तिवारणस्यातिव्याप्तिप्रसंगमनसंभवात्। अग्निमं चाव्याप्ति
पूरणं पक्षद्वयेप्यशुद्धमेवेति। तस्मादत्र वह्न्यवयवे धूमो सत्यनुगमे विरुद्धता साध्यसामानाधिकरण्येनैव वारणाभिप्रायेण ग्रंथावतारणं
बोध्यं। अथवा विभुसंयोगस्य विशेषवृत्त्यनियामकत्वेपि वह्न्यादेर्वृत्तिनियामकत्वमेव एवं च साध्यतावच्छेदकसंबंधावच्छिन्नत्वदानपक्षेत
स्य वृत्त्यनियामकत्वमपेक्ष्य तद्दानपक्ष एव साधुः। तत्रातिव्याप्तेरेवासत्वादित्याशयः। कतिपयाभावमादाय दीधितिकाराणामतिव्या
प्तिप्रदर्शनं च शिष्यबुद्धिवैशद्याय परीक्षार्थं न तु तदाभासत्वात्स यमिति अवतारिकासंगतिः। नापि निरुक्तो किंचिद्विशेषणव्यंजकं।
एवं चाग्निमव्याप्तिपूरणं आवश्यकमिति। समवायेनेति। धूमपरमाणावपि मत्तेमात्रस्य गुणाधितामते दिक्विशेषणतया वह्नेर्वृत्तेः। ताद
शेति। पर्वतवह्न्यवयववृत्तीत्यर्थः। अव्याप्तिरिति। जातिमान् घटत्वप्रकारकप्रमाविषयत्वादित्यादौ संबंधसामान्यावच्छिन्नसाध्याभावकू
टवन्निरूपितहेतुताघटकसंबंधावच्छिन्नवृत्तित्वाभावसत्वाल्लक्षणासमन्वयात्। इदं वाच्यं ज्ञेयत्वादित्यादौ तु न लक्षणसमन्वयः। कालिक
संबंधावच्छिन्नवाच्यत्वाभावघटितकूटस्य नित्येसत्वात्। वृत्तिनियामकसंबंधस्याभावप्रतियोगितानवच्छेदकत्वेपि धनादेः स्वामित्वा राम॰
दिसंबंधेन साध्यतायां नाव्याप्तिः। व्यधिकरणाभूतस्वरूपसंबंधावच्छिन्नसाध्याभावसंभवादिमतमुद्भावयति। साध्यतेति। धनादिसा ९०

ध्यकेऽव्याप्तिवारणाय समानाधिकरणेति साध्यप्रतियोगिकेत्यर्थः। यद्यपि स्वामित्वादिसंबंधेन प्रमेयत्वावच्छिन्नसाध्यकेऽव्याप्तिः।
तादृशसंबंधाप्रसिद्धेः। साध्यतावच्छेदकसंबंधेन वृत्तिमत्साध्यप्रतियोगिकेत्युक्तौ च धनानात्मकाभावीयस्वरूपसंबंधादेः प्रसि
द्धावपि विषयतया प्रमेयसाध्यके तादृशसंबंधाप्रसिद्धिरेव तथापि साध्यनिष्ठाधेयतावच्छेदकेत्यर्थात्तादात्म्येन घटत्वपटत्वाभ्यां प्रमे
यभेदप्रसिद्धेरिति व्याप्तिमाहेति न नसमानाधिकरणपदासंगतिः। अवृत्तिगगनादिनेति। नन्वत्र स्वरूपसंबंधेन गगनादेर्वृत्ति+धनी
ति साध्यतेति। अतिरिक्तत्वे तदनवच्छिन्नप्रकारकतावच्छेदकत्वे। तेन प्रमेयसाध्यतावच्छेदकेनाप्रसिद्धिः। धर्मत्वमविवक्षितं+
तापक्षेनायमभावो लक्षणघटकः विषयितादिनासंबंद्धत्वात्। न च सामानाधिकरण्यघटकवृत्तित्वं साध्यतावच्छेदकताघटकसंबं
धेन विवक्षितं। वह्नित्वाधिकरणत्वेन वह्न्यभावजलत्वाधिकरणत्वेन जलाभावादिकूटवत्वाप्रसिद्ध्या वह्निमान् धूमादित्यादावव्या
प्तेः। नापि प्रतियोगितावच्छेदकताघटकसंबंधेन तत्ता धूमवान्वह्नेरित्यादौ समवाये न हेतौ कालिकसंबंधेन धूमत्वविशिष्टसंसं
योगसंबंधावच्छिन्नाभावस्य साध्यतावच्छेदकातिरिक्तेत्यादिविशेषणाक्रांततया हेतुमतस्तद्वृत्तिकूटानधिकरणत्वात्। न च स्वानव
च्छिन्नेत्यत्रावच्छेदकत्वं साध्यतावच्छेदकताघटकसंबंधेनेति न दोषः। तथापि धूमाभावस्य लक्षणघटकत्वापत्तेः। प्रतियोगि
त्वावच्छेदकधूमत्वस्य समवायच्छिन्नस्वानवच्छिन्नप्रकारतावच्छेदकत्वात्। प्रतियोगितावच्छेदकताघटकसंबंधेन वृत्तित्वाद्यप्रसि
पत्तौ चागगनादिना धूमाभावमादायातिव्याप्तिः। एतेन धर्मानवच्छिन्नत्वेऽवच्छेदकत्वं साध्यतावच्छेदकताघटकसंबंधेने [redacted]
सुक्तावपि न निस्तार इति चेन्न। साध्यतावच्छेदकनिष्ठसाध्यतावच्छेदकताघटकसंबंधावच्छिन्नावच्छेदकत्वाख्यया प्रतियोगितावच्छेदक

०टी०अ०मंजू० ताघटकसंबंधावच्छिन्नवृत्तिमन्निष्ठावच्छेदकतातदनिरूपकप्रतियोगिताकाभावस्य वाच्यत्वात्। वह्निमान्धूमादित्यादौ घ
९८ टाभावघटाभावादिघटितकूटाधिकरणाप्रसिद्धेर्निष्ठांतं। कालिकादिसंबंधेन धूमत्वविशिष्टस्याभावघटितकूटवत्त्वस्य
गुणादौ सत्त्वादतिव्याप्तेः। अवच्छिन्नांतं। तेन वह्न्यधिकरणत्वेन वह्न्यभावादिवारणं। एवं च यद्यपि गगनेन वाच्यत्वाभावो दिक्सं
भवति। तथापि समवायित्वेन वाच्यत्वाभावस्य तादृशत्वात् या अप्रथे सा दिशं का याप्य संगतिरिति समानाधिकरणेति। यथासन्निवे
शोऽवैयर्थ्यमिति परैरपरिशीलितः पंथाः। प्रतियोगिभेदेन प्रतियोगिताभेदे यत्किंचिदेकप्रतियोगिताव्यापकसाध्यतावच्छेदक
व्यापकप्रतियोगिताकस्य तत्तद्वृत्त्यत्यन्ताभावस्य कूटाधिकरणाप्रसिद्धेरव्याप्तेराह। एकधर्मावच्छिन्नेति। गुणादाविति अधिक
रणतासत्त्वादित्यादिना संबंधः तदुभयं नोदाहृतमिति। तथा चाप्रसिद्धिवारणाय साध्याभावसमुदायवद्वृत्तित्वप्रतियोगिकया
वद्भाववत्त्वावच्छिन्नाधिकरणतासामान्यकत्वविपक्षेऽपि दोषं यथोक्तसाध्याभावनिवेशणप्रवेशोत्तरमपि हेतुताघटकसंबंधा
वच्छिन्नवृत्तित्वाप्रसिद्धिसत्त्वेन तद्वारकत्वाभिमानेन पूर्वं यथोक्तसाध्याभावविशेषणाप्रवेशेऽनौचित्यवावकंउक्तस्थलद्वयपरित्या
गइति भावः। द्रव्यत्वप्रमाविषयत्वस्य हेतुत्वे साध्यतावच्छेदकव्यापकप्रतियोगिताकोक्ताभावकूटाधिकरणे द्रव्यत्वे हेतोर्वृत्तेर्नाति
व्याप्तिरतो विशेष्यत्वानुधावनं। भ्रमं सर्वं द्रव्यमित्याकारं। तथा च द्रव्यत्वप्रकारकज्ञानविशेष्यत्वेनातिव्याप्तिः ईश्वरत्वं नित्येच्छा
वत्त्वं निरस्यन्ति मत्वं तादात्म्यत्वं ना। यावतामभावानामेकाधिकरण्यमिति विवक्षायामप्याह। नवेति तादृशैवसाध्यतादात्म्येन नि राम०
स्यज्ञानवति साध्ये। न च तादृशसाध्ये द्रव्यत्वमेव हेतुरस्त्विति वाच्यं। तथा सति पृथिवीभिन्नसमवायिभेदपृथिवीभिन्नभावभेदादि ९८

७ घटकताप्रसक्तिः। तत्प्रतियोगिगुणादेर्विषयतासंबंधेन तच्छून्यत्वादिति। द्रव्यवृत्तित्वं च तत्समवेतत्वं तद्विषयकत्वं ७

कूटाधिकरणेऽभावे समवायसंबंधेन वृत्त्यप्रसिद्धेर्वा तिव्याप्त्यप्रसक्तेः पृथिव्यादीति जीवभिन्नद्रव्यभेद पृथिवीभिन्नद्रव्यभेदजल
भिन्नद्रव्यभेदादिघटितकूटस्येत्यर्थः। ननु पृथिवीभिन्नभेदजलभिन्नभेदादेरपि तादृशत्वात्तद्घटितकूटाधिकरणाप्रसिद्धेरेवना
तिव्याप्तिरिति चेन्न। यतः यावतामभावानामभावांतरेण सामानाधिकरण्यं तन्निवेशे यथाश्रुते चाव्याप्तिः। यावतामभावानां मिथः
सामानाधिकरण्यमिति निवेशे तु अतिव्याप्तिः। न चैवमपि केवलपृथिवीभिन्नभेदवदधिकरणधर्मावच्छिन्नाभावघटितकूटं मिथःस
मानाधिकरणमादाय नातिव्याप्तिरिति वाच्यं। तावतापि दर्शितरीत्या लक्षणसत्ताया अवारणात्। यत्किंचिदेकसाध्याभावकूट
घटितसकलवृत्तित्वाभावसत्वात्। वस्तुतस्तु। द्रव्यवृत्तित्वविशिष्टनित्यज्ञानं यत्र साध्यतावच्छेदकं तत्र पृथिवीभिन्नभेदादेर्नञ्
स्पर्शो वा। न चैवं द्रव्यत्वमेव हेतुरस्त्विति वाच्यं। इष्टत्वात्। भावविषयकत्वविशिष्टनित्यज्ञानादेः साध्यतावच्छेदकत्वे निरुक्तानवच्छाव
भेदस्यापि कूटघटकतयोक्तहेतुसंगतेः अत एव तत्रैव साध्ये दूषणमभिधाय तादृश एवेत्युक्तं तत्सदृश एवेत्यर्थः। एकेति। अथैवं
इदानीमेवोभयत्वस्य विशिष्टवस्तुतानिर्धारणे द्रव्यत्वपृथिवीत्वोभयेत्यादिप्रथमदूषणासंगतिरिति चेन्न। यावंतो धर्माः संभवंती
ति न्यायेन तद्दूषणासंगतेः। वस्तुतस्तु इदानीं तथा निर्धारणमेव नास्तीति युक्तं। प्रतियोगितावच्छिन्नरूपितनिरवच्छिन्नवृत्तिकाभावा
प्रतियोगित्वस्यैव प्रतियोगितावच्छेदकत्वरूपत्वेनोभयसाध्यकेदोषस्य संभावयितुमयुक्तत्वात्। अन्यथा पवनसंयोगपादेः साध्यत्वेऽ
व्याप्त्यापत्तेः। न चैवं इदं वाच्यं ज्ञेयत्वादित्यादौ घटवृत्तित्वघटान्यवृत्तित्वोभयाभावमादाय व्याप्तिरिति वाच्यं। तद्दूषणस्येदानीं
पिहि[illegible]तत्वात्। किमत्र बीजमिति चेत् साधनसमानाधिकरणत्वेन साध्याभावविशेषणत्वे दीधितिकाराणां व्यासज्यवृत्तिधर्मा

जा॰टी॰प॰मंजू॰ नवच्छिन्नतादृशावृत्तित्वव्यापकत्वेनप्रतियोगितानिवेशानसार्वभौमात्वंतुतादृशीमपिनयथाश्रुतेतादृशवृत्तित्वसमनैयत्यं।किंतु
९९ समनियतप्रतियोगितासाधारणंप्रतियोगिविशेषणतापन्नसाध्याभावकूटवद्वृत्तित्वनिष्ठविलक्षणावच्छेदकतान्यधर्मानिष्ठाव
च्छेदकतानिरूपकत्वरूपंपारिभाषिकंतत्।तच्चेदंदीधितिकारैर्वीज्ञातंपूर्वंकूटाघटितस्यैवोक्तत्वादिति।नन्वेवंमहानसीयवह्निमान्
धूमादित्यादावतिव्याप्तिः।स्वप्रतियोगिताव्यापकवह्नित्वरूपसाध्यतावच्छेदककवह्निसामान्याभावस्यापिकूटघटकत्वादितिचेन्न।
साध्यतावच्छेदकतायद्धर्मावच्छेदेनपर्याप्तातद्धर्मावच्छिन्नत्वविशिष्टविशेषणतासंबंधेनप्रतियोगिताव्यापकत्वस्यविशेषणीयत्वा
त्।उभयसाध्यकेपिवह्नित्वधूमत्वोभयत्वनिष्ठत्रित्वावच्छेदेननिरुक्तप्रतियोगिताव्यापकत्वमक्षतमेवेति।स्वन्यूनेति।अथवह्नित्वेनप्र
मेयसामान्याभावेतिपंक्तेःकूटघटिताभिप्रायकत्वविरोधः।साध्यसाधनभेदेनव्याप्तिभेदात्।प्रमेयसाध्यकेतद्विशेषणानुपादानेतु
घटत्वाभावत्वादिनाप्रमेयसामान्याभावादिकमादायकूटाधिकरणाप्रसिद्धिर्जागरूकैवेतिचेन्न।यथाश्रुतेतदभिधानात्।एतन्नि
वेशेविरुद्धघटत्वपटत्वाभ्यांप्रमेयाभावस्योक्तत्वात्।स्वन्यूनवृत्तित्वंचविरुद्धव्यावृत्तंस्वसमानाधिकरणभेदप्रतियोगितावच्छेदकता
वच्छेदकत्वेसतिस्वाधिकरणावृत्तितावच्छेदकत्वंफलतोऽवच्छेदकताविशेषणं।तेनोक्तस्थलेघटत्वपटत्वयोःप्रत्येकंस्वन्यूनवृत्तित्वेपि
नासंग्रहः।प्रतियोगितावच्छेदकताघटकसंबंधेनभेदप्रतियोगितावच्छेदकत्वंसामानाधिकरण्यंचग्राह्यं।तेनयत्किंचित्।एकज्ञा
नविषयत्वादिसंबंधावच्छिन्नावच्छेदकतावच्छेदकीभूतावच्छेदकतानिरूपकप्रतियोगिताकघटत्वाभावत्वेनपटत्वाभावत्वेनचप्र राम॰ ९९
मेयाभावघटितकूटाधिकरणाप्रसिद्धावपिप्रतियोगितायांविषयितारूपसंबंधसामान्यावच्छिन्नावच्छेदकतावच्छेदकीभूतावच्छेदक

त्वनिरूपकतासत्त्वेन धूमसामान्याभावस्य लक्षणाघटकत्वेपि च न क्षतिः। न वा कालिकादिसंबंधेन घटत्वादेः प्रतियोगिवृत्तित्वे
पि घटत्वे न वह्न्यभावाद्यसंग्रहः। वस्तुतस्तु घटत्वपटत्वाभ्यां प्रमेयसामान्याभावासंग्रहेपि न क्षतिः। सर्वत्रापि समवायेनावृत्तिग
गनादिना साध्याभाव एव लक्षणघटकः। स्वसमानाधिकरणभेदप्रतियोगितावच्छेदकत्वमात्रमत्र न्यूनवृत्तित्वं। धर्मत्वं च प्रतियो
गितावच्छेदकताघटकसंबंधेन तेन ज्ञानादिसाध्यककेवलान्वयिनि कालिकविषयितादिना गगनादेर्धर्मत्वेपि न क्षतिः। घटत्वपट
त्वाभ्यां प्रमेयाभावस्यासंग्राह्यत्वे सर्वत्रापि तुल्यरीत्या ह्रदत्ववह्नित्वाभ्यां वह्न्यभावादेरेव लक्षणाघटकत्वसंभवात् स्वसामानाधिकरण्या
वच्छेदकत्वं न देयमेव। व्यधिकरणीभूतैकधर्मावच्छिन्नप्रतियोगिताया एवं ये तु ह्रदत्ववह्नित्वाभ्यां वह्न्यभावादेः प्रमेयमात्रप्रतियो
गिकतया लक्षणाघटकत्वे तु अवच्छेदकतायां स्वसमानाधिकरणावृत्तित्वमपि सम्यक् परं तु तत्स्वसामानाधिकरण्यावच्छेदकत्वा
पेक्षया गुर्विति। ननूभयादिसाध्यकातिव्याप्त्यादीति उत्तरग्रन्थावतारणे विचारासहा निदर्शिता ननु केवलान्वयिसाध्यकाव्याप्तिर्वि
चारसहेति कोयमनुक्रम इत्याशयेन शंकते। यद्यपीति। स्फुरतयेति। साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकरण्यव्यधिकरणध
र्मावच्छिन्नाभावभिन्नत्वोभयाभावरूपपारिभाषिकव्याप्यवृत्तित्वनिदानींमनीन निविष्टं तेन सत्तावान् जातेरित्यादौ गुणान्यत्ववि
शिष्टसत्ताभावगुणवृत्तित्वविशिष्टसत्ताभावयोर्वारणाय तत्प्रवेशात् दूषणोद्धारो नाशंक्यः। सत्तासामान्याभावघटितकूटवत्त्वस्य
सामान्य एव भावात्तदभावयोः कूटघटकत्वेप्यक्षतेः। एतदव्याप्तिवारणार्थमपि तन्निवेशो नाशंक्यः। इदानीं यथोक्तलक्षणमात्र ए
वखण्डनोपक्रमात्। यावतामभावानामेकाधिकरण्यमिति विवक्षायामपीदं दूषणं। एकतरतादृशवाच्यत्वाद्यभावघटितकूटमादा

गा०टी०ग्र०मे० १००

याप्यासिसंभवात्। साधनसामानाधिकरण्योपादानत्वे तदप्युद्धरिष्यामः। पृथिवीत्वविशिष्टद्रव्यत्वत्वमेवेति। द्रव्यत्वविशिष्ट
पृथिवीत्वत्वं वा तथा। तेन न पूर्वोक्तदोषावकाशः। अतत्त्वादिति। अन्यथा घटो द्रव्यमिति प्रयोगो न स्यादिति भावः। साध्य
तेति। तथा सति सहेतुत्वेनातिव्याप्त्ययोगादिति भावः। सकलद्रव्यसमवेतत्वं द्रव्यनिष्ठभेदप्रतियोगितानवच्छेदकत्वं। न च सकलेति। न
नु पृथिव्यन्यत्वविशिष्टद्रव्यान्यासमवेतत्वमात्रस्य साध्यतावच्छेदकत्वमस्तु। तथा सति द्रव्यान्यासमवेतत्वाद्यवच्छिन्नाभावसंभवा
त् कथमियमाशंकेति चेत्, तादृशाभावप्रतियोगित्वस्य साध्यतावच्छेदकस्यापि पार्थिवरूपेऽपि सत्त्वे न तत्समनियतप्रतियोगिताकत्वाभा
वात्। तस्य चेति। ननु यदि सकलद्रव्यसमवेतत्वघटितमघटितं साध्यतावच्छेदकं तदा लाघवाभिधानमसंगतं द्रव्यान्यासमवेत
त्वस्य गुणादिसाधारण्यादिति चेन्न। द्रव्यान्यासमवेताभावप्रतियोगितावच्छेदकताया द्रव्यत्वानुयोगिकविशेषणतासंबंधावच्छिन्नाया
अभिमतत्वात्। न चैवं साध्यतावच्छेदके सकलद्रव्यवृत्तित्वोत्कीर्तनं व्यर्थं। उक्तसंबंधस्य साध्यतावच्छेदकताघटकत्वोपगमे नैव तस्य जल
त्वादिसाधारण्यवारणसंभवादिति वाच्यं। द्रव्यत्वशब्दस्योक्तसंबंधेन द्रव्यान्यावृत्तित्ववति शक्तेर्निरूढवृत्तेर्वा सत्त्वे न तद्लाभात्।
न चैवमपि गौरवाभिधानमयुक्तं मुक्तसंबंधेनाभावमात्रे एव प्रतियोगितावच्छेदकत्वसंभवादिति वाच्यं। स्वरूपतोऽभावस्यानव
च्छेदकत्वात्तद्व्यक्तित्वेन तथात्वे च गौरवात्। प्रतियोगितावच्छेदकताघटकसंबंधनिवेशनं गौरवाच्च। द्रव्यत्वनिष्ठतद्व्यक्तित्वं तु ना
वच्छेदकं। तस्य द्रव्यत्वत्वशब्दार्थत्वाभावात्। तस्य स्वरूपतोऽभावस्य सकलमतासिद्धत्वात्तद्व्यक्तित्वेनानुल्लेखाच्च। एवं पृथिव्यन्य राम० १००
त्वविशिष्टद्रव्यत्वत्वेऽप्यादावपि प्रकारता रूपं द्रव्यं त्वत्वमेव द्रष्टव्यं। यद्वा। समवेताभावपृथिवीसमवेताभावद्वयवद्द्रव्यत्वाभावद्

आन्यासमेताभावद्वयस्य समनैयत्यमेव द्रव्यान्यावृत्तित्वे द्रव्यं। येषामसमवेताभावत्वाभावप्रतियोगितावच्छेदकतां संभावयिष्यति।
परं तु विशेषरूपेणासंसर्गत्वाभावे द्रव्यान्यासमवेतत्वावच्छिन्नायाः प्रतियोगितायाः गुणादिसाधारणप्रकारताविशेषावच्छिन्नाया
स्फलत्वावृत्तत्वासमवेताभावस्थले तु येषां येषां समवेतत्वावच्छिन्नप्रतियोगित्वं तेषामेव पृथिवीसमवेतत्वावच्छिन्नप्रतियोगि
त्वं तस्याजलत्वादिव्यावृत्तत्वासिद्धेर्गदाधरेणोक्तेरिति विशेषः। पृथिवीतिाननुसत्तावान्जातेरित्यादौ गुणवृत्तित्वविशिष्टसत्ताभाव
गुणान्यवृत्तित्वविशिष्टसत्ताभावघटितकूटवत्त्वस्य जातिमान्सत्वादित्यादौ घटत्वतद्भिन्नजात्युभयाभावपटत्वतद्भिन्नजात्युभयाभाव
घटितकूटवत्त्वस्य चसामान्यादौ सत्वेन तत्र हेतुताघटकसंबन्धेन वृत्तेप्रसिद्ध्या ऽप्राप्तिरतः पूर्वोक्तव्याप्यवृत्तित्वविशेषणं। तथा
च पृथिवीवृत्तित्वविशिष्टद्रव्यत्वाभावस्य कथं परिग्रह इति चेय यदीदानीमेवोक्तविशेषणाप्रवेशात्तदा घटान्यत्वविशिष्टद्रव्यत्वा
भावपटान्यत्वविशिष्टद्रव्यत्वाभावादेः परिग्राह्यत्वान्न दोषः। यद्विच साध्यतावच्छेदकातिरिक्तधर्मावच्छिन्नप्रतियोगिताकत्वसाध्यता
वच्छेदकव्यापकसमानाधिकरणधर्मावच्छिन्नप्रतियोगिताकत्वोभयाववत्वे प्रवेशपता दृशाभावो वार्यते॥ अतिरिक्तधर्मवृत्तित्वं च सा
ध्यतावच्छेदकपर्याप्तावच्छेदकतान्यत्वे सति धर्मनिष्ठत्वं। तेन गुणवृत्तित्वविशिष्टसत्ताद्यभावव्युदासः। अभावसाध्यके साध्यतावच्छे
दकव्यापकत्वरूपप्रतियोगिताविशेषणसार्थक्यार्थं साध्यतावच्छेदकव्यापक[illegible]विशिष्टसत्ताद्यभावव्युदासः। अभावसाध्यके साध्य
तावच्छेदकव्यापकत्वरूपप्रतियोगिताविशेषणसार्थक्ये इति निवेशः। अन्यथा घटभेदाभावादेरसंग्रहात्तद्वैयर्थ्यात्। केवलान्वयिसा
ध्यके समः वा यित्वेन वाच्यत्वाभावस्य गगनाभावाभिन्नतया ऽव्याप्तिवारणमपि व्यापकत्वांतनिवेशफलं। समानाधिकरणधर्मा

69

ला॰टी॰कृ॰मेनू॰ १०१ वच्छिन्नप्रतियोगितायां वृत्तिमत्त्विष्टत्वनिवेशात्तन्निरुक्तप्रतियोगिताविशेषणवैयर्थ्याभावहेदित्युच्यते तदा नेदमादिपदमुपात्तसाध्य
कावच्छेदकांतरग्राहकं तु रूपान्यगुणवान् गुणत्वादित्यादौ प्रथमादिपदग्राह्यो गुणत्वत्वादिरूपावच्छेदकपरिग्रहार्थमिति। साध्यतावच्छे
दकान्येति वर्णितार्थः। नन्वत्र घ्राणग्राह्यगुणवान् द्रव्यत्वादित्यादावनुक्तेवातिव्याप्तिरित्यत आह। गुरुधर्मस्येति। प्रांच इति अरूविप्र
कारेनाय। सा च विशिष्टातिरिक्तत्वे विशिष्टस्वरूपं चोभयत्वमिति सार्वभौममतं दर्शितं तत्र चोभयत्वं विशिष्टत्वादतिरिक्तं वि
शिष्टं च केवलान्नान्यदिति। राद्धांतमाश्रित्य क्रमेण दूषणद्वयमुक्तं तत्र कथं इदानीं विशिष्टस्य केवलादन्यत्वमाश्रयितुं युज्येत सि
द्धांतविरोधात्। नन्वेवं पूर्वावतारिकायाः असंगतिः। सार्वभौममते एव उभयत्वस्य विशिष्टस्वरूपत्वात्। तद्वत्त्वे च सिद्धांतभंगप्रसं
गात्। इति। वास्तवं तदवतारिकायाः प्राचीनोक्तायाः एव तस्य लिखनात्। अत एव तत्र सार्वभौमानां मते विरुद्धयोरुभयत्वस्यातिरिक्तत्वेपी
सक्तं। तेन चाविरुद्धयोरुभयत्वमपि विशिष्टत्वादतिरिक्तमेवेति एकसिद्धांतानुसारेणैकदूषणमुक्त्वा द्वितीयसिद्धांतानुसारेण दूषणांत
रमाह। अपि चेत्यादौ एवंरूपं सिद्धांतानुरोधवत्त्वं तमपि सूचितं वस्तुतस्तु प्रतियोगितायाः साध्यतावच्छेदकस्य च स्वावच्छि
न्नवत्तासंबंधेनैव परस्परव्यापकत्वं निवेश्यं। तेनोक्तस्थले द्रव्यत्वपृथिवीत्वान्यतराभाव द्रव्यत्वाभावादिमादाय नातिव्या
प्तिः तत्प्रतियोगितावच्छिन्नप्रतिद्रव्यत्वपृथिवीत्वोभयत्वेन विशिष्टद्रव्यत्वेन चाव्यापकत्वात्। प्रतियोगितायाः स्वावच्छिन्न राम॰
वत्वं तु स्वावच्छेदकसंबंधेन। न तु साध्यतावच्छेदकसंबंधेन तेन एतद्रूपान्यत्वविशिष्टरूपत्ववान् रूपत्वादित्यादौ रूपानुयोगिकत्व
विशिष्टस्वरूपसंबंधेन तद्रूपान्यत्वाभावस्य साध्याभावत्वात्तमादायैव नातिव्याप्तिः। एवं वृत्यनियामकसंबंधेन गुरुधर्मेण च सो १०१

ध्यतायां तयोः प्रतियोगितानवच्छेदकत्वेपि न क्षतिर्नवा घटत्वेन वाच्यत्वाभावस्य घटत्वेन पराद्यभावस्य चैकधर्मावच्छिन्नतया
प्रतियोगिताभेदेपि केवलान्वयित्वव्याप्तिरत आह किंचेत्यवतरणीयमिति। सकलेति। कालिकसंबंधेनेत्यादिः। मिथ इति। तथा च या
वतामभावानां परस्परमैकाधिकरण्यं तावत्समुदायाधिकरणं यद्यत् तावदन्यतमवृत्तित्वसमनियतप्रतियोगिताकाभावाः यावंतो
वृत्तिमद्वृत्तयस्तद्वत्त्वमर्थः। तेन रूपाभाववान् वायुपृथिव्यन्यतरत्वादित्यादौ जलीयरूपादिघटिततादृशसमुदायाधिकरण
यत्किंचिज्जलादिवृत्तित्वाभावसत्वेपि नातिव्याप्तिः। न चैवं निरुक्तज्ञानवान् रूपवत्त्वप्रकारकप्रमाविशेष्यत्वादित्यादौ साध्यतावच्छेदक
ताघटकसंबंधेन प्रतियोगिताव्यापकत्वस्याव्याप्तेरसंगतिः। यथा पृथिवीभिन्नद्रव्यभेदादिघटितकूटवत्त्वं गुणस्य तथा पृथिवी
भिन्नभेदघटितकूटवत्त्वं पृथिव्यादेरपीति तस्या अपि यावदंतर्गतत्वात्। तावदन्यतमवृत्तित्वसमनियतप्रतियोगिताकाभा
वस्येश्वरत्वप्रकारकप्रमाविषयत्वे वृत्तिमद्वृत्ते हेतावसत्वादिति वाच्यं। तद्रूपस्य यथाश्रुताभिप्रायत्वात्। धूमवान् समवायेन वं (पर्वेन धूमाव वसंयोग) ६
ह्नेरित्यादौ कालिकसंबंधेन धूमत्वविशिष्टस्याभावमादायैतत्कल्पे तादृशासंबंधेन व्यापकत्वविवक्षणासा[illegible]ति आप्तिवारकत्वादिति।
मिथः सामानाधिकरण्यं च एकाधिकरणवृत्तितावच्छेदकीभूतसाध्याभावमात्रवृत्तिव्यासज्यवृत्तिधर्मवत्त्वं। एकाधिकरणवृत्तिसाध्या
भावत्वसमव्यापकव्यासज्यवृत्तिधर्मवत्त्वं वास्य घटकसकलसाध्याभावाधि[illegible]करणे कव्यक्तिवृत्तिसाध्याभावकूटं वा रूपाभाववान्
वायुत्वादित्यादौ तद्रूपव्यधिकरणधर्मावच्छिन्नसाध्योसाध्याभावनिष्ठत्रित्वादिः। धूमवान् वह्नेरित्यादौ समानाधिकरणधर्मा
वच्छिन्नाभावनिष्ठद्वित्वमपि तादृशधर्मः इति [illegible] विशिष्टधर्मनिवेशान्निर्धूमवृत्तित्वाभावप्रतियोगितायाव्यधिकरणा
भावनिष्ठद्वित्वमेव तादृशो धर्मः। न तु रूपद्वया तादृशा

ता॰टी॰अं॰मंजू॰ धर्मावच्छिन्नधर्माभावमात्रनिष्ठतादृशधर्मावच्छिन्नवृत्तित्वस्याव्यापकत्वेपि न क्षतिः। यावतामिति। साध्याभावांतरसमानाधिकरण
१०२ साध्याभावत्वसमव्यापकव्यासज्यवृत्तिधर्मवत्त्वमर्थः। साध्याभावांतरसमानाधिकरणसाध्याभावकूटं वाऽऽदमितीति। तथा चैतत्व्यक्ति
वृत्तीत्यर्थः। पृथिवीद्वित्वादिनानतत्रनिवेशः। तथा च पटादितद्वायुवृत्तिद्वित्वानां न साध्यतावच्छेदके समनियतप्रतियोगिताकत्वं एत
द्घटतद्वायुद्वित्वसंयोगविभागादिकूटस्य च परस्परसमानाधिकरणतत्कूटरूपघटितत्वमावश्यकमिति भावः। द्वित्वानामिति। क
स्यापि रूपस्यैतेषां मिथः सामानाधिकरण्यमिति रूपाघटितकूटमादायातिव्याप्तिवारणं भवेदिति भावः। गुणपदमिति। न चैतत्
पृथिवीवृत्तिगुणत्वं नावच्छेदकं गुणत्वस्यैव तद्रूपेण स्यात्वघुत्वादिति वाच्यं। एतत्पृथिवीवृत्तिगुणत्वावच्छिन्नाभावस्य जलादौ विभि
न्नकालीनद्रव्येपि सत्त्वेन गुणत्वस्यातथात्वात्। नव्यास्तु। संयोगाभाववान्द्रव्यत्वादित्यादौ अतिव्याप्तिवारणाय साध्याभावो व्याप्य
वृत्तित्वेन विशेषणीयः। स्वसमानाधिकरणात्यंताभावाप्रतियोगित्वमेव व्याप्यवृत्तित्वं न तु स्वसमानाधिकरणाभावाप्रतियोगित्वं एतद्रूपा
त्यंताभाववान् द्रव्यत्वादित्यादौ एतद्रूपस्य स्वसमानाधिकरणध्वंसप्रागभावप्रतियोगित्वेनाव्याप्तेः। ध्वंसप्रागभावयोरत्यंताभावावि
रोधित्वेनात्यंताभावघटितत्वसत्त्वेन तद्वारणाच्च। एवं चैतत्पृथिवीवृत्तिगुणान्यन्यमित्यनुमाने साध्याभावस्य रूपाद्यात्मकत्वं संगच्छ
ते। अत्यंताभावाघटितव्याप्यवृत्तित्वाभावेपि तद्घटितव्याप्यवृत्तित्वसत्त्वादित्याहुः। तद्धेतुरेवेति। तथा चातिव्याप्त्यभिधानं उक्तक्रमेण
व्यभिचारित्वेवादिप्राचीना। एतत्पृथिवीपरमिति। अत्र वदंति। कपिसंयोगाभाववानेतत्त्वादित्यादावव्याप्तिवारणाय साध्याभावे साध्यवत्ताग्रहवि राम॰
रोधिता नियामकसंबंधेन वृत्तिमत्त्वं निरवच्छिन्नवृत्तिमत्त्वं वा वाच्यं। एवं चोक्तद्वित्वव्यक्तीनां नलह्रदघटकत्वे अपि तु जातिसहितव्यधिकरणध १०२

र्मावच्छिन्नाभावानामेवेति अतिव्याप्तिसंगतेः। पृथिवीपदस्यैतत्पृथिवीपरत्वमर्थः। एवं तु तत्परत्वं मावरूपकमित्युक्तं। एतेनात्रेदमिति

पृथिव्यां विशेषणमिति पूर्वग्रंथोऽप्यसंगत इत्यपास्तमिति। एतदिति। न चैतत्पृथिवीसमवेतत्वावच्छिन्नप्रतियोगिताजलत्वादिव्यावृत्तेति

गौरवमकिंचित्करमिति वाच्यं तस्यास्तद्व्यावृत्तत्वे मानाभावात्। गुरुतयेति। अत्र द्रव्यत्वत्वावच्छिन्नाभावसमनियततया सत्ता

या द्रव्यसमवेताभावस्यापि प्रतियोगितावच्छेदकं प्रागुक्तबुद्धिप्रकारत्वमेवेति सत्तायास्तत्प्रयोजनं विशिष्टसत्तायेति। सत्तायास्तु घटितस्य

गुरुतयाऽनवच्छेदकत्वादिति भावः। प्रागुक्तेति। प्रागुक्तस्थले द्वित्वादिरूपसाध्याभावमादाय नातिव्याप्तिरित्यर्थः। एकव्यक्तिवृत्तिगुणा

नां तादृशरूपघटितत्वेऽपि यावद्व्याप्यात्मकैकव्यक्तिवृत्तिरूपाघटितकूटस्यापि लक्षणाघटकत्वात्। यावतामेकव्यक्तिवृत्तित्वमित्यनेनैकव्य

क्तिवृत्तित्वव्याप्ययावत्त्ववतो यादृशसमुदायत्वं किंचिन्निष्ठाधिकरणतानिरूपकतावच्छेदकं तादृशसमुदायस्यैव वा निवेशफलात्। ता

वतैव रूपाभाववान् वायुः पृथिव्यन्यतरत्वादित्यादौ नातिप्रसंगेन तादृशकूटाधिकरणं यद्यदिति पूर्वोक्तकल्पस्याहेयत्वादिति। नन्वेक

व्यक्तिवृत्तित्वान्यूनवृत्तियावत्त्ववत्त्व इत्येव यावतामित्यादेरर्थः। तत्र च रूपाभावसाध्यकाव्याप्तिनिरासेऽपि प्रागुक्तातिव्याप्तिरस्ये

वेत्यत आह। किंचेति। निर्वह्नीति। अयं च महत्त्वादिसंयुक्ते वह्निमत्कपालके घटे प्रसिद्धः। संयोगेन वृत्तित्वोक्तौ तु कपालं घटादिसा

दौ समवायेन साध्यसाधनाभावेकपालत्वाभाववद्धूमत्वाद्यसंयुक्तत्वस्य द्रव्यत्वादौ प्रसिद्धस्य हेतावभावो बोध्यः। धूमानधिकर

णेऽवृत्तीति। वृत्तिअनियामकसंयोगस्य प्रतियोगितानवच्छेदकतया तत्साधारणरूपेण साध्यतावच्छेदकसंबंधत्वेऽपि वृत्तिनियामक

संयोगसंबंधावच्छिन्नधूमाभाववतीत्यर्थः। तादात्म्यादिसंबंधानुरोधेन संबंधस्थलरूपवृत्तिमत्त्वस्य निवेशनीयत्वादिति भावः।

71

गा·टी·अं·मंज· १०३

नचैवं प्रसिद्धव्यभिचारिणमनालोच्य हेतुतावच्छेदकसंबंधविवक्षणमनुचितमिति वाच्यं। वृत्तिनियामकसंयोगमात्रेणाहेतोरेवप्रसि
द्धव्यभिचारित्वात्। अस्मच्च महाकालान्योघटादिसाध्यकवियदादिपदग्राह्यत्वात्। नचैवं व्यभिचारिसामान्ये ऽतिव्याप्तिस्तयेनैवसंबंधविवक्ष
णांसिद्धांमहाकालान्यत्वादिसाध्यकातिव्याप्तीनां लक्षणादूषणत्वरूपत्वादिति वाच्यं। महाकालत्वसविषयकत्वान्यतरवानूद्भघटा
दिसादावतिव्याप्त्यसत्वेन तथोक्तेरावश्यकत्वात्॥ सांप्रदायिकास्तु। धूमानधिकरणोपर्वतादिनिरूपितसंयोगेन धूमाभाववृत्ति। एवंच
कालादेः साध्याभाववत्वं न दुर्घटमित्याहुः। तथाचेति। नन्वेवमपि द्रव्यान्यत्वविशिष्टसत्ताभाववद्गुणान्यत्वविशिष्टसत्ताभाववत्कर्मान्यत्ववि
शिष्टसत्ताभावादेः साधनसमानाधिकरणस्याधिकरणे सामान्यादौ हेतुतावच्छेदकसंबंधेनवत्त्वप्रसिद्धितादवस्थ्यं। विशिष्टसत्तावा
न्जातिमत्त्वप्रकारकप्रमाविशेष्यत्वादित्यादौ घटवृत्तित्वविशिष्टसत्ताभावघटान्यवृत्तित्वविशिष्टसत्ताभावघटितकूटमादायातिव्याप्ते
र्वह्निमान्धूमादित्यादौ तादृशतार्णतार्णदहनोभयाभावघटितकूटवत्तिपर्वतादौ हेतोः सत्त्वादव्याप्तेश्चाधिकरणमिति चेन्न। कपिसंयो
गाभाववान्मेयत्वादित्यादावव्याप्तिवारणाय साध्याभावे यत्किंचिद्धिकरणावच्छेदेन साध्यतावच्छेदकावच्छिन्नसाध्यसामानाधिकर
ण्यव्यधिकरणधर्मावच्छिन्नाभावान्यत्वोभयाभाववत्त्वरूपस्याप्यवृत्तित्वस्य निवेश्यत्वात्। यत्किंचित्त्वनिवेशेनोक्ताभावस्य वारणात् संयो
गीसत्त्वादित्यादौ संयोगाभावस्य लक्षणाघटकतया हेत्वधिकरणावच्छेदेनेति। एवं चाभाववान्मेयत्वादित्यादौ घटभेदाभावप[illegible]ट
भेदाभावादेर्व्याप्यवृत्तित्वाभावेन लक्षणाघटकत्वेन साध्यतावच्छेदकव्यापकत्वं प्रतियोगितायां व्यर्थ[illegible]मिति। वस्तुतस्तु। वह्न्यादिसा गम० १०३
ध्यके तार्णतार्णदहनोभयाभावः समानाधिकरणयोरुभयत्वस्यैकविशिष्टापरात्मकतया विशिष्टाभावः। सत्तासाध्यकविशिष्ट

साध्यके च दर्शितविशिष्टसत्ताभावश्च न लक्षणाघटकः विशिष्टसमुद्दयोर्भेदात् । वन्हित्वेन तार्णातार्णदहनोभयाभाववारणाय
यत्प्रतियोगिताकाभावे स्वावच्छेदकावच्छिन्नसामानाधिकरण्यव्यधिकरणधर्मावच्छिन्नाभावभिन्नत्वोभयाभावस्तत्प्रतियोगि
तानिरूपकत्वं व्याप्यवृत्तित्वं साध्याभावे निवेश्यं साध्याभावानां स्वाभाववविशिष्टप्रतियोगितासत्वादेतद्विशेषणां दुरूपपादमिति तु न
वाच्यं । तत्प्रतियोगितायाः साध्यतावच्छेदकसंबन्धस्य निवेशात् । संयोगी सत्वादित्यादौ संयोगाभावे स्वावच्छेदकावच्छिन्नवृत्तित्वसत्वेन घ
टत्वादिना संयोगाभावमादाय अतिव्याप्तिवारणाय स्वावच्छेदकावच्छिन्नसामानाधिकरण्यघटकवृत्तित्वं निरवच्छिन्नं निवेश्यं । हेतुसामाना
धिकरण्यघटकवृत्तित्वमपि तादृशमेव । तेन कपिसंयोगाभाववान् मेयत्वादित्यादौ कपिसंयोगरूपसाध्याभावघटितरूपवति द्रव्ये वृत्ति
त्वाभावस्य रूपरसान्यतरत्वे प्रसिद्धस्य हेतावसत्वेपि नाव्याप्तिः । एवं च घटत्वाभावाभावपटत्वाभावाभावादेर्निरुक्तव्याप्यवृत्तित्वात् साध्यता
वच्छेदकव्यापकत्वं प्रतियोगिताविशेषणमावश्यकमेवेति । अन्यत्र वदन्ति । साध्याभावकूटवद्वृत्तित्वे हेतुतावच्छेदकसंबंधावच्छिन्नत्वं न प्रवे
श्यं किंतु हेतुतावच्छेदकसंबंधान्यहेतुप्रतियोगिकसंबंधभिन्नसंबंधावच्छिन्नत्वं । एवं च सत्तासामान्याभाववन्निरूपितत्वरूपसंबं
धावच्छिन्नवृत्तित्वत्वसमनियतप्रतियोगिताकयावदभाववत्वमादाय वसत्तावान् द्रव्यत्वादित्यादावव्याप्तिवारणाय साधनसामानाधि
करण्यं व्यर्थमेव । न च सत्तावान् प्रमेयत्वादित्यादौ समवायेन हेतावव्याप्तिः । समवायान्यहेतुप्रतियोगिकसंबंधान्यत्वस्यासमवेतप्रतियोगिकसं
बंधाप्रसिद्धेरिति वाच्यं । हेतुप्रतियोगिके सत्र हेतुतावच्छेदकसंबंधेन वृत्तिमत्वेन हेतोर्विशेषणीयतया समवायान्यसमवेतप्रतियोगि
कसंबंधान्यत्वस्यासमवेतप्रतियोगिकसंबंधेप्रसिद्धेः । न चैवमपि व्याप्त्यमन्तं प्रमेयादित्यादौ कालिकसंबंधेन हेतौ कालिकसंबंधाप्रवा

ता·टी·अं·मंजू लिकसंबंधावच्छिन्नवृत्तिमत्प्रतियोगिकसंबंधाभिन्नसंबंधः कालिकसंबंध एवेत्ति साध्याभावकूटवद्वृत्तित्वनिरूपिततद्वच्छि
१०४ न्नवृत्तिमत्त्वाप्रसिद्धेः। साधनसामानाधिकरण्यमावश्यकमितिवाच्यं। तर्हि तादृशवृत्तिमत्त्वं परित्यज्य हेतुप्रतियोगिके यत्र हेतुप
दे न हेत्वभावाभावत्वावच्छिन्नं विवक्ष्यतां। एकस्यासत्तयैव समवायावच्छिन्नप्रमेयाभावो नास्तीति प्रतीत्युपपत्तेः। सत्तामात्रे
तादृशप्रमेयाभावत्वोपगमात् समवायान्यसत्ताप्रतियोगिकसंबंधान्यत्वे न स्वरूपसंबंधस्य प्रथमे कालिकसंबंधावच्छिन्न
प्रमेयाभावाभावत्वस्यैकस्मिन् कालमात्रवृत्तिधर्म एव स्वीकारेण कालिकसंबंधान्यतत्प्रतियोगिकसंबंधभिन्नसमवायादि
रूपसंबंधस्य च द्वितीये प्रसिद्धिसंभवादिति। परंतु रातन्मतेत्र हेतुतावच्छेदकावच्छेदेन हेतुतावच्छेदकसंबंधेन वृत्तिमत्त्वविशि
ष्टतद्वच्छेदेन वा नव्याप्तिर्दोषिति मते तु सर्वत्र हेतुतावच्छेदकावच्छेदेनेति द्रष्टव्यं प्रागेवेति। पृथिवीत्वसाध्यके जलत्वस्याभावते
जोत्वस्याभावादिकमादायातिव्याप्तेर्वारकत्वात्। न देयमेवेति। न चैवं पृथिवीत्वसाध्यके जलत्वस्य भावतेजोत्वस्य भावघटितसाध्या
भावकूटवत्सामान्यादिवृत्तित्वव्यापकजलान्यवृत्तित्वावच्छिन्नाभावमादाय नातिव्याप्तिरिति साध्यतावच्छेदकप्रतियोगिताव्याप
कत्वं व्यर्थमितिवाच्यं। इष्टत्वात्। एवं च पृथिव्यन्यद्रव्यत्ववत्। द्रव्यत्वादियादौ साधनसमानाधिकरणघटान्यत्वविशिष्टद्रव्यत्वाभाव
पटान्यत्वविशिष्टद्रव्यत्वाभावघटितकूटाधिकरणगुणादिवृत्तित्वाभावसत्वेपि तादृशवृत्तित्वव्यापकप्रतियोगिताकपृथिव्य
न्यवृत्तित्वाभावमादाय नातिप्रसंगः। एतेन तादृशाभावद्वयवारणाय साध्यवद्वृत्तित्वसाध्यतावच्छेदकव्यापकसमानाधिकर रा·म·
णधर्मावच्छिन्नप्रतियोगिताकत्वोभावः साध्यवद्वृत्तित्वसाध्यतावच्छेदकेतिरिक्तधर्मावच्छिन्नप्रतियोगिताकत्वोभयाभावो निवे १०४

रूपः इत्यपास्तं। तदनुपादाने पितथाविधवृत्तित्वाभावात्तत्वेनानतिप्रसंगात्। यत्तु तद्रूत्वानुपादाने भूतलाभेदमूर्त्तभेदोभयाभाववान्
भूतलमूर्त्तान्यतरत्वादित्यादौ साधनसमानाधिकरणभूतलभेदमूर्त्तभेदोभयघटितसाध्याभावकूटवद्वृत्तित्वव्यापकप्रतियोगिता
कद्रव्यवृत्तित्वाभावात्सत्त्वाद् व्याप्तिः। सत्तावान् जातेरित्यादौ न तथाविधघटत्वतद्भिन्नजात्युभयाभावपटत्वतद्भिन्नजात्युभयाभा
वघटितकूटवन्निरूपितहेतुताघटकसंबंधावच्छिन्नवृत्तित्वाप्रसिद्धेरिति वाच्यं। पूर्वोक्तव्याप्यवृत्तिनिरूपकत्वेन साध्याभावप्रति
योगिताविशेषणेन तद्वारणात्। वृत्तित्वेति। जगत्संयुक्तत्वे इत्यर्थः। न च वृत्तित्वपर्याप्तत्वमपर्थमिति वाच्यं। व्यासज्यवृत्तिधर्मत्वस्या
ननुगततया घटपटोभयनिष्ठसंख्यादिरूपद्वित्वानवच्छिन्नतया नतादृशप्रतियोगितावारणसंभवेदिति तदनवच्छिन्नत्वकूटं
वक्तव्यं तदप्यसर्वज्ञदुर्ज्ञेयमिति हेतुताघटकसंबंधावच्छिन्नवृत्तित्वपर्याप्तव्यासज्यवृत्तिधर्मत्वेनानुगतरूपेणैव निवेशः॥
यत्किंचिद्बुद्धिविशेषविषयतारूपैकेव नानात्वेतु तादृशविशेष्यतात्वेन पर्याप्तिः। एवं च जगत्संयुक्तत्वालोकभेदोभयाभाववारयितुं तद्दलस्या
वश्यकतया द्रव्यवृत्तित्वाभाववत्त्वासद्वृत्तिभावः। वस्तुतस्तु। एकत्वानवच्छिन्नपर्याप्तिप्रतियोगित्वप्रतियोगितासमानाधिकरणभेदप्रति
योगितावच्छेदकत्वं वा व्यासज्यवृत्तिधर्मत्वं। एवं चाखंडाभावघटकतया वृत्तित्वपर्याप्तेस्तस्य न वैयर्थ्यं वस्तुतस्तु। वृत्तित्व
पर्याप्तत्वमनुपादेयमेव। पूर्वोक्ताखंडान्यतरत्वेन जगत्संयुक्तत्वालोकभेदोभयाभाववारणायेव च तद्दभावरूपकमित्येवस
म्यक्। विशेषरूपेणासामान्याभावप्रतियोगितायाविशेषनिष्ठत्वान्नस्वन्यूनवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगितायामुक्तं। अव
च्छिन्नत्वं परममहत्त्वान्यत्वं। अन्यतरत्वस्याखंडत्वानुपगमेवाह। जातिजातिविशेषवत्त्वप्रकारकप्रमाविषयत्वमर्थः। तेन स

रूपसंबंधावच्छिन्नान्यतराभाववत्त्वात्। तथा सतीति। यत्तु गुणान्यत्वविशिष्टसत्ताभाववान् गुणान्यत्वप्रकारप्रमाविशेष्यत्वादित्यादौ
द्रव्यकर्मान्यत्वविशिष्टसत्तारूपाभावमादाय तत्साध्यक एव जातिमत्त्वादित्यादौ सत्ताघटितसाध्याभावकूटाधिकरणसमवेतत्वा
भावस्याप्यधिकरणधर्मावच्छिन्नस्यैव वृत्तिमद्वृत्तित्वेन चातिव्याप्तिरतः निरुक्तसाध्याभाववत्त्वानि यावंति तदवच्छिन्नाधिकरण
वृत्तित्वाभावो वाच्यः। एवं च निरुक्तभूतत्वमूर्तत्वान्यतराभावाभाववत्त्वं तादृशान्यतरत्वप्रतियोगितावच्छेदकीभूतभेदप्रतियोगि
तावच्छेदकभूतत्वत्वमूर्तत्वत्वरूपं। भूतत्वत्वादिकं च आत्मभेदरूपभूतत्वजात्यादिरूपमूर्तत्वयोः स्वरूपसंबंधविशेषः अन्यस्यानु
गतं किंचित्। तावदवच्छिन्नाधिकरणं च पृथिव्यादिचतुष्कमेवेत्यतिव्याप्तिः। अन्यथा आत्मभेदरूपभूतत्वजात्यादिरूपमूर्तत्वोभयघटि
तकूटाधिकरणे मनसि हेतोः सत्त्वादनतिप्रसंगादिति तच्छिथिलमेव। स्पर्शवद्गगनान्यतरत्वरूपभूतत्वे भूतत्वनिरुक्तिग्रंथतात्पर्यात्। अत एव
डान्यतरत्वानुपगमे च भूतभेदमूर्तभेदान्यतराभाववान् भूतमूर्तान्यतरत्वादित्यादावतिव्याप्तिरित्यपि दयास्या। अत एवाग्रे यावंति नि
रुक्तसाध्याभाववत्त्वानीत्यादिकल्पो वर्णयितव्यः। न चेदृशानीतथाकल्पः संभवति। अन्यतराभावाभावत्वस्यान्यतरत्वरूपतायाः केना
प्यनुपगमात्। न हि घटाभावाभावत्वादेः घटत्वादिरूपत्वं। अतथात्वे च तस्य भूतत्वत्वादिप्रत्येकरूपतायाः दुरुपपादकत्वात्। यथाश्रु
तलक्षणे एवं वा तथाविधान्यतरत्वद्वयघटितकूटमादाय अतिव्याप्तेः संगतिः। अत्र विशिष्टसत्ताभावसाधकातिव्याप्तिस्तेनोक्ता विशि
ष्टशुद्धयोर्भेदादिति। साधनेति। विशिष्टसाधनाधिकरणस्यैवैकस्य निवेशे लाभार्थं यत्किंचित्पदं। प्रतियोगिताव्यापकत्वं तु सा रामः
ज्यं तार्णातार्णीक्ष याभावव्यावृत्तिः प्राग्वत्। नव्यास्तु। साधनसामानाधिकरण्यं कूटविशेषणं यत्किंचित्प्रदेशसंदानाद्यादृशसाध्या १०५

भावत्वोभयवत्साधनवत्तौ भावेक्यमते तादृशसाध्याभावकूटा + दृशत्वोभयाभावइसाहेतुः। यथाश्रुतसाधनसामानाधिकरण्यप्र
वेशोप्यतिव्याप्तिमुद्धरति। व्यक्तत्वं इति। अत्रासमनियता + प्रसिद्ध्याऽसंभवोऽतः साध्याभावेकूटतात्वरूपविशेषणांपरित्यज्यान्यत्र त
न्निवेशं तथा सति तदनैक्यमते तद्देवलक्षणमुपेयं बाधकाभावात्तत्रचवनेयमतिव्याप्तिरित्यभिप्रायवानाह। व्यक्तत्वेति। प्रत्येके
ति। तदनैक्यपक्षेऽसंभवशंकावारणाय। एवं तादृशसाध्याभावत्वोपलक्षितानामधिकरणं प्रवेश्यं। अन्यथा [illegible]गे जेतः साधनसा
धनसामानाधिकरण्यविशिष्टसाध्याभावत्वावच्छिन्नानधिकरणतयाऽव्याप्तेः। तथा चेति। अन्यतराभावाभावत्वं च भूतलम
र्तत्वोभयानुगतमेकमेवेति पूर्वोक्तं स्मर्त्तव्यं। उक्तरीत्यैवोपपत्तेरभावाभावस्यातिरिक्तत्वाबलंबनं व्यर्थमिति वदंति नास्वरसः। तद्व
टभिन्नं घटत्वादित्यादावतिव्याप्तिवारणाय यावंत इति धूमवान्वह्नेरित्यादौ तन्नद्दयः पिंडत्वघटितयावत्पदार्थकूटवत्तायाः
अप्रसिद्धतया नातिरिति तन्नोक्तं। येन संबंधेन यस्य साधनसामानाधिकरण्यं तेन संबंधेन तदधिकरणं बोध्यं। प्रयो
जनं एकसंबंधेन साध्याभावकूटवत्वाप्रसिद्धावपि नासंभवः। वत्तित्वाभाववत्वसंकोचार्थं तावत्पदार्थकूटाधिकरणनिवे
शः। प्रत्येकं तावत्पदार्थाधिकरणप्रवेशेप्यदोषः। हेतुसामानाधिकरण्यसाध्यवद्वृत्तित्वे एकसंबंधेन विवक्षिते। तेन घटत्वादेः
कालिकसंबंधेन हेतुसामानाधिकरण्येपि अयःपिंडत्वादेः तत्संबंधेन साध्यवद्वृत्तित्वेपि साध्यसामानाधिकरण्ये + न क्षतिः। अ
त्र साध्याभावघटितलक्षणे तार्णतार्णदहनोभयाभावादिवारणाय निरुक्तोभयाभाववत्वात्मकं विशेषणमावश्यकं। तत्रापि + य
त्किंचिद्वृत्त्यधिकरणावच्छेदं घटत्वं। अन्यथा संयोगी सत्वादित्यादौ संयोगाभावस्य लक्षणाघटकत्वेन स्यादिति निःप्रयोजनसा

ध्याभावनिवेशो नगौरवंमनसिकुर्यतस्सागात्।प्रकर्षः।अत्रेदमस्वित्वबीजं।तावतापिसाध्याभावघटितसार्वभौमलक्षणेउक्तान्यतराभावसा
ध्यकातिव्याप्तिर्वारीवर्त्तीति।तन्निरस्यमिति।साधनसामानाधिकरण्यसाध्याभावकूटवद्वृत्तिसाभावस्यव्यधिकरणधर्मावच्छिन्नस्यमाप्यवृत्ति
त्वेनावच्छेदकाप्रसिद्धेरसंभवश्चित्ताबीजं।ननुप्रतियोगिविशेषितनेत्याकारकप्रतीतेप्रतियोगितावच्छेदकस्ययादृशोभानंतादृशमेवत
त्प्रतियोगितावच्छेदकत्वमितिनियमः।तथाचवक्ष्येदस्याखंडत्वेपिस्वरूपतोभानाभावेनगुरुत्वेदुर्वारमेवेत्यतआह।तावदिति।यत्किंचिद्बुद्धि
विशेष्यताएकैवेत्साशयः।बुद्धिरेवविशिष्यावच्छेदिका।तावतापिकालिकसंबंधावच्छिन्नत्ववृत्तित्वलोभयमपेक्ष्यलाघवमित्तिवा।ननुप्रथ
मेकालिकसंबंधावच्छिन्नवृत्तित्वसंकुतोनप्रतियोगितावच्छेदकमित्यतआह।कालिकेति।अप्रसिद्धत्वादिति।विषयतात्वस्याखंडत्वा
दितिभावः।साधनेति।संयोगीसत्वादिसाध्यावतिव्याप्तिवारणाय।साध्यसामानाधिकरण्यंनिरवच्छिन्नविशेषणतासंबंधेनविवक्षणी
यं।इत्थंचकपिसंयोग्येतत्वादिसाध्यावव्याप्तिरतोव्याप्यवृत्तयइति।साधनाधिकरणनिरूपितनिरवच्छिन्नवृत्तित्वंतदितिपदद्वयार्थः।
वस्तुतस्तु।साध्यवत्ताग्रहविरोधिताघटकसंबंधेनसाध्याभाववत्वोक्तौतादृशनिरवच्छिन्नविशेषणतासंबंधेनसाध्याभाववत्तायागुणा
देसत्वात्कपिसंयोगीएतत्वादेनाव्याप्तिः।किंतुकपिसंयोगाभाववान्मेयत्वादिसाध्यकेतादृशनिरवच्छिन्न[redacted]
[redacted]समवायसंबंधेनसाध्याभावकूटाधिकरणाप्रसिद्धेरव्याप्तिरतोव्याप्यवृत्तित्वसंयोगिसत्वादिसाध्यावति
व्याप्तिवारणाय।एवंचमिति।अवच्छिन्नवृत्तिकान्यत्वंतुनव्याप्यवृत्तित्वेसंयोगीसत्वादिसाध्यावतिव्याप्तेः।साध्यसामान्याभावस्यलक्षणाघटक
त्वात्।साध्याभावःस्वव्यापकसाध्यतावच्छेदकव्यापकप्रतियोगिताकः।नातोपृथिवीत्वाभाववान्जलत्वादिसाध्यकेतथाविधतत्तज्जलत्व

त्तित्वावच्छिन्नाभावकूटाधिकरणाप्रसिद्धेः प्रमाणवान्नेयत्वादित्यादौ उक्तरीत्याभावकूटाधिकरणाप्रसिद्धिः। साध्यसामानाधिकर
ण्येन निरवच्छिन्नत्वं निवेशः। कपिसंयोगी सत्त्वादित्यादौ स्वप्रतियोगितावच्छेदकविशिष्टत्वं देयमिति तादृशः। साधनाधिकरणे नि
रवच्छिन्नवृत्तयः कपिसंयोगाभाववान् द्रव्यत्वादित्यादौ अव्याप्तिवारणाय निरवच्छिन्नत्वसाध्यवत्ताज्ञानविरोधिता घटकेन नि
रवच्छिन्नविशेषणतासंबंधेन कपिसंयोगाभावघटितकूटवतः। साध्यवत्ताभावान्नातिप्रसंगः। न वा द्रव्यं सत्त्वादित्यादौ साध्यव
ति महाकालेकालिकसंबंधेन द्रव्यत्वाभावघटितकूटवत्त्वेपीति तादृशेति। अत्र वृत्तित्वप्रतियोगिकत्वमात्रमधिकस्य व्यर्थत्वात्। वृत्ति
मद्वृत्तित्वयावत्त्वयोस्त्यागेन सार्वभौममतीति विरोधोऽस्वरसः। कूटाघटितोक्तदोषान्महाकालस्यो घटादिसत्त्वव्याप्तिवारणानुरोधाच्चाह॥
वस्त्वातइति॥ सामान्यपदोपादानप्रयोजनं प्राग्वत्। दिगर्थस्तावृत्तिमद्वृत्तित्वेवृत्तिद्वयं कूटवद्वृत्तित्वं तदभाववत्वं चस्वरूपसंबंधेन निवेश्यं प
प्रयोजनं पूर्ववत्। साधनसामानाधिकरण्यं च व्यर्थमिति॥ छि॥ अथ पुछं॥ वैशिष्ट्यव्यासज्यवृत्तिधर्मानवच्छिन्नसाध्याभावनिवेशो
त्वाह। वाच्यमिति। तत्तद्वाच्यत्वाभावकूटाधिकरणाप्रसिद्धिरिति भावः। ननु साधनसमानाधिकरणयत्किंचिद्व्यक्तिवृत्तिअभावकूटाधिक
रणाव्यक्तित्वाभावो वाच्यः। तथा च कूटाधिकरणस्याप्रसिद्धिः। नापि हेतुताघटकसंबंधावच्छिन्नवृत्तित्वाप्रसिद्धिः। साध्यप्रतियोगिकत्वा
निवेशाद्धूमाघ्रं वैवेयतस्तादृशावृत्तित्वाभावासत्त्वेनाव्याप्तिमाह। साधनेति एतद्रूपवान् एतद्रूपादित्यादौ एतद्रूपत्वोभयाभावाद्यधि
करणं जगदितिलक्षणसमन्वयाद् अव्याप्तिपदं तत्पर्वतत्वादिति। वह्निमान् धूमादित्यादौ समवायावच्छिन्नवह्न्यभावकूटाधिकरणसंयुक्त
त्वाभावस्य वृत्तिमद्वृत्तेरप्रसिद्धेः। वह्न्यवयवमात्रसंयुक्तद्रव्याप्रसिद्धेरितिव्यधिकरणधर्मावच्छिन्नतदभावमादाय लक्षणगमनात्तनो

ता·टी·अ·मंजू· त्तं। गुणस्येति। तद्रूपेण गुणवत्ताप्रकारकप्रमाविषयत्वाभावो यो तु व्याप्यवृत्तित्ववैयर्थ्यापत्तिः ननु स्वरूपसंबंधेन प्रतियोगिव्यधिकरणसा
१०७ ध्यतावच्छेदकावच्छिन्नसमानाधिकरणाभावीयप्रतियोगितानवच्छेदकत्वं साध्यव्यापकतावच्छेदकत्वं। वह्निमान् धूमादित्यादौ साध्यवत्ता
प्रकारकप्रमाविषयतात्वस्य व्यधिकरणीभूतस्यावच्छिन्नाभावप्रतियोगितावच्छेदकत्वापत्तिः। अतः प्रतियोगिव्यधिकरणत्वप्रवेशः।
तथा च स्वरूपसंबंधेन प्रतियोगिवैयधिकरण्यस्य स्वरूपसंबंधावच्छिन्नगुणसामान्याभावेऽभावादेव तस्य लक्षणघटकत्वं दुर्वारं।
तथा च गुणवान् सत्वादित्यादावतिव्याप्तिः। न च तत्संबंधावच्छिन्नाधेयतावच्छेदकत्वरूपविशेषणं प्रयोजनाभावात्। उक्तातिव्याप्तिवा
रणाय दीधितिकारैरेव व्याप्यवृत्तित्वोक्तेः। न च तस्य तेन कथं वारणमिति वाच्यं पारिभाषिकत्वनिवेशादिति चेन्न। गुणवत्ताप्रकारक
प्रमाविषयत्वाभावस्यापि यावद्वृत्तिगततयाऽतिव्याप्त्यभावेन व्याप्यवृत्तित्ववैयर्थ्यात् ननु वृत्तिनियामकसंयोगेन गगनवान् पृ
थिवीत्वादित्यादिकं लक्ष्यत्वादेव हि वर्णनीयमित्यत आह। धूमवानिति। व्यापकताघटकाभावे प्रतियोगिवैयधिकरण्यं बोध्यं।
ननु व्याप्यवृत्तित्वं नावच्छिन्नवृत्तिकान्यत्वं किंतु नवच्छिन्नवृत्तिकत्वं तस्य साधनाधिकरणीयत्वलाभार्थं साधनसमानाधिकरण
पदं केवलान्वयिन इति च निरवच्छिन्नत्वमात्रप्रयोजनपरं। एवमित्यादि। च गुणवान् सत्वादित्यादिवारणाय व्याप्यवृत्तित्वविशिष्टाधिकरण
त्वनिवेशपरं। साध्यस्य गुणसामान्यस्याभावो द्रव्ये उत्पत्तिकालावच्छेदेन वर्तमानोऽपि न व्याप्यवृत्तिः। तन्निष्ठनिरवच्छिन्नवृत्तित्वनिरू
कं न द्रव्यमिति यावत्। यद्वा गुणवान् द्रव्यत्वादित्यादावव्याप्तिवारणाय तत् न व्याप्यवृत्तिरित्यस्य साधनाधिकरणे न निरवच्छिन्नवृत्तिरि राम०
त्यर्थः संयोगी सत्वादित्यादावतिव्याप्तिवारणाय व्याप्यवृत्तित्वविशिष्टाधिकरणं विवक्षणीयं। एवं च धूमवान् वह्नेरित्यादौ निरवच्छिन्न १०७

वृत्तित्वविशिष्टधूमाभावघटितकूटाधिकरणमयोगोलकमेवेति नातिव्याप्तिरित्यस्य रसाद्दाह। तादात्म्येति। ननु प्रयोजनाभावात्त
त्संबंधावच्छिन्नाधेयतावच्छेदकत्वं न प्रवेशयते किंतु साध्यतावच्छेदकसंबंधेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगिता
वच्छेदकत्वमेव तथा च गगनादिना घटादिभेदमादाय तत्त्वलक्षणासमन्वयसंभवः। अत्रापि धूमवान्वह्नेरित्यादावतिव्याप्तिवारणाय व्या
प्यवृत्तित्वविशिष्टाधिकरणत्वं कपिसंयोगाभाववान्मेयत्वादित्यादौ कपिसंयोगात्मकाभाववारणाय निरवच्छिन्नवृत्तित्वरूपमाप्यवृत्तित्वमि
ति चेन्मैवं व्यासज्यवृत्तिधर्मावच्छिन्नानुयोगिताकाभावस्यस्वभिन्नपि स्वघटितसमुदायत्वावच्छेदेनांगीकारात्। पर्वतत्वमहानसत्वाद्य
भावकूटाधिकरणाप्रसिद्ध्या। व्याप्तिवारणाय तन्निवेशस्यावश्यकत्वात्। आधेयतावच्छेदकतापर्याप्त्यवच्छेदकधर्मावच्छेदेन भेदनि
वेशान्नदोषः। नन्वसाध्यतावच्छेदकसंबंधेन स्वावच्छिन्नानधिकरणसाध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकं पर्वतत्वाभावव
महानसत्वाभावत्वादितद्वच्छिन्नाभावकूटाधिकरणाप्रसिद्ध्याऽव्याप्तिः कुतो नोक्तेति वाच्यं। वास्तवसाध्याभावस्य हेतुमति दैशिक
तयावर्तमानत्वस्य वा निवेशेऽप्युपपत्तेः। अभावसाध्यकव्यभिचारिणि साध्यवत्त्वप्रकारकप्रमाविशेष्यत्वाभावघटितकूटमादायैव
तन्मतेऽनतिप्रसंगात्। दैशिकविशेषणतयेति। तथा च गुणान्यत्वप्रकारकप्रमाविशेष्यत्वाभावकर्मान्यत्वप्रकारकप्रमाविशेष्य
त्वाभावघटितकूटाधिकरणाप्रसिद्धेर्नातिव्याप्तिः। एतेनोक्तस्थले द्रव्यत्वाभावघटितकूटाधिकरणावृत्तित्वाभावस्याप्यधिकरण
धर्मावच्छिन्नप्रतियोगिताकस्यैव संभवात्। कूटघटितलक्षणातिव्याप्तिः। प्रलयतत्पूर्वकालीनानापदार्थानां कालिकसंबंधेन च
प्रध्वंसक्रियादिवृत्तित्वादिति सूचितं। नन्वेवं कालिकसंबंधावच्छिन्नाकाशत्वाभावाभाववान[illegible]मात्मत्वादित्यादौ आकाशत्वाभाव

रूपसाध्याभावस्याधिकरणमात्मेतिव्याप्ते चासिद्धस्य तद्वृत्तित्वाभावस्य हेतावभावादव्याप्तिरिति चेन्न। प्रतियोगिमत्ताग्रहविरोधि
तानियामकसंबंधेन स्वपर्यन्तद्व्यकेपरेतु लाद्यशाकाद्यालाभावाभावाभावो नित्यत्वाभाव एव समनियतत्वादित्याहुः। वस्तुतस्तु। पूर्वोक्त
व्याप्यवृत्तित्वं साध्याभावे देयमित्यदोषः। धूमवान्वह्नेरित्यादौ तत्तद्योगोलकान्यत्वाभाववत्तद्घटभेदाभावस्यापि यावदंतर्गततया दैशि
कविशेषणतयातदधिकरणाप्रसिद्धिर्दुर्वारैवेति यावत्त्वं व्यर्थमेव। न च स्वरूपसंबंधेन वृत्तिमत्त्वं वाच्यं। अन्यथा कालिकसंबंधेन हेतु
समानाधिकरणघटत्वपटत्वादिरूपसाध्याभावानां यावतां दैशिकविशेषणतयाऽधिकरणाप्रसिद्ध्या वह्निमान्धूमादित्यादावव्याप्तेः॥
तथा च तद्घटभेदाभावस्य निरुक्तव्याप्यवृत्तित्वाभावाद्यावत्त्वं सार्थकमिति वाच्यं। संयोगाद्यभावस्यैवाव्याप्तेरग्रे। यद्विरोधात्। सा
ध्यवत्ताग्रहविरोधितानियामकसंबंधेन वृत्तिमत्त्वनिवेशे तु तद्घटत्वरूपाभावो दुर्वार एवेति चेन्न। उक्तरीत्या वह्निमान्धूमादित्यादावव्या
प्तिवारणाय हेत्वधिकरणे दैशिकविशेषणतया वर्तमानत्वस्य वाच्यत्वात्। तद्घटत्वस्य तद्घटवृत्तिरूपाद्यात्मकतयाऽदोषात्। संयोगाद
यद्यप्युत्तरग्रंथस्तु वह्निसंयोगाभावादिसाध्यकस्थलेपि संयोगाधिकरणात्मपरद्वसाद्यायात्साध्यव्यापकत्वमिति। समानाधिकर
ण्येनानवच्छेदकत्वप्रवेशरूपसाध्यव्यापकत्वे प्रतियोगिवैयधिकरण्यंनिवेश्यं। साध्यवद्वृत्तिं किंचित्स्वसन्त्वसंबंधस्वविशिष्टसामान्यकान्य
वं साध्यवद्वृत्तिमत्प्रतियोगितावच्छेदकतानवच्छेदकत्वं वा साध्यव्यापकतावच्छेदकत्वमिति वाशयः। वास्तवत्वं भाव भिन्नत्वं। कश्चित्तु स्वरस
बीजं तु भावभिन्नत्वं किमर्थं। वह्निमान्धूमादित्यादौ घटत्वस्यादिरूपसाध्याभावव्युदासार्थं चेत्तदापि सत्तावान्जातेरित्यादौ हेतुमतिकालि
कसंबंधेन वर्तत्वं किमर्थं। वह्निमान्धूमादित्यादौ घटपटत्वादिरूपसाध्याभावव्युदासार्थं चेत्तदापि सत्तावान्जातेरित्यादौ हेतुमतिकालिकसं
त्व

बंधेनवर्तमानसत्ताभावरूपत्वास्तत्वसाध्याभावघटितकूटवत्तिसामान्यादौ हेतुताघटकसंबंधेन वृत्तसप्रसिद्ध्याऽव्याप्तिः। हेतुमति दैशिकविशे
षणतया वृत्तित्वं वास्तवत्वं चेतन्न तदा संयोगाद्यधिकरणत्वाभाववत्साध्यकेऽप्रयोजनं प्रतिबध्यते वेति। गुणवानिति। गुणाभाववान्द्रव्यत्वादित्यव्यभिचारी
रूपसामान्याभाववान् पृथिवीत्वादित्यादौ च रूपाद्यात्मकाभावो न दैशिकविशेषणतया साधनसमानाधिकरणः रूपाधिकरणत्वाभावसाध्यकं
च संयोगाभावसाध्यकसजातीयमिति स्वेकमभावसाध्यकमपरं भावसाध्यकमुक्तं निसाम्नित्य वृत्तितावच्छेदकदैशिकव्याप्यवृत्तितावच्छेदकसा
ध्यतावच्छेदकाप्रसिद्धेः। संयोगी द्रव्यत्वाद्येकपि संयोगी रातत्वादित्यादौ दोषाभावात्कालिकव्याप्यवृत्तेरनुसरणं॥ साध्यव्यापकतावच्छेदक
रूपावच्छिन्नेति। न च साध्यव्यापकाभावत्वं वाच्यं। व्यापकत्वं च साध्यवन्निष्ठभेदप्रतियोगितानवच्छेदकत्वमिति वाच्यं। तथा सति द्रव्यं पृ
थिवीत्वादित्यादौ द्रव्यत्वघटत्वोभयाभावघटितकूटाधिकरणाप्रसिद्धेः॥ नन्वेवं साध्यतावच्छेदकसंबंधेन साध्यव्यापकतां विवेच्य
यं ततः पृथिवी द्रव्यत्वप्रकारकप्रमाविषयत्वादित्यादौ वक्ष्यमाणरीत्याऽतिव्याप्तेर्देवानांप्रियाः। तन्मतं निराकुर्वाणास्तु सुतरां तद
तिव्याप्त्यनुद्भावकत्वादित्यतः तद्धारणप्रकारकमाह। अत्र चेति। व्यापकताघटकसंबंधावच्छिन्नाभावनिवेशाय तेन च नाद्यग्र
थः। साधनसमानाधिकरणानां जलत्वाभावतेजोन्यत्वाभाववायवन्यत्वाभावानां तादृशानां यावतामधिकरणाप्रसिद्धेरति
व्याप्तेरभावादिति बोध्यं। वह्निमान्धूमादित्यादौ तत्तद्व्यक्तित्वावच्छिन्नाभावानां कालिकसंबंधेन हेत्वधिकरणयत्किंचिद्व्यक्तिवृत्तीनां
कूटाधिकरणाप्रसिद्धेरुक्तं दैशिकविशेषणतयेति॥ तेन यत्किंचित्वनिवेशो नासत्वादिति। महाकालगुणान्यतरत्वादित्यर्थः। यथाश्रु
ते साध्यव्यापकतावच्छेदकरूपावच्छिन्नप्रतियोगिताकघटादिभेदाभावघटितकूटाधिकरणाप्रसिद्ध्याऽतिव्याप्त्यसत्वेऽपि न क्षतिः। गुणा

77

महाकालान्यतरानुयोगिकत्वविशिष्टसमवायसंबंधेनवासत्ताहेतुः।वृत्तिमद्वत्वेति।जगद्वृत्तित्वे सत्यर्थः।व्यासज्यवृत्तिधर्मानवच्छिन्नत्वो
क्तावाह।अधिकमिति।वृत्तित्वपर्याप्तत्वं व्यासज्यवृत्तिधर्मविशेषणं।तेनतादृशवृत्तित्वस्य समनैयत्यरक्षणमित्यर्थः।।साध्येति।।स्व
प्रतियोगितावच्छेदकविशिष्टत्वादिः व्यधिकरणधर्मावच्छिन्नाभावं दूषयति।मूलेप्रतियोग्यवृत्तिश्चेति।तथाचाभावप्रत्यक्षेप्रति
योगितावच्छेदकविशिष्टप्रतियोगिज्ञानस्य हेतुत्वात्तादृशाभावेमानाभावइतिभावः।अत्रप्रतियोग्यवृत्तिः धर्मपक्षः।प्रतियोगितावच्छे
दक[illegible]त्वाभावः साध्यः।साधकाभावादिति हेतुरुह्यः।ननुप्रतियोग्यवृत्तित्वं न पक्षतावच्छेदकं प्रतियोगित्वस्य केवलान्व
यितया घटत्वादिना वह्न्यभावादेर्घटत्वादेः प्रतियोग्यवृत्तित्वाभावे नानिरासप्रसंगात्।नापितद्भावप्रतियोग्यवृत्तित्वं समनियताभा
वैक्यमते घटत्वेन वह्न्यभाववह्नित्वेन घटाभावयोरैक्येन घटत्वादेस्तदभावप्रतियोग्यवृत्तित्वस्य दुर्घटत्वात्।नापि हेतुः पक्षावृत्तित्वात्
(तावच्छेदकं) एवं घटावृत्तित्वं तत्पटान्निष्ठप्रतियोगितानवच्छेदकत्वं साध्यं समूहालंबनानुमितेरुद्देश्यत्वान्न घटत्वेन वह्न्यभावादीनामनिरा
सः।धर्मत्वमतेंत्र्यां।तेनवावृत्तिगगनादिना घटाभावनिरासः।अथैवं तद्वृत्तित्वं अवच्छेदकताघटकसंबंधेनवाच्यं।तेन घटत्वा
देः कालिकतया वह्न्यादिवृत्तित्वेपि न क्षतिः।नापि संयोगादिना घटाद्यवृत्तित्वेपि तन्निष्ठप्रतियोगितानिरूपितसमवायसंबं
धावच्छिन्नावच्छेदकतया बाधः।एवं च समवायेन वाच्यत्वेन घटत्वाभावादेः कथं निरासः।समवाये न घटत्ववृत्तित्वाप्रसिद्धेः।नच
तन्निष्ठाभावीयतत्संबंधावच्छिन्नप्रतियोगित्वं तदर्थः।घटत्वादेर्घटनिष्ठोभयाभावप्रतियोगित्वेनोक्तरीत्या बाधात्।नचाभावः प्रति
योगिव्यधिकरणत्वेन विशेष्यः।तथासति प्रतियोग्यनधिकरणत्वस्य प्रतियोगितावच्छेदकताघटकसंबंधेनावश्यं वाच्यतया वाच्यत्वत्वा

दिनाघटाभावादीनामनिरासात्। न च वैशिष्ट्यस्यासज्यवृत्तिधर्मानवच्छिन्नत्वं प्रतियोगिताविशेषणं। संयोगादीनामपि घटादिनिष्ठसम
वायावच्छिन्नप्रतियोगित्वेन तत्र च घटादिनिष्ठप्रतियोगितानवच्छेदकत्वबाधेन प्रतियोगिवैयधिकरण्यस्यावश्यकत्वात्। अतएव
तन्निष्ठभेदप्रतियोगितावच्छेदकत्वे नैव पक्षत्वमित्यपि परास्तं। वाच्यत्वत्वादेः समवायसंबंधावच्छिन्नभेदप्रतियोगितावच्छेदक
त्वस्यासत्वेन तेन रूपेण पक्षत्वे वाच्यत्वत्वे न घटाभावानिरास इति चेन्न। स्वप्रतियोगिकत्व घटानुयोगिकत्वोभयाभाववत्त्वसं
सर्गकः। घटनिष्ठप्रतियोगितीयतत्संसर्गावच्छिन्नावच्छेदकताभाववान् साधकाभावदित्यस्य पक्षसाध्यहेतुत्वात्। न च धर्माणामानं
त्यात्तत्तद्धर्मवृत्तित्वप्रतियोगितानवच्छेदकत्वसाधनमसर्वज्ञदुर्घटमिति वाच्यं। यावतां धर्माणामुपस्थितिस्तावतामेव पक्षी
कारात्तत्रोक्तसाध्यसाधनेनैव वादिविजयसंभवात्। ननु तद्वृत्तिधर्मस्य तन्निष्ठप्रतियोगितावच्छेदकत्वे समवायिहेन वाच्यत्वं नास्ती
ति प्रतीतिरेव साधिके सत्यत आह। तद्विशिष्टेति। विशिष्टवैशिष्ट्यावगाहिबोधे विशेषणतावच्छेदकविशिष्टनिर्णयः कारणं अभावधी
श्च विशिष्टवैशिष्ट्यावलंबनेत्यर्थः। ननु विशेषणतावच्छेदकप्रकारकनिर्णयत्वे न हेतुत्वरूपहेतुः स्वरूपासिद्ध इति चेन्न एवं घटत्वपटवृ
70 त्तिप्रतियोगितानवच्छेदकं। पटनिष्ठविशेष्यताविशिष्टप्रकारताभावात्। वैशिष्ट्यं च स्वसमानाधिकरणधर्मनिष्ठत्वसंबंधेन पटनिष्ठवि
शेष्यताघटितप्रमात्वघटकप्रकारताभावाद्वा। केचित्तु घटेनिरूपितानुयोगिताप्रसंगतादृशविषयताप्रयुक्तसांसर्गिकविष + प्रतियोगि
काभावः घटावृत्तिधर्मावच्छिन्नप्रतियोगिताकत्वाभाववान् पटवृत्तिधर्मनिष्ठप्रकारतानिरूपितघटनिष्ठविशेष्यताशालिज्ञानजन्यज्ञान
विषयत्वात्। तादृशविषयताप्रयुक्तविषयताश्रयत्वादितियावत्। भूतलनिष्ठघटसंबंधवत्। यद्वा। घट + यताश्रयत्वं हेतुरित्याहुः। घ

ता॰टी॰अ॰मंज॰ घटवृत्तिप्रतियोगितापटत्वानवच्छिन्नापटभिन्नवृत्तिप्रतियोगित्वादित्यत्र तात्पर्यमित्यपरे। वस्तुतस्तु। कारणाभावमात्रमिदानीमुक्तं
११० तत्प्रयुक्तायाः साधकत्वेनाभिमतं प्रत्ययासिद्धेरनुपदमभिधास्यामीति। अन्यथाऽभावधियस्तद्विशिष्टवैशिष्ट्यानवगाहित्वे।
निर्विकल्पकादपीति। निर्विकल्पस्य तावद्विशेषणज्ञानात्मकतया विशेष्ये विशेषणं तत्रापि विशेषणान्तरमितिरीत्याऽभावप्र
त्ययस्यापत्तेरिति भावः। अत्र च महानसीयः वह्निर्श्चेतिज्ञाने महानसीयवह्निर्नास्तीति बुद्धिवारणायोभयावच्छिन्नप्रतियोगिता
काभावबुद्धौ तदुभयैकतरधर्मावच्छिन्नेऽपरतद्धर्मप्रकारकनिश्चयत्वेनव्यधिकरणधर्मावच्छिन्नाभावस्थलेप्रतियोगिविशेषण
स्यापि प्रतियोगितावच्छेदकत्वमते कारणतात्तदनुपगमे तु तद्धर्मसमानाधिकरणत्वेनभासमानतद्धर्मावच्छिन्नप्रतियोगिताकाभाव
बुद्धौ समानाधिकरणधर्मावच्छिन्नाभावबुद्धौ प्रतियोग्यंशे प्रतियोगितानवच्छेदकभानस्याप्रामाणिकतया न घटाभावबुद्धौ द्रव्यं
घट इत्यादिनिश्चयापेक्षाप्रसंगः विशेषणतावच्छेदकताघटकसंबंधावच्छिन्नतद्धर्मनिष्ठावच्छेदकतानिरूपितप्रतियोगिप्रका
रतानिरूपिता याः स्वावच्छिन्नप्रतियोगिताविषयताया असत्त्वात् इत्यत्र तात्पर्यं। ननु प्रतियोग्यवृत्तिधर्मस्य प्रतियोगितावच्छेदक
त्वानुगमे गवाधिकरणशाशीयत्वावच्छिन्नशृंगाभावविषयिकायाः गवि शशशृंगं नास्तीति प्रतीतेरसिद्धिप्रसंग इत्यत्रेष्टापत्तिमा
ह। गवीति। प्रत्ययान्तरमन्यथोपपादयति। शशेइति। एवं चोक्तासुत्वस्यासमवायित्वेनवाच्यत्वं नास्तीतिप्रतीतौ वाच्यत्वं समवायीतिज्ञा
नेकारणं तच्च वाच्यत्वं न समवायीतिज्ञानदशायां न संभवति। तत्कालीनायाश्चोक्तप्रतीतेर्वाच्यत्वे समवायित्वाभावविषयकत्वे वाच्य राम॰
त्वं समवायीतिज्ञानकालीनाया अपि तथात्वमेवेत्यन्यथोपपत्तेर्व्यधिकरणधर्मावच्छिन्नाभावे साधकाभाव इति भावः। मूलेतत्पदस्य प्र ११०

तत्प्रतियोगितावच्छेदकपरामर्शित्वेऽसंगतिरूपं दीधितिकृता स्वदर्शितभावार्थबीजमाह। अभावबुद्धावितिः। स्वयमनंगीकारादिति। अ
यंभावः। नेत्याकारकाभावबुद्धिवारणार्थं तत्प्रतियोगिताकाभावप्रत्यक्षेनादृत्य हेतुत्वोपगमो वाच्यः। स चासंगतः। तादृशाकारणाभा
वस्यकार्यतावच्छेदकावच्छिन्नविरहप्रयोजकत्वेवउक्तबुद्धिश्च न तत्कार्यतावच्छेदकवतीति किं तेनेति। भावार्थः। स्वविशेषणताव
च्छेदकप्रकारकनिर्णयत्वेन हेतुत्वं विशिष्टवैशिष्ट्यविषयताशालिबुद्धित्वरूपं यत्तत्कार्यतावच्छेदकं समवायित्वेन वाच्यं नास्ती
ति बुद्धेस्तदवच्छिन्नत्वात् प्रतियोगिवृत्तित्वं प्रतियोगिनि वैशिष्ट्यं। न च नत्स्यात्तं त्र्येणेति किमर्थमिति वाच्यं। अभावप्रत्ययो
द्विरूपः। तत्र कश्चन प्रतियोगितांशे प्रतियोगितावच्छेदकवैशिष्ट्यावगाही कश्चन तु तथा नेति समवायित्वेन वाच्यत्वं नास्तीति प्रत्य
यो वाच्यत्वाभावांशे एव वाच्यत्वाविशेषणसमवायित्वस्यावच्छिन्नप्रतियोगिताकत्वसंबंधेनावगाहीति रीत्या व्यधिकरणधर्मा
वच्छिन्नाभावो दुर्वार इत्याशंकावारणाय। न स्यात्तं त्र्येणेत्यस्य च हेतुमाह। तद्धर्मेति। नियमात्। तादात्म्यसंबंधेन व्याप्यत्वात् तथा च उक्त
प्रत्यये न स्वावच्छिन्नप्रतियोगिताकत्वसंबंधेनाभावांशे घट [redacted] त्वावगाहने तन्नियमभंगापत्तेरिति भावः। एवं च प्रकृते योजयति
79 स्यग्निमावतारणं तर्कस्य पूर्वकं नियमं ग्राहयति स्यर्थकं दीधितौ तदिहेत्यादि स्तकः। अयथावगाहत इत्यनेन नियमे योजिते। घटत्वे
न पटो नास्तीति बुद्धेर्विशिष्टवैशिष्ट्यावगाहित्वासिद्धाभासोद्धार इति। अथ घटत्वेन घटो नास्तीति प्रत्ययस्य विशिष्टवैशिष्ट्या
वगाहित्वासिद्ध्युद्धारमात्रादेव तत्र हीत्यादि व्यधिकरणधर्मावच्छिन्नाभावदूषणोपपत्तेस्तद्विशिष्टज्ञानस्येति यथाश्रुतं विशेषण
णतावच्छेदकविशिष्टज्ञानस्येत्यादितद्व्याख्यानं च किमर्थमिति चेन्न। घटवदिति संयोगसमवायादिसंसर्गकविशिष्टवैशिष्ट्य

बोधेषु घट इति ज्ञानस्यैव च हेतुता एवं च प्रकारतावच्छेदकसंबंधमनिवेश्य घटत्वावच्छिन्नप्रकारताशालिबुद्धित्वमात्रं कार्यतावच्छे
दकमुपेयं तच्च घटो नास्तीति प्रत्ययसाधारणं निर्विकल्पकानुत्तरत्वात् तच्च घटत्वेन पटो नास्तीति प्रत्ययेप्यस्तीति न स्पष्टति। अ
थावगाहते इति। नन्वेवं घटः पटः पटत्वे इत्याकारकज्ञानाद् घटत्वेन पटो नास्तीति प्रत्ययापत्तिः मैवं। घटत्वपटत्वयोरवच्छेदकत्वमने घट
पटवत् इत्यादिबुद्धिसाधारणतदुभयावच्छिन्नप्रकारताशालिबुद्धौ तदुभयैकतरधर्मावच्छिन्नेऽपरधर्मप्रकारकनिर्णयत्वेन कार
णता। महानसीयवह्निमान् महानसीयवह्निर्नास्तीति बुद्धी प्रतिवन्हि र्महानसीयइत्यादिनिर्णयवत्। प्रतियोगिविशेषणस्यानवच्छे
दकत्वानुपगमे तु तद्धर्मावच्छिन्नविशेष्यताभिन्नतद्धर्मावच्छिन्नप्रकारताशालिबुद्धित्वमणिकारमते कार्यतावच्छेदकं तद्धर्मवति
तद्धर्मप्रकारकज्ञानत्वमेव कारणतावच्छेदकं वस्तुतस्तु विशेष्यतावच्छेदकप्रमाप्रकारतावच्छेदकत्वमस्य संवलितं सामग्री घट
कं इति घटत्वेन पटो नास्तिपटत्वेन घटो नास्तीत्यनयोर्न्नाविनिगमः॥ सौंदडमते तु तद्धर्मावच्छिन्नावच्छेदकतानिरूपितस्याव
च्छिन्नप्रतियोगिताकत्वसंसर्गावच्छिन्नतद्धर्मप्रकारताशालिबुद्धित्वं कार्यतावच्छेदकं प्रकारताधर्मितावच्छेदकतयोरपि विनिग
मनाविरहान्निरूप्यनिरूपकभाव इति गौरवं न च संसर्गावच्छिन्नत्वांतं व्यर्थं तथापि पटघटवदिति ज्ञाने स्वाश्रयपराप्रसिद्ध्या
पारतंत्र्येण मुख्यविशेष्ये घटत्वभानासंभवेन तत्साधारण्याभावात् सामान्यरूपेणेति न च सौंदडनामी रूपाभावे इष्टापत्तिः त
थापि विशेषरूपे सामान्याभावनिराकरणेप्रतिज्ञातं रं न कार्यं। सामान्यरूपेण विशेषाभावनिरासार्थं च तदन्यवृत्तित्वेन पक्षत्वे [redacted]
[redacted] नन्नि ष्ठप्रतियोगितानवच्छेदकत्वंसाध्यं। प्रतियोगिवृत्तिश्चेति मत्वे नञ्व्यत्यासस्तादृशपक्षलंभकः तदुभयत्वान्यत्वे

80

सति तदुभयत्ववदन्यवृत्तित्वेन पर्याप्तत्वरूपं तत्त्वं उपेक्ष्य तदुभयनिष्ठप्रतियोगितानवच्छेदकत्वमपि साधनीयं । तेन वह्नित्वेन तार्णता
र्णदहनोभयाभावादिनिरासः । मणिकाराणां तार्णतार्णदहनोभयाभावसत्त्वात् । तदुभयत्ववद्भिन्नयत्प्रत्येकं तद्वृत्तित्वस्य त
दुभयत्वे सत्त्वात् साध्यं इत्यर्तोभयनिष्ठप्रतियोगितानवच्छेदकत्वान्न दोषः । केवलतार्णाद्यभावप्रतियोगितावच्छेदकतायास्तत्तदुभ
यत्वान्यत्वं निवेशितं । तथा च तदुभयत्वान्यत्वविशिष्टतादृशवृत्तित्वावच्छिन्नस्य तार्णस्वातार्णत्वोभयमात्रस्य तदुभयत्वे दोषसत्त्वा
द्याधोत्तत्तदुभयनिष्ठत्वं प्रतियोगिविशेषणं । केचित्तु । तद्घटप्रतियोगिताकाभावः यत्किंचिद्घटावृत्तिधर्मावच्छिन्नप्रतियोगिताक
त्वयत्किंचिद्घटवृत्तिप्रतियोगिताकत्वोभयाभावाभाव इति रीत्या विशेषरूपेण सामान्याभाववद्व्यधिकरणधर्मावच्छिन्नाभावो निर
सनीयो । घटसामान्याभावे तद्घटाभावे च बाधवारणाय क्रमेण प्रतियोगिताकत्वद्वये । यत्किंचिद्घटश्चाभिन्नत्वनिवेश्यः । तेन तद्घ
टाभावे न बाधः । हेतुः । पूर्वोक्त एव । पक्षः पूर्वोक्तः । प्रतियोगितावच्छेदकसमानाधिकरणभेदप्रतियोगितावच्छेदकधर्मपर्याप्त्य
धिकरणपर्याप्तप्रतियोगिकत्वाभाववानिति रीत्या द्रव्यत्वेन घटाभावः घटत्वेन तद्घटतदन्योभयाभावश्च निरसनीयः । धर्मश्च त
त्प्रतियोगितावच्छेदकान्यत्वेन विशेष्यः । तेन तद्घटतदन्यघटोभयाभावेन बाधः । पर्याप्तिनिवेशात् घटसामान्याभावादौ घटद्वित्वादिक
मादाय न बाधः । एवं च सोऽदलमते प्रतियोगितावच्छेदकविशिष्टप्रतियोगिज्ञानं न हेतुरित्याहुः । घटस्तद्घटान्य इति ज्ञानोत्तरं घटस्त
द्घटत्ववानिति ज्ञानासंभवात् घटत्वेन तद्घटो नास्तीत्याकारकप्रतीतेर्घटत्वसामानाधिकरण्येन तद्घटान्यत्वविषयकत्वावश्यकत
या चिंतामणिकारैः सामान्यरूपेण विशेषाभावो निरसनीयः । इत्यत इत्यनंतरं तद्दिशा दूषेपः । तथा च तत्साधकयुक्तिर्नोल्लेखेति भावः ।

-टी-खं-मंजू- स्वरूपत प्रतियोगिविशेषणत्वं घटत्वादेरुक्तरीत्या अभिसंधायाह घटत्ववति विशिष्टेनेति। ननु घटत्वावच्छिन्नादेर्घटत्वावच्छिन्नाभावविरोधित्वं तेनाप्य
११२ धिकरणधर्मावच्छिन्नाभावनिरासः। गगनत्ववाच्यत्वत्वावच्छिन्नस्य गगनत्वावच्छिन्नाभावादि विरोधित्वं न दोष इत्यत आह। वाच्यत्वत्वादिनेति। दिगर्थ
स्तु नियमाप्रयोजकत्वं॥ छ॥ ॥ इति आरडोपाह्व रामभट्टविरचिता चतुर्दशलक्षणी अनुमानमंजूषा॥ छ॥ श्री सांबसदाशिवार्पणमस्तु
तापोतापगतस्तपानचकशाधौतानधूलिस्तनोर्नस्वछंदमकारिकंदकवलः कानामकेलीकया। दूरोत्सृष्टकरेणहंता करिणासक्ता
नवापद्मिनीप्रारब्धोमधुपैरकारणमहोझंकारकोलाहलः॥१॥ नस्त्रीचलः पुमान्लोके दृष्टो वा यदि वा श्रुतः। पुंश्चल्या रावतं
जारं चालयंति पुनः पुनः॥२॥ भ्रमन्वनांते नवमंजरीषु न षट्पदो गंधफलीमजिघ्रत्। सा किं न रम्या स च किं न रंता
लीयसी केवलमीश्वरेच्छा॥३॥ ॥ छ॥ ॥ छ॥ ॥ छ॥ ॥ श्री गणपतये नमः॥ ॥ छ॥ ॥ छ॥ ॥ छ॥

81

राम ०
११२